**केचिद**त्र न प्राचीनावीतत्वमिच्छन्ति (१.४.४)

चरव्यानध्येतानपि विश्राव्य **केचित्** निदधति (२.२.१)

शृते **केचित्** पूर्वावदेये पूर्ववदेव तमभिपूरयन्ति (२.२.१)

**केचिद्** इडालेपादेवोपस्तृणन्त्यभिघारयन्ति च (२.३.४)

फाल्गुनशुक्लचतुर्दश्यामग्निहोत्रोच्छिष्टमातच्य निदधातीत्यादि प्रतिपद्यन्त इति **केचित्** -३.१.१

प्रतिप्रस्थाता आमिक्षाश्रपणीं च **केचित्** (३.२.३)

'पयो वामग्नी' इति पृथगेव मध्यमे परिधी अन्वारभ्य 'आ नू ह' इति **केचित्** (३.६.२)

---

1. उत्तरवेदे: पूर्वस्य करण्या अन्तिके शुल्बिणीनामोत्तरनाभिच्छादनार्थं वाधूलकेषु प्रसिद्धः कश्चिदाकृतिविशेषः। — *Prayoga.* V.4.6
cf शुल्बिण्या प्रावृत्य. — *VādhŚS* VI.13.55.

2. मन्त्रब्राह्मणसमानतन्त्रचरतन्त्रन्यायशास्त्रग्रन्थादिषु...। — *Prayoga* p. 1

सह यूपाहवनीयाभ्यामिति **केचित्** (४.२.२)
फलीकरणहोमं चात्र **केचित्** जुह्वति (५.२.२).
तथा सत्यविकृतः प्रैष इति **केचित्** (५.६.२)
आग्नीध्र एवाज्यानि गृह्णीयादिति **केचित्** (५.६.३)

**इत्यन्ये—** द्वयोरप्याग्न्याधेयिकमि**त्यन्ये** (१.३.१)
यजमानस्यैव कश्चिद् व्रतकाल **इत्यन्ये** (२.२.३)
यथोपपादमि**त्यन्ये** (२.३.४)
अनुयज्ञैरित्याध्वर्यवमि**त्यन्ये** (३.१.२)
प्रहरिष्यमाणमभिध्यायती**त्यन्ये** (३.४.२)
अतीत्य. . . या भावाल्लुप्यत **इत्यन्ये** (३.४.२)
'स्वधा नम' इत्यनुमन्त्रयत **इत्यन्ये** (३.४.५)
निर्वर्तनमन्थनमि**त्यन्ये** (४.२.१)
सह शामित्रेण **चेत्यन्ये** (४.२.२)
गौरित्येकेऽन्वाहार्य **इत्यन्ये** (४.३.२)
एका पयस्यायै **इत्यन्ये** (५.१.२)
समुच्चीयते ह **इत्यन्ये** (५.३.२)
दक्षिणाग्नावपि **इत्यन्ये** (५.४.२)
शाकलान्येवेध्मकाष्ठान्युपसत्स्वपि **इत्यन्ये** (५.४.२)
नैष स्नाननियम **इत्यन्ये** (५.६.१)
अग्नीदेवाधिश्रयणान्तं प्राकृतं तन्त्रं कुर्याद् **इत्यन्ये** (५.६.२)
अस्यैव कश्चित् प्रैष ब्रूयाद् **इत्यन्ये** (५.६.२)
तेषु पक्षेषु तयोः पक्षयोस्तदर्थान् आज्यसंयुक्ता लाजा **इत्यन्ये** (६.१.३)

**इत्यपरे —** न प्रतीकग्रहणम् **इत्यपरे** (१.२.१)
येषां पावमानेष्टिकम् **इत्यपरे** (१.३.१)
तमध्वर्यवे दत्त्वाऽन्यं ब्रह्मण **इत्यपरे** (१.३.२)
यथालाभमशनम् **इत्यपरे** (१.३.२)
शेषपक्षापेक्षमेतदुत्तरस्य पक्षान्तरत्वाय **इत्यपरे** (१.३.२)
अविशेषेण सर्वेषाम् **इत्यपरे** (१.४.३)

अध्वर्युर् **इत्यपरे** (१.४.५)
'धान्यमसि' इति च सर्वत्रानुषज्यत **इत्यपरे** (२.२.१)
सर्वत्रैतद् **इत्यपरे** (२.२.२)
न लुप्यत **इत्यपरे** (२.२.३)
यथापाठम् **इत्यपरे** (२.२.३)
यजमान **इत्यपरे** (२.२.३)
आज्यस्थाल्या **इत्यपरे** (२.३.४)
चतुर्धाकृतं चेद्व्यादिष्टं स्वभागं वेदेनोपस्तरणाभि...**इत्यपरे** (२.३.४)
होतैव **इत्यपरे** (२.३.४)
सादनमग्रेणैव परिहरणम् **इत्यपरे** (२.३.४)
न पर्याहरणम् **इत्यपरे** (२.३.५)
अग्नीत्समिधमाधायाग्नीन् संमार्ष्टि **इत्यपरे** (२.३.५)
समिष्टयजुषोऽनन्तरम् **इत्यपरे** (२.३.५)
पृथग्याजमाना: प्रकृत्यर्था **इत्यपरे** (२.३.७)
सकृद्वाच्यमानोऽभिमन्त्रयेत **इत्यपरे** (२.४.३)
अध्वर्युरेव **इत्यपरे** (२.५.३)
एवं 'वायव स्थोपायवस्थ' इति संदिग्धेष्वेकम् **इत्यपरे** (३.१.१)
दारुपात्रमेव **इत्यपरे** (३.१.१)
श्रुतमन्त्राभ्याम् **इत्यपरे** (३.१.१)
समुच्चय **इत्यपरे** (३.१.२)
स्तरणाभिघारणे **इत्यपरे** (३.१.२)
लोहितायसस्ताम्रमय अयोविकार कश्चिद् **इत्यपरे** (३.१.३)
शलल्यैव **इत्यपरे** (३.१.३)
वैश्वदेव एव प्रसुनियमो नोत्तरेषु पर्वसु **इत्यपरे** (३.२.१)
चतस्रो यथाप्रकृति **इत्यपरे** (३.२.१)
कल्याणकर्मण: सपिण्डा **इत्यपरे** (३.२.३)
पञ्चहोता अध्वर्योरेव **इत्यपरे** (३.२.४)
यथाप्रकृत्येव प्रेष्यन्नैवोहेद् **इत्यपरे** (३.२.४)

अध्वर्योरेव **इत्यपरे** (३.२.५)

न शमीवर्जं करीरसक्तूनां शेषकार्याणि विद्यत **इत्यपरे** (३.२.५)

न चास्य मन्त्रस्य ऊह इहेत्यपरे (३.४.३)

यथाप्रकृति **इत्यपरे** (३.४.५)

यावत्प्रयोगम् **इत्यपरे** (३.६.१)

आध्वर्यवम् **इत्यपरे** (४.१.२)

सह ब्रह्मयजमानाभ्यां च **इत्यपरे** (४.२.२)

अध्वर्युरेव **इत्यपरे** (४.२.३)

स्वयमेव परिक्रम्यात्याक्रम्य परिहृतामेवादायाश्रावयेद् **इत्यपरे** (४.२.५)

गोश्चान्वाहार्यश्च **इत्यपरे** (४.३.२)

नैवमूहेद् **इत्यपरे** (४.४.२)

अपरेणैव प्राग्वंशं पत्नीशालाया **इत्यपरे** (५.१.२)

अन्यद् **इत्यपरे** (५.१.३)

नैय्याग्रोधानि **इत्यपरे** (५.१.३)

ग्रामस्य दीक्षितः स्याद् **इत्यपरे** (५.१.४)

ग्रामे दीक्षितस्यैवैतन्मन्त्रद्वयम् **इत्यपरे** (५.१.४)

व्यवस्थितोऽयं विकल्प **इत्यपरे** (५.१.७)

एवं जपेद् **इत्यपरे** (५.१.८)

पूर्वं स्वयमेव जपित्वा उत्तरं वाचित **इत्यपरे** (५.१.८)

स्निहानं स्नेहमश्रुनिष्ठीवितम् **इत्यपरे** ५.१.८

तस्यैव चर्मण उत्तरार्धे तस्याभ्याशे प्रदेशान्तर **इत्यपरे** (५.३.१)

अत्र ग्रन्थ एवैष विकल्पनामात्राध्यायी **इत्यपरे** (५.३.५)

दीक्षामेवैताव् **इत्यपरे** (५.३.५)

अनुयाजविकारा **इत्यपरे** (५.४.१)

नैव क्वचिदध्यादध्याद् **इत्यपरे** (५.४.२)

न तरेत्तु याजोऽर्धसमिद्भिश्च **इत्यपरे** (५.४.७)

**नेत्यपरे** (५.४.७)

यजमान एवोद्वपनानि निबाधत **इत्यपरे** (५.५.३)

प्रैषखण्डश्च **इत्यपरे** (५.६.१)
प्रयोजनमनसां प्रैष **इत्यपरे** (५.६.२
सर्वविरुद्धमाज्यग्रहणान्तं प्रतिप्रस्थातुर् **इत्यपरे** (५.६.३)
नात्र प्रणीता **इत्यपरे** (६.१.१)
पिष्टा एव प्रभ्वाज्यसंयुक्ता **इत्यपरे** (६.१.३)
पशुभ्य **इत्यपरे** (६.२.५)
यजमानेनापि सर्वैः सह जपनीया **इत्यपरे** (६.२.६)

**इत्येके** — य उत्तरो द्वादशाहस्तत्रैव ते नियमा **इत्येके** (१.३.२)
पञ्चममुन्नयनं पञ्चावत्तिनाम् **इत्येके** (१.४.२)
याजमानम् **इत्येके** (२.१.३)
तथोत्तरपूर्वमुत्तरेषां कपालानां निर्वर्तनप्रतिनोदने न स्तः **इत्येके** (२.२.१)
पुरोडाशविषयमेवाभिमर्शनम् **इत्येके** (२.२.१)
यथादेवतमभिचारम् **इत्येके** (२.२.३)
यजमान **इत्येके** (२.२.३)
एवमेकविंशति दारूण्यभ्याधेयानि **इत्येके** (२.३.१)
चतुर्धा कृत्व **इत्येके** (२.३.४)
अपरेण सर्वान् कर्तृन् दम्पती च **इत्येके** (२.३.५)
अनेन मन्त्रेण होमानन्तरं निवर्तयेद् **इत्येके** (२.३.६)
यजमानभागप्राशनवर्जम् **इत्येके** (२.३.७)
प्राडेत्योपसमिधमादाय व्रतं विसृजेद् **इत्येके** (२.३.७)
अध्वर्युर् **इत्येके** (२.४.३; ४)
नैकस्याम् **इत्येके** (२.४.४)
अपेषणं पौष्ण**स्यैके** (३.१.१)
विकल्प **इत्येके** (३.१.१)
अध्वर्युरेवोभयानि पात्राणि सादयित्वा सहैव प्रोक्षेद् **इत्येके** (३.२.३)
पञ्चहोतुर् **इत्येके** (३.२.३)
अविभक्ता सपिण्डा **इत्येके** (३.२.३)

उभयोः पृथगेव फलीकरणहोम **इत्येके** (३.२.५)

अभिहोमो जुह्वासद्याज्यस्थाल्य अवदाय अपूर्वेण **इत्येके** (३.२.६)

नैव वेदिकरणम् **इत्येके** (३.३.२)

दारुपात्र्याम् **इत्येके** (३.३.२)

तेन नमस्कार **इत्येके** (३.३.३)

यथाप्रकृत्येव **इत्येके** (३.४.१)

नास्ति प्रच्छेदनाभिमर्शनम् **इत्येके** (३.४.१)

पात्र्याम् **एके** धाना उद्वासयन्ति (३.४.१)

प्रणीतेऽग्नौ तस्याभिहिता भविष्यन्ति **इत्येके** (३.४.१)

यज्ञोपवीती**त्येके** (३.४.१)

अन्वाहार्यपचनम् **इत्येके** (३.४.२)

सकृदवहत्य त्रिष्फलीक्रियां भर्जनीया **इत्येके** (३.४.२)

उपभृति द्वे षट् गृह्णीते एकम् **इत्येके** (३.४.३)

नानाग्नेयविकारस्येदमभिघारणम् **इत्येके** (३.४.३)

'वर्षप्रविष्टस्तमङ्ध्वम्' **इत्येके** (३.४.३)

भर्जनानन्तरमेवोभयमम्बरीषान् मन्त्रेणोद्वासयेद् **इत्येके** (३.४.३)

अपरेण **इत्येके** (३.४.३)

यजमानस्य. . . ननं वर्जयित्वा **इत्येके** (३.४.४)

'स्वाहा' इत्यनुमन्त्रणमन्त्रो लुप्यत **इत्येके** (३.४.५)

अत्रापि **इत्येके** (३.५.१)

विकार **इत्येके** (३.५.१)

'आ देवपितृयजं वह' **इत्येके** (३.५.१)

उपभृत्येवम् **इत्येके** (३.५.२)

इति विक्रियेत **इत्येके** (३.५.२)

एवं 'देवान् पितॄन् हविष' इत्यङ्गविकार **इत्येके** ह्वयति (३.५.२)

'देवपितृयज्यायै' नात्र विकार **इत्येके** ह्वयति (३.५.२)

'जेमानं महिमानं गमेयमि'ति महेन्द्रयाजिनाम् **इत्येके** (३.६.१)

वाजिनयागोऽपूर्वसान्नाय्यविकार **इत्येके** (३.६.१)

निस्तक्षणीय **इत्येके** (४.१.१)

**खनन्त्येके** उपरविभागान्वयात् (४.१.१)

शास्त्रप्रसिद्धमष्टग्रहणम् **इत्येके** (४.१.२)

'पृथिवीजन्मना आज्यस्थालीनाम्ना' इत्यूहित्वा सादयेद् **इत्येके** (४.१.२)

निस्तूष्णि **इत्येके** (४.२.१)

सहाज्यैश्चैके (४.२.२)

दृंहणवर्जमर्थलोप **इत्येके** (४.२.४)

न ध्रुवाम् **इत्येके** (४.२.४)

अर्थलुप्तमदानाधिश्रयणे चार्थलुप्ते **इत्येके** (४.३.१)

प्राशित्रपक्षे पुरोडाशस्य नास्ति परिहरणम् **इत्येके** (४.३.२)

दक्षिणस्या यौष्ण: सव्याया: श्रोण्या **इत्येके** (४.३.३)

वाचयिताऽध्वर्युर् **इत्येके** (४.३.४)

ग्रहणाभावादत्र नाभिमन्त्रणम् **इत्येके** (४.४.२)

'ध्रुवा' इति सन्नमयेद् **इत्येके** (४.४.२)

'अहम्' इत्येके सन्नमयन्ति (४.४.२)

न ते पक्षान्तरे नापि यजमानभाग प्राशनम् **इत्येके** (४.४.३)

तिस्र **इत्येके** (५.१.२)

अर्थविरुद्धमुपवेषोद्वासनम् **इत्येके** (५.१.५)

उपस्थापिता ब्रूयाद् **इत्येके** (५.१.६)

आमुष्यायण इति त्रिप्रवरमेके ब्रुवते (५.१.७)

अदितिमिष्ट्वा 'मरुतो यद्धवो दिव:' इति मारुती **इत्येके** (५.२.२)

कृष्णाजिनस्तरणमात्रमध्वर्युरेव **इत्येके** (५.३.३)

विमुच्यैवापरेण सोमवाहनमतिगमयेद् **इत्येके** (५.३.३)

तेनागत्येक्षोर् **इत्येके** (५.३.४)

शाकलानीध्मकाष्ठानि **इत्येके** (५.३.४)

पञ्च एव मुष्टयो न तूष्णीक **इत्येके** (५.३.४)

मन्त्रेण राजानं प्रपादयेद् **इत्येके** (५.३.४)

विकृतिविषयावेताव् **इत्येके** (५.३.५)

प्रस्तरेणैवोपसन्नह्य निदधाति **इत्येके** (५.३.५)

प्रयाजविकारास्ता वाचनिकोऽत्राघार **इत्येके** (५.४.१)

अथाध्वर्युर्वा तन्त्रं सर्वं कुर्याद् **इत्येके** (५.४.१)

अथाध्वर्युणैव निरुप्तस्याधिश्रयणमात्रमग्नीत् कुर्याद् **इत्येके** (५.४.२)

यथाप्रकृति **इत्येके** (५.४.२)

द्वाव् **इत्येके** (५.४.२)

उपांशुयाजनपक्षे एके सादयन्ति (५.४.२)

संसृज्यान्त्यायां प्रतिपादयेद् **इत्येके** (५.४.३)

तूष्णीम् **इत्येके** (५.४.३)

'पृथिवीजन्मनाऽज्यस्थालीनाम्ना' **इत्येके** (५.४.३)

प्रक्रमा एव **इत्येके** (५.४.३)

त्रीवेद्यन्तादपरतोऽर्धप्रक्रममवशिष्योत्तरवेदिं मिमीत **इत्येके** (५.४.५)

निरन्तरमेव दशकम् **इत्येके** (५.४.५)

निरन्तरमेव दशकव्यासम् **इत्येके** (५.४.५)

प्रदर्शनार्थयजुरादिवचनम् **इत्येके** (५.४.६)

प्राकृतोऽयं प्रैषखण्ड **इत्येके** (५.४.७)

तथोत्तरस्य हविर्धानस्य कुर्याद् **इत्येके** (५.५.१)

विमित एव विमितायामायतनप्रदेशाभ्यामधिकविस्ताराणि छर्दीषि कृत्वा तैरेव कुर्याद् **इत्येके** (५.५.१)

वर्त्मन्यां वर्त्मनि जुह्वच्चक्रमभिजुहुयाद् **इत्येके** (५.५.१)

तथा यूपार्थमनियम **इत्येके** (५.५.२)

नवच्छदीत्यादीनामन्यतमं क्रत्वर्थमपि **इत्येके** (५.५.२)

एकैकम् **इत्येके** (५.५.३)

आग्नीध्रियो धिष्णियो मध्ये आग्नीध्रागारस्य मध्याद्दक्षिणतोऽरत्निमात्र **इत्येके** (५.५.४)

सपिण्डा **इत्येके** (५.६.१)

निस्तक्षणीय **इत्येके** (४.१.१)

**खनन्त्येके** उपरविभागान्वयात् (४.१.१)

शास्त्रप्रसिद्धमष्टग्रहणम् **इत्येके** (४.१.२)

'पृथिवीजन्मना आज्यस्थालीनाम्ना' इत्यूहित्वा सादयेद् **इत्येके** (४.१.२)

निस्तूष्णि **इत्येके** (४.२.१)

सहाज्यैश्चैके (४.२.२)

दृंहणवर्जमर्थलोप **इत्येके** (४.२.४)

न ध्रुवाम् **इत्येके** (४.२.४)

अर्थलुप्तमदानाधिश्रयणे चार्थलुप्ते **इत्येके** (४.३.१)

प्राशित्रपक्षे पुरोडाशस्य नास्ति परिहरणम् **इत्येके** (४.३.२)

दक्षिणस्या यौष्ण: सव्याया: श्रोण्या **इत्येके** (४.३.३)

वाचयिताऽध्वर्युर् **इत्येके** (४.३.४)

ग्रहणाभावादत्र नाभिमन्त्रणम् **इत्येके** (४.४.२)

'ध्रुवा' इति सन्नमयेद् **इत्येके** (४.४.२)

'अहम्' इत्येके सन्नमयन्ति (४.४.२)

न ते पक्षान्तरे नापि यजमानभाग प्राशनम् **इत्येके** (४.४.३)

तिस्र **इत्येके** (५.१.२)

अर्थविरुद्धमुपवेषोद्वासनम् **इत्येके** (५.१.५)

उपस्थापिता ब्रूयाद् **इत्येके** (५.१.६)

आमुष्यायण इति त्रिप्रवरमेके ब्रुवते (५.१.७)

अदितिमिष्ट्वा 'मरुतो यद्धवो दिव:' इति मारुती **इत्येके** (५.२.२)

कृष्णाजिनस्तरणमात्रमध्वर्युरेव **इत्येके** (५.३.३)

विमुच्यैवापरेण सोमवाहनमतिगमयेद् **इत्येके** (५.३.३)

तेनागत्येक्षोर् **इत्येके** (५.३.४)

शाकलानीध्मकाष्ठानि **इत्येके** (५.३.४)

पञ्च एव मुष्टयो न तूष्णीक **इत्येके** (५.३.४)

मन्त्रेण राजानं प्रपादयेद् **इत्येके** (५.३.४)

विकृतिविषयावेताव् **इत्येके** (५.३.५)
प्रस्तरेणैवोपसन्नह्य निदधाति **इत्येके** (५.३.५)
प्रयाजविकारास्ता वाचनिकोऽत्राघार **इत्येके** (५.४.१)
अथाध्वर्युर्वा तन्त्रं सर्वं कुर्याद् **इत्येके** (५.४.१)
अथाध्वर्युणैव निरुप्तस्याधिश्रयणमात्रमग्नीत् कुर्याद् **इत्येके** (५.४.२)
यथाप्रकृति **इत्येके** (५.४.२)
द्वाव् **इत्येके** (५.४.२)
उपांशुयाजनपक्षे एके सादयन्ति (५.४.२)
संसृज्यान्त्यायां प्रतिपादयेद् **इत्येके** (५.४.३)
तूष्णीम् **इत्येके** (५.४.३)
'पृथिवीजन्मनाऽज्यस्थालीनाम्ना' **इत्येके** (५.४.३)
प्रक्रमा एव **इत्येके** (५.४.३)
त्रीवेद्यन्तादपरतोऽर्धप्रक्रममवशिष्योत्तरवेदिं मिमीत **इत्येके** (५.४.५)
निरन्तरमेव दशकम् **इत्येके** (५.४.५)
निरन्तरमेव दशकव्यासम् **इत्येके** (५.४.५)
प्रदर्शनार्थयजुरादिवचनम् **इत्येके** (५.४.६)
प्राकृतोऽयं प्रैषखण्ड **इत्येके** (५.४.७)
तथोत्तरस्य हविर्धानस्य कुर्याद् **इत्येके** (५.५.१)
विमित एव विमितायामायतनप्रदेशाभ्यामधिकविस्ताराणि छर्दींषि कृत्वा तैरेव कुर्याद् **इत्येके** (५.५.१)
वर्त्मन्यां वर्त्मनि जुह्वच्चक्रमभिजुहुयाद् **इत्येके** (५.५.१)
तथा यूपार्थमनियम **इत्येके** (५.५.२)
नवच्छदीत्यादीनामन्यतमं क्रत्वर्थमपि **इत्येके** (५.५.२)
एकैकम् **इत्येके** (५.५.३)
आग्नीध्रियो धिष्णियो मध्ये आग्नीध्रागारस्य मध्याद्दक्षिणतो-ऽरत्निमात्र **इत्येके** (५.५.४)
सपिण्डा **इत्येके** (५.६.१)

हविरासादनस्थानं च वर्जयित्व **इत्येके** (५.६.२)
प्राकृतमधिश्रयणमात्रमग्नीत् कुर्याद् **इत्येके** (५.६.२)
प्राक्तने एव प्रस्तरतिरश्ची **इत्येके** (५.६.२)
अग्नीद् **इत्येके** (५.६.२)
स्वयमेव मन्त्रं ब्रुवन्नञ्जलिमात्रेण दम्पती उपस्थापयति **इत्येके** (५.६.३)
वसतीवर्य आज्येभ्योऽभ्यन्तरा **इत्येके** (५.६.४)
अध्वर्यवे राजानमित्येतत् कुर्याद् **इत्येके** (५.६.४)
दक्षिणेनोत्तरवेद्या **इत्येके** (५.६.५)
यजमानः प्रपादयेद् **इत्येके** (५.६.५)
'स्वाहोरोरन्तरिक्षात्' इति कनिष्ठिके **इत्येके** (५.६.५)
क्रीते राजनि प्राक् प्रवणात् प्रोह्य **इत्येके** (५.६.५)
अनित्याव् **इत्येके** (५.७.१)
अध्वर्युरेवानुदिशति **इत्येके** (५.८.१)
आधवनीयपूतभृतोर्योगः पात्रयागकाल **इत्येके** (५.८.१)
प्रातरेवोद्वास्य प्रवर्ग्यं प्रागाहवनीयस्य प्रणयनाच्छाखाहरणे वत्सापाकरणं च **इत्येके** (५.८.२)
बर्हिः संभरेत पूर्ववद् **इत्येके** (५.८.२)
वेदिकरणाभिमन्त्रणपरिस्तरणानि त्वग्नीत्कुर्याद् **इत्येके** (५.८.२)
पुरोडाशेडान्ते वाजिनेन चरेद् **इत्येके** (५.८.२)
ब्रह्मसदस्यन्ते ब्रह्मसदस्ययोरेवैष जप **इत्येके** (६.१.१)
फलकयोश्चर्म चर्मणि ग्राव्णो ग्रावसु राजानम् **इत्येके** (६.१.२)
माहेन्द्रस्य स्तोत्रे तार्तीयसवनीयान् **इत्येके** (६.१.२)
प्राशित्रहरणं पिष्टोद्वपनीं च प्रणीताप्रणयनं चैकेषाम् (६.१.३)
अथ हविष्कृदाह्वानाद् यवानवहन्याद् **इत्येके** (६.१.३)
पिष्टयवागूर् **इत्येके** (६.१.३)
प्रथममर्थलुप्तमन्त्रेण आलोडनं कुर्याद् **इत्येके** (६.१.४)
महावेद्याम् **इत्येके** (६.१.४)
सन्तर्पणं कलशात् निग्राभ्या **इत्येके** (६.१.५)

चत्वारोऽभिषोतार **इत्येके** (६.२.१)
उन्नेता कलशाद् **इत्येके** (६.२.१)
मनसेत्युपांशुत्वे पत्नीसंमनसैव **इत्येके** (६.२.१)
विप्रुड्ढोमेऽनुचरी **इत्येके** (६.२.३)
तद्व्याघारणमाग्नीध्रीयं होत्रीयं मार्जालीयं च नाभिजुहुयाद् **इत्येके** (६.२.४)
'इदम्' स्थाने प्राणादीन् निदध्यात्, 'इदम्' इत्येव **इत्येके** (६.२.५)
अनासिच्य **इत्येके** (६.२.५)
यावदुक्तम् **इत्येके** (६.२.५)
पशुभ्य **इत्येके** यथा अपां पशूनुन्मृजे इति (६.२.५)
ग्रहावकाशचरणं याजमानम् **इत्येके** (६.२.५)
अध्वर्युः प्रतिप्रस्थाता उभावपि द्वे द्वे **इत्येके** (६.२.६)
अध्वर्युर्यजमानश्च पूर्वया द्वारा प्रतिपद्येते **इत्येके** (६.३.१)
दशापवित्रेण परिमार्गो हिरण्यशल्कश्रयणं च प्रतिग्रहेषु **इत्येके** (६.३.२)
अध्वर्युरेव मन्त्रेण निष्क्रामति **इत्येके** (६.३.२)
द्वितीय **इत्येके** (६.३.२)

(ix) Besides giving the views of other ritualists by using the phrases इत्यन्ये, इत्यपरे and इत्येके in matter of ritualistic controversies, Ācārya Śivaśroṇa also gives the views of Vādhūlaka by using respectful phrases like आचार्याभिप्रेतः (५.२.२), आचार्याभिहितम् (५.१.५); आचार्येणेष्टम् (१.२.१; ६.१.६) and कल्पकाराभिप्रायः (५.८.१; २). If some views expressed by other *ācāryas* seem to go against the view of Ācārya Vādhūlaka, he expressly states नाचार्याभिप्रायः, नाभिप्रेतं वा इदमाचार्यस्य (२.३.४).

(x) At many places, Śivaśroṇa appears as giving his own judgement by using the terms ज्यायः, ज्याय इव, ज्यायान्,

ज्यायान् इव–

**ज्यायः** — एतदेव ज्यायः (१.३.२); अन्वासङ्ग एव ज्यायः (३.४.१); तदेव ज्यायः (३.४.१; ४.३.३; ४.२; ५.६.४; ६.१.२), एतदेव ज्यायः (३.४.४; ५.२; ५.४.७); परिहरणमेव ज्यायः (४.३.२); नवकं तु ज्यायः (५.३.५); स्नाननियम इति ज्यायः (५.६.१); अध्वर्युरिति ज्यायः (५.६.२); परिवाप इति ज्यायः न पिष्ट यवागूः (६.१.३); कलशादिति ज्यायः (६.१.५); पूर्वोक्तमेव ज्यायः (६.२.१); उन्नेतैवेति ज्यायः (६.२.१), प्राणमित्येव ज्यायः (६.२.५); यथापाठमिति ज्यायः (६.२.५); उभावपीति ज्यायः (६.३.२)।

**ज्यायान्** — सन्नाम एव ज्यायान् (३.२.४); तन्त्रमेव ज्यायान् (३.२.५); भाव एव ज्यायान् (३.३.२); पूर्वतनपक्षो ज्यायान् (३.४.१); द्वे इति ज्यायान् (३.४.२); अविकार एव ज्यायान् (४.४.२); स एव पक्षो ज्यायान् (५.१.७)।

**ज्यायइव** — ज्याय इवाभाति (४.१.२)।

—o—

॥ श्रीः ॥

# [१]आचार्य-शिवश्रोणकृता वाधूलशाखीया

# श्रौतप्रयोगक्लृप्तिः

## ॥ अथ प्रथमः प्रपाठकः ॥

## [ प्रस्तावना[१] ]

आपस्तम्बः प्रशिष्योऽभूद्यस्य वाधूलकस्य तु।
अग्निवेश्यगुरुः सोऽयमृषिरस्मानिहावतु[२] ॥ १ ॥
स्थित्युत्पत्तिलया भवन्ति जगतो यस्येच्छया सर्वदा
यद्रूपं ह्यभवच्चराचरमिदं यश्चापि सर्वालयम्।
यस्माद् यान्ति परां गतिं पटुधियो[३] [मोक्षात्मिकां] दुर्लभाम्,
सोऽस्मासु प्रतिपत्तिमर्थवचसोः[४] प्रज्ञां च दिश्यात् प्रभुः ॥ २ ॥

कल्पसूत्रकाराणां वीतकल्मषाणां विदिततवेदितव्यानां वेदार्थान् प्रति [सं-][५]शेरते मतयः, किमङ्ग पुनरलक्षधियां मादृशाम्। अतोऽस्मद्विधैः प्रयोगक्लृप्तिरेकान्ततो निश्चेतुमशक्या। तथा तु मा व्यवहारोच्छित्तिरिति वाधूलकाचार्यसन्दर्भं नमस्कृत्य यथामत्याधानादीनां[६] प्रयोगक्लृप्तिर्वक्ष्यते, न तु ज्ञानाभिमानेन। अतो नास्माकमपराधः।

अभिहितोऽपि[७] प्रयोगो नास्माभिरेकान्ततो निश्चीयते। अतः पुनरपि सद्भिः सम्यग् विचार्यानुष्ठेयम्। [८]मन्त्रब्राह्मणसमानतन्त्रचरतन्त्रन्यायशास्त्रग्रन्थादिष्वभिहितानि अविशेषाद्, [९]यथाबुद्ध्यस्माभिरुपसंह्रियन्ते। तत इदानीं प्रयोगक्लृप्तिः प्रस्तूयते॥

---

१-१. Not given in MSS. Ad, however, gives the title of the text by some later hand as श्रौतप्रयोगक्लृप्तिः. २. M °हाचतुं, Ad °हावतुं. ३. M Ad broken between धियो and दुर्लभाम्. B does not show sign of broken text. ४. M °मर्थ प्रति पत्ति पत्तिमर्थचमसोः, °चमसोः has been corrected by later hand as (वच) सोः, Ad प्रतिपत्तिमर्थचम(वच)सोः. ५. M Ad B om. ६. M Ad B °धना°. ७. M °हितो वि, but वि corrected as पि, Ad °हितोऽपि वि. ८. M °चरत्तन्त्र. ९. M Ad °ध्य°.

# [1] ॥ अथ अग्न्याधेयम् ॥

## अथ प्रथमोऽनुवाकः[1]

अग्नीन् आधास्यमानः[2] प्रायश्चित्तादिभिः पूर्वमेव वीतकल्मषमात्मानं कुर्वीत। येनास्य विरोधः केनचित् कारणेन तेन चाविरोधम् आपादयेद् येनकेन-चिदभ्युपायेन। यान्यृणान्युत्तमर्णत्वनिमित्तेनावस्थितानि[3], तानि च तस्मै दद्याद्, अनुज्ञापयीत वा। याश्चाग्न्याधेयदक्षिणा एका देया इत्येवमाद्याः, उपबर्हणं ददातीत्येवमाद्याश्च, यथासंभवं केनचिद्विकल्पेनोपकल्पनीयाः। ऋत्विजश्चोद्-गातृपञ्चमा उद्गात्रका[4] वा, चत्वारो वरणाय अवस्थापयितव्याः। अन्न-दानार्थानि साधनानि यथाशक्त्युपकल्प्य तस्याग्न्याधेयस्य[5] सुभिक्षतार्थैः[6] सुभिक्षताश्चाग्न्याधेयस्य कर्त्तव्याः[7]। अथेयमन्नदक्षिणा[8] इत्याग्रयणादीनां भूयिष्ठान्नदानमभिहितम्। भूयिष्ठदानाद्धि सुभिक्षता भवन्ति। अथ दानात् पुनरस्य उपबर्हणं ददातीति प्रतिपुरुषं विहिता॥ [ १ ]

आ द्वादशं[9] ददातीति च सर्वेषाम् अस्मिन्नेव ब्राह्मणे विहिता। शाखान्तर आम्नाता एका देया[10], तिस्रो देया इत्युपक्रम्यापरिमितं देयमिति विकल्पा बहवः सन्ति। तेषु च सत्स्वपि भूयिष्ठान्नदानमभिहितम्। कल्पकारेणाप्येतद-भिहितम्—अद्योपवसथ इत्यन्नमेव कुर्वीत, अपि ह गां पचेद् ( वाधूश्रौ. १.१.७-८ ) इति। उपवसथो नाम याजमानीयेऽहनि प्रधानकर्म क्रियते, ततः पूर्वेद्युरुच्यते। यथा दर्शपूर्णमासयोर्यस्मिन् देवता यथा च सोमस्य यस्मिन्नैन्द्र आलभ्यते पशुः, एवमेवान्यत्रापि पूर्वेद्युरभिधीयत उपवसथशब्देन। अस्मिन् अन्नदाने श्रद्धायुक्तः स्यात्। मांसमप्यत्र कुर्वीत, गौरप्यालब्धव्या। आधास्यमानस्येच्छा[11] यदि संजायेत [तदैव][12] संभवोऽन्यथा हिंसाया दोष आशङ्क्येत। एवं त्रिचतुरः पराध्र्येषु मासेषु।[13] [14][शमीगर्भा]रण्योश्चोपादानं कर्तव्यम् अग्न्युत्पत्तिसामर्थ्याय। शमीगर्भाभावे यस्य कस्यचिदश्वत्थस्योष्मणि यदश्व [. . . .][14] अशुभाभावार्थं कतिपयेषु दिवसेषु सकलं यथाकथञ्चिदादाय काले च मन्त्रेण [. . . .][15] शालार्थे विविक्ते प्रदेशे शौचवत्तरे [. . .][16] मवका [. . . .][17] वन्तं कारयेत्।

---

१-१. M Ad B not mentioned. २. Ad B °मान. ३. M Ad B °निर्मलत्वेना°. ४. M Ad B उद्गातृका. ५. M Ad B तस्याधेयस्य. ६. M Ad B भिक्षि. ७. M Ad B कर्तव्यः. ८. M Ad अथेम°, B अथेमं नद°. ९. M Ad द्वादशेभ्यो, B द्वादशे. १०. B देयाः. ११. M Ad B आधस्य°. १२. M Ad B broken. १३. M Ad B मांसेषु. १४. M Ad B broken. १५. M Ad B broken. १६. M Ad B broken. १७. M Ad B broken.

**पूर्वमेव द्वारे दक्षिणा** [. . . .][१] **तां, अथ यथावर्णं वसन्तादिषु यदा**[२] **श्रद्धावित्ते**[३] **स्याताम्**[४], **तां रोहिण्यादिषु नक्षत्रेषु पर्वणि वा वाक्यशुक्लशुद्धवाससौ दम्पती शुचौ देशे दर्भेष्वासीनौ प्राङ्मुखौ शुद्धान्तःकरणौ भूत्वा तद्गतमानसौ**[४] **प्राणायामत्रयं कृत्वा** या पुरस्तात् प्र स्रवन्ती **इति श्रद्धामाहूय** आकूत्यै त्वा, कामाय त्वा **इत्येवमादिभिस्तिसृभिः** आकूतिं देवीम् [५]**इत्याकूत्यायावेदनं कृत्वा येनकेनचिद्विधानेन चतुरो वा महर्त्विजो वृणीयाताम्। ब्रह्मवरणे ह्येवाग्नीध्रो**[६] **वृतो भवति। उद्गातुरभावे त्रीनेव॥** [२]

**तत्र प्रार्थनामन्त्रं वा लौकिकं कृत्वाऽर्हयेत्। सोमाधान एव विधानेन वरणमिति केचित्। निदेशविहितैरेव**[७] **मन्त्रैर्वृणीयात्**[८]**। तथेति प्रतिब्रूयुः। अश्वमेधे वा द्रष्टव्यः** त्वं मेऽध्वर्युरसि **इत्येवमादिभिः। सर्वेषु पक्षेषु वरणस्य**[९] **पुरस्तादुपरिष्टाद्वा मधुपर्कदर्शनं येनकेनचिद्विधानेन। तत उपव्याहरणमृत्विजां सकाशे। करिष्यमाणस्य कर्मणो व्याहरणं सङ्कीर्तनम्। तेषां वृतानामर्घ्यादिभिराराधितानां**[१०] **सन्निधौ**[११] **दर्भेषु प्राङ्मुख उपविश्य मनसा**[१२] **संकल्पयेत्** अग्नीनाधास्ये[१३] **( वाधूश्रौ १५.५.१ ) इति। अथ तदेव वाचा व्याहरेत्। तेषां च यथार्थं प्रतिवचनम्। अनुज्ञानादिकं वा स्यात् प्रतिवचनम्। अथवा तेषामेव सन्निधौ तथैवोपविश्य** सर्वकामोऽग्नीनाधास्ये[१४] **( वाधूश्रौ १५.५.२ ) (इति)**[१५] **मनसा त्रिः संकल्प्य तदेव वाचा त्रिर्व्याहरेत्। ते च प्रतिब्रूयुः**-तत्ते ऋध्यताम्, तत्ते संवर्धतां कामः **( वाधूश्रौ. १५.५.१८ ) इति। अथ पूर्वमेव कृतमायतनमग्न्यगारं**[१६], **विमितं वा दक्षिणया द्वारा प्रपद्यौदुम्बरीं च वैकङ्कतीं च शाखे आदाय तासां पश्चादा** [. . . .][१७] **निति** अपेत[१८] **इति मन्त्रान्ते** लोकमस्मै देवदत्ताय **इति यजमानस्य नाम गृह्णाति। प्राचीनावीतीत्युदजेदिति**[१९] [. . . .][२०] **उत्करे** [२१]**शाखे उदस्य**[२१] **स्फ्यमादाय समस्तमग्न्यगारं प्रागपवर्गमुद्धन्ति** उद्धन्यमानम् **इति। समस्तमेवाग्न्यगारं प्रोक्षति** शन्नो देवी **इति॥** [३]

---

१. M Ad B broken. २. Ad यथा. ३. Ad वित्ते. ४. M Ad °मासनौ. ५. M Ad B broken. ६. M Ad B हैवाग्नेध्र्यै. ७. M Ad B °तैरल°. ८. M Ad om यात्. ९. M Ad B वरस्य. १०. M. Ad B °वृता नारर्घ्या°. ११. M Ad B सन्निभौ. १२. M Ad B मानसा. १३. M °ग्नीनाधानस्य. Ad . °ग्निनाधानस्य. १४. M Ad B °ग्नीनाधानस्य. १५. M Ad B om. १६. M. Ad B कृतं यतनम°. १७. M Ad B broken. १८. M B नित्यये°; Ad नित्युपे. १९. M B °वीतिप्युद°. Ad °वीतीप्युद°. २०. M Ad B broken. २१-२१. M शाखेऽप्यु°, Ad B शाखेप्यु°.

अथ स्फ्यमादाय गार्हपत्यस्यायतनं प्रदक्षिणं परिलिखति। ततः पुरस्ताद् ब्राह्मणस्यैकादशसु, राजन्यस्य द्वादशसु, वैश्यस्य चतुर्विंशत्यामपरिमिते चक्षुर्निमित आधेयः इति। वि[मित][१]स्त्रिभागोऽनेनान्तरालबहुना[२] समचतुरश्रं किञ्चिदाहवनीयादपरं तस्य च [. . . .][३] श्रोण्यामन्वाहार्यपचनस्यायतनं कल्पयेत् यथा श्रप्यमाणानि हवींषि संभवे[युः। परिमण्डलाकारं बृ][४]हद्गार्हपत्यस्यायतनम्, अर्धचन्द्राकृतिर्वा यथावकाशमन्वाहार्यपचनस्य, बाहुमात्रं समचतुरश्रमाहवनीयस्यापरिमितावकाशं वा यथार्थम्। यथार्थान्यवकाशान्येव[५] वा सर्वाणि चतुरश्राणि, सर्वाणि वा परिमण्डलानि। वेदिं च यजमानमात्रीम्। आहवनीयादेवापरतो मित्वा तस्यास्त्रिभागेन[६] मित्वा पश्चाद्बाहुं तस्या एवार्धं [७]पुरस्ताद्बाहुं मित्वा दक्षिणबाहुं[७] मित्वा दक्षिणबाहुद्विगुणां[८] रज्जुमुभयतःपाशां कृत्वा मध्ये लक्षणं करोति। दक्षिणबाहुमुभयतः शङ्कुं निहत्य शङ्कुद्वयेन पाशं प्रतिमुच्य लक्षणेन दक्षिणापायम्य लक्षणेन शङ्कुं निहत्य तस्मिन् पाशद्वयं प्रतिमुच्य लक्षणेन [९]श्रोण्याद् द्वावंसौ[९] दक्षिणं पार्श्वं परिलिखित्। एवं सा बाहुद्विगुणेनापरत एवमुत्तरत एवं सर्वत्र सन्नता वेदिर्भवति। ततो वेदेः[१०] परतोऽवशिष्टो विषयः पात्रसादनाद्यर्थो भवति। अथ गार्हपत्यस्यायतनं पुनरुद्धत्यावोक्षति। ता[११] निवपति वैश्वानर्यै रूपम् इति। तच्छर्कराः[१२] परिमिनुयात्। सिकता व्यूह्य तासामुपर्यूषान् निवपन् यददश्चन्द्रमसि कृष्णं तदिहास्तु इति चान्द्रमसं लक्ष्यं ध्यायेत्। यदिदं[१३] दिव इति निवपन् मन्त्रान्ते निवपनमात्रेण तदायतनं दध्ना मधुमिश्रेण परिप्लाव्य दर्भैः परिप्लावयेत्॥ [४]

एवमेवान्वाहार्यपचनस्यायतन उद्धननादि करोति। एवमाहवनीय-[स्यायतने][१४] यजमानो वा पूर्वोपात्ताननूपात्तपूर्वान्[१५] वा सन्निधावेव सते [१६]संभर्तुकामः सर्पिषा पाणी[१६] अभ्यज्य गत्वा संभरेत्। प्रजासृष्टानाम् इति सूदं पंकमनुपदासात् ह्रदात्; यस्य रूपं बिभ्रद् इत्यारण्येन वराहेण विहतां वपाम्; यत्पर्यपश्यत् इति पुष्करपर्णान्[१७] मन्त्रेण संभरेत्। इतरेषां पार्थिवानां त्रिः सकृत् सकृत् मन्त्रेण। याभिरदृंहज्जगत इति शर्कराः; अग्ने रेतः इति हिरण्यशल्कांश्च

१. M Ad B broken. २. M Ad B °नाग्न्यराळ°. ३. M Ad B broken. ४. M Ad B broken. ५. M Ad B °थार्थान्याव°. ६. M Ad B °भागो नमित्वा. ७. M Ad B °बाहु. ८. M Ad B °र्द्विगु° ९-९. M Ad B श्रोण्याद्यासौ. १०. M Ad B वेदः. ११. M Ad B का. १२. M Ad °कराभः, B. °कराय:. १३. M Ad B om °दं. १४. M. Ad B broken. १५. M Ad B °पात्तपूर्ववान्. १६-१६. M B संभर्तुकाम सर्पितापाणी, Ad संभर्तुकामसमर्पिता पाणी. १७. M Ad B add इति.

शतमानं च; अश्वो रूपम् इत्याश्वत्थम्[१]; ऊर्जा पृथिव्या इत्यौदुम्बरम्; गायत्रिया[२] ह्रियमाणस्य, देवानां ब्रह्मवादम् इति शम्याः पलाशम्; यया ते सृष्टस्य इति शमीम्; यत्ते सृष्टस्य इति वैकङ्कतम्; यत्ते तान्तस्य इत्यशनिहतम्; चित्रियादश्वत्थात् इति ब्रह्मौदनसमिधस्तिस्रः, इतरा सप्तदश; अश्वत्थाद्ध-व्यवाहाद्, यो अश्वत्थ इति द्वाभ्यामरणी आहृत्याग्न्यगारस्योत्तरपूर्वस्मिन् प्रदेशे तमभिनवं प्रक्षालितं घृताक्तं निधाय तस्मिन्नेतान् संभारान् सादयति सहैव यं त्वा समभरं जातवेदः इति। अथास्य सतस्यापरेणोदपात्रं भगवते जातवेदसे पाद्यत्वेन सङ्कल्प्य तत्रैवान्यदुदपात्रं निनीय अर्हणीयम् इति॥ [५]

अथास्यैव समीपे किञ्चिदाप्यं प्रियमर्घत्वेन सङ्कल्प्य कस्मैचिद् ब्राह्मणाय दत्त्वा स्वयमेव केशश्मश्रू वपते वपे प्रवपे देवेन सवित्रा प्रसूतो ब्रह्मणा शंसितोऽहं[३] यानि म इत ऊर्ध्वं लोमानि ते[४] सन्तु इति। [५]नखानि निकृत्य दतो[६] धावते। अथैनमद्भिस्तीर्थोदभिः[७] स्नानविधिना स्नापयित्वा नवनीतेन तूष्णीमभ्यज्य तूष्णीमेव सद्यः पिष्टेनाञ्जनेन सतूलया शरेषीकया आञ्ज्य देवयजनं प्रपाद्य परिमितैर्दर्भैः पुञ्जीलैस्तूष्णीमेव वपयति। अथै[नम्][८] [९]एताभिरसृजमथैनमा-चमय्याथैनं मार्जयति पवमानः सुवर्जन इत्यान्तमेतेनानुवाकेन। अथोदपात्रमा-दायोभावुपनिष्क्रमय्य[१०] चतुष्पथ उदपात्रं प्रतिष्ठाप्य तत्रावेक्ष्यमाणमाधास्यमानं पाप्मनो [११]विनिधयः। ततो[११] गवालम्भमातिथ्यार्थं कुर्याद्यदीच्छेद् यजमानः। ब्रह्मौदनाग्निं ब्राह्मणस्य सोमयाजिनो गृहादाहरेद् ब्रह्मवर्चसकामः; राजन्य-स्यात्मीयमण्डलं प्रत्यभिषिक्तस्य गृहादिन्द्रियकामः; वैश्यस्य धनधान्यसमृद्धस्य गृहात्पुष्टिकामः। सकाम्यं [१२][तं गृ]हे पुरस्तादा[दाय][१३] पत्नीं गृहे पचनाग्नि-कार्ये विनियुज्योपादद्यात्। अकामतस्तु पुनरात्मीयादेव गृहात्पचनाग्नेर्व्याहृतिभि-र्गृह्णीयात्। सकामश्चाकामश्चाग्निं परिचरेद् अनेन विधानेन। दिवि जाता इति मार्जयित्वाऽग्निमुपसमाधाय अदितेऽनुमन्यस्व इत्येतैः परिषिच्य व्याहृतिभिर्व्य-स्ताभिः समस्ताभिश्चतस्रः समिधोऽभ्याधाय ममाग्ने इत्यनुवाकेनोपस्थाय अदितेऽनुमंस्था इत्येतैः परिषिच्य दिवि जाता इति मार्जयेत्। तदमात्यपरिचरणं नाम॥ [६]

---

१. M Ad B °त्थः. २. M B °त्रीया. ३. M Ad B शंसिहोतोऽहं. ४. M Ad B त. ५. M Ad B अनखा°. ६. M Ad B ततो. ७. M Ad B तीर्थोनदद्यौ. ८. M Ad B broken. ९. M °रसृच°. १०. M Ad B वुनिष्ठुमय्य. ११-११. M Ad °धं पतेत. B °धं...त. १२. M Ad B broken. १३. M Ad B broken.

अथामात्यहोमं जुहोत्यापूर्विकेण विधानेन। वाससा प्रतिच्छाद्य समन्वारब्धेष्वपि व्रतेषु यद्देवा देवहेडनम् इति कल्प आम्नातेनानुवाकेन। अनुवित्तिहोमायाज्यमतिशिनष्टि। तमग्निमन्वाहार्यपचनस्य स्थाने निधाय तत्र पितृभ्यो ददाति अद्याग्न्याधेयस्योपवसथ इत्युक्तेन विधानेन। अथवा तमग्निं समस्तमुद्धृत्यान्वाहार्यपचनस्योद्धते निधाय पिण्डपितृयज्ञं कृत्वा ततस्तस्मिन्नग्नाविध्ममादीप्य सादयित्वौपवसथिकया[1] गवा पुनः पितृभ्यो ददाति। पिण्डपितृयज्ञयोर्विकल्प इत्यपरे। तत अमात्यहोमशेषेणाज्येनानुवित्तिहोमं जुहोती-त्युक्तेन विधानेन। उभयोरग्न्योरनुवित्तिहोमं हुत्वाऽऽहवनीये हुतामाहुतिं शूर्पादिना प्रतिच्छाद्य प्रत्यग्गत्वाऽमात्याग्निं सते समुप्य गार्हपत्यस्योद्धत अमात्याग्निं न्युप्याहृत्याधिवृक्षसूर्येऽस्तमनवेलायां ब्रह्मौदनाय प्रक्रमेत्। उद्धृतमग्निमुपसमाधाय परिसमूह्य पर्युक्ष्य परिस्तीर्य उत्तरतो बर्हिरुपस्तीर्य द्वन्द्वं पात्राणि सादयति। तत्र स्थालीं दर्वीं चोद्धरणसमर्थां च सतं निर्वपणसमर्थं प्रोक्षणीपात्रमुलूखलमुसले पात्रीं च कंसादिमयीं स्रुवमाज्यस्थालीं च व्रीहींश्च शूर्पं च रोहितं चर्मानुडुहं च द्वौ हिरण्यशल्कौ मन्त्रवन्तौ, मन्त्रवतीश्च तिस्रः समिध इति। तूष्णीं प्रोक्षणीः संस्कृत्य तूष्णीमेव तानि प्रोक्ष्य चतुरश्चमसान्निर्वपेत्। तत् सुशृतं कृत्वाऽङ्गारेष्वेवावस्थिताया अनुद्वासिताया स्थाल्या बिलमवघार्याज्यं[2] संस्कृत्य स्रुवं संमृज्य दर्वीं च पात्रीं प्रक्षाल्य तस्यामुपस्तीर्य[3] हिरण्यशल्कमवधाय दर्व्यामुपस्तीर्य तथैवौदनमुपहत्याभिघार्य पात्रियामवधाय। एवमेवापरे॥ [७]

द्वे दर्व्यावुद्धृत्य ततो नियमेन यथाकाममुद्धृत्य व्यूह्य हिरण्यशल्कं प्रास्य बह्वाज्यमुपसिञ्चति। अथ ब्रह्मौदनुमुपतिष्ठते प्रवेधसे इति। तं ब्रह्मौदनं चत्वार आर्षेयाः सप्राशाः[4] प्राश्नन्ति। ब्रह्मौदनं प्रतिशिष्य तान् पादावाधास्यमान एव प्रक्षालयेत्। एते ब्रह्मौदनं पर्युपविश्य प्राश्नीयुः। ब्रह्मन् हुतमसि, ब्राह्मणान् भोजयत, अश्वं गोपायत, संभारान् संनिधत्त इत्येवमादि सम्यक् शिष्टया[5] पुत्रादौ प्रिये समत्वे सर्वमपश्यम्। कर्मापरिसमाप्तेरासजति। अथाध्वर्युः शयनकाले यजमानस्यारणी प्रयच्छति ऋत्वियवती स्थ इति। अग्निग्रहणं यजमानः करोति। अग्निग्रहणप्रभृत्याभिमन्त्रणादध्वर्युः। अरण्योरात्मानमभिनिवर्तनं याजमानमिति केचित्। ऊर्ध्वं याजमानमाहिरण्यप्रासनात्। अध्वर्युर्यजमानस्याञ्जलावादधाति। आधानमन्त्रं जपति। यजमानः स्वयमेवाभ्युपायेनाञ्जलावाधत्ते। भूर्भुवोऽमीषाम् इत्याधानमन्त्रः[6]। अञ्जलिस्थमेवाभिप्राप्य ततस्तूष्णीमेवायतने सादयति।

---

१. M Ad B °यित्वोप°. २. M Ad B विलन्नांगार्हाज्य. ३-३. M Ad B प्रक्षातस्यामुप°. ४. M Ad B शूपांसः. ५. M Ad B शिष्ट्या. ६. M Ad B °मिद्याधान°.

**प्राशनवाचने आध्वर्यवे उपस्थानद्वयं याजमानम्।** अहं त्वदस्मि **इत्याध्वर्यवम् इति केचित्॥** [८]

**अथाग्निमुपसमाधाय परिसमूह्य पर्युक्ष्य परिस्तीर्याहुतिषाहं कृत्वा जुहोति। उपस्थानमेवासति गाने। साम्न्यसति योनिभिः। सति च गाने साम्नां योनिभिर्वोपस्थानमित्यपरे। एवं सर्वत्र सर्वोपस्थानानि याजमानानि असति विशेष इत्यागमः। साममन्त्रं सर्वे ब्रूयुः।** निवपान्वाहार्यपचनस्य संभारान् **इति प्रैषः। प्रैषावुभावाध्वर्यवौ, वचनाद्ध्येतत् कौण्डिन्यानाम्। यथा** प्रशास्तर्यज **इत्येके। अग्निनिवपनं तूष्णीकं याजमानं**[1] **च। विषुवति हिरण्यशल्कं सादयति अध्वर्युः, उपतिष्ठते**[2] **यजमानः। वामदेव्यं च सर्वेषाम्। उद्गात्रा आमहीयवेन**[3] **वामदेव्येन सहातिप्रयन्ति।** सूर्यमग्निमादधे, यास्ते अग्ने शिवास्तनुवस्ताभिस्त्वामादधे **इति केचिद् यजुः समापयन्ति॥** [९] इति प्रथमोऽनुवाकः॥[4]

## अथ द्वितीयोऽनुवाकः[5]

**सर्वत्रादौ**[6] **होमपरिसमूहनपर्युक्षणपरिस्तरणोपसमाधानालंकरणानि स्युरित्यागमः। गार्हस्थ्याश्रमप्रभृति सभ्यावसथीययोः सभागृहेऽग्निशालायां नित्यमाचार्येणेष्टं धारणम्।** नर्य प्रजां मे गोपाय **इत्येताभिरुपतिष्ठेत। प्रतीकग्रहणान्येतानीति**[7] **केचित्। श्रूयमाणैरेवोपतिष्ठेत। न प्रतीकग्रहणमित्यपरे। तूष्णीमग्निहोत्रे सर्वं कर्म मन्त्रवर्जं करोति। प्रतीचीं स्रुचमुन्मृज्य**[8] **प्राचीं चोन्मृज्य प्राञ्चं हस्तं कूर्चे निमृज्य प्रत्यञ्चं निमृज्यात्। उपस्थानं चोक्तेन विधानेन करोति॥** [१] इति द्वितीयोऽनुवाकः[9]॥

## अथ तृतीयोऽनुवाकः

**पवमानेष्टिष्वद्य** यज्ञाय रमताम् **इति पवमानेष्टिर्हविरिति। येषा**[10] **पवमानेष्टिकमित्यपरे।** उत्तरस्या **अप्येवमेव। द्वयोरप्याग्न्याधेयिकमित्यन्ये**[11]**। निरुप्तेषु**[12] **तेषु हविःषु** अग्निं होतारम् **इति वाचयित्वा प्राणग्रहांश्च पृश्नींश्च व्याचष्टेऽध्वर्युः। प्राणग्रहाः प्राणभृन्मन्त्राः,** अयं पुरो भुवः **इत्येवमाद्याः। पृश्नयो** वायुरसि

---

१. M Ad B यज॰. २. Ad ॰तिष्ठने. ३. M Ad B वाहीयमानेन ४. M B इति शिवश्रोणस्य प्रयोगसन्दर्भे प्रथमः; Ad इति शिवश्रोणस्य प्रयोगसन्दर्भे प्रथमः समाप्तः. ५. M Ad B अथ द्वितीयः. ६. M Ad B सर्वत्रादि॰. ७. M Ad B. ॰ग्रहणान्येतानिति. ८. Ad ॰मुन्मृन्मज्य. ९. M B इति द्वितीयः; Ad इति द्वितीयः समाप्तः. १०. M Ad B मेषामिति पव॰. ११. Ad ॰प्याग्नाधे . १२. M Ad B निरुष्टेस्तेषु.

प्राणो नाम इत्येवमाद्याः पञ्च समाः[१]। समासन्नेऽपानग्रहांश्च पृश्नींश्च हवींषि। यन्म अग्ने इत्यभिमृश्यापानग्रहांश्च व्याचष्टे। अपानभृन्मन्त्राः अपानग्रहाः। प्राचीदिशाम् इत्येवमाद्याः पृश्नयः[२]। ऋतस्य[३] त्वा व्योमने इति पञ्च चतुर्होतृस्थाने। दशहोतारं[४] ध्रुवायां व्याचष्टे। आज्यहविष्काणां त्रयाणां यागानां देवतोपांशुत्वात् अब्धिरसि इति चानुमन्त्रणमन्त्रः। त्रिरिडाया उपस्तृणानः[५] सकृदाज्यस्थाल्या उपस्तृणीते। द्विर्ध्रुवाया[६] अभि। पञ्चकृत्वोऽभिघारयं-श्चतुर्ध्रुवायाः, सकृदाज्यस्थाल्याः। वाचनिकत्वे सर्वमाज्यस्थाल्यां [७]हविरुद्वा-सनोत्तरमग्नीदुदपात्रेणोत्कर उपसीदति॥ [१]

दक्षिणां प्रतिग्रहीतुम्[८]। अत्राग्न्याधेयदक्षिणां केनचिद्विकल्पेन ददाति। एका वा गौर्देया सर्वेभ्यः, षट्, द्वादश वा, चतुर्विंशतिर्वा, शतं वा, सहस्रं वाऽ-परिमितं वा। उपबर्हणं ददातीत्येवमाद्या वा। उपबर्हणानि[९] दत्त्वाऽश्वं ब्रह्मणे दद्यात्। येनाग्न्यायतनमाक्रान्तं तमध्वर्यवे दत्त्वाऽन्यं ब्रह्मण इत्यपरे। एका देया इत्येवमादिविकल्पोपादाने निहिताग्नेरेतमाधानानन्तरम्। द्वादशाहं समिद्धा अजस्रा [१०]अग्नयो भवन्ति[१०]। उद्धरणपक्षे व्यतीते[११] द्वादशाहे पूर्वयोरग्न्यो-र्लौकिकत्वम्। कर्मणि चोद्धरणमाहवनीयस्य, आहरणमन्वाहार्यपचनस्य। अथवा उपसमेधपक्ष एवायं विधिः। एते द्वादशाहं समिद्धाः समिन्धनीयाः सार्वकालं त्रयोऽग्नयः। एधान् प्रक्षिप्य न छादनीयाः। उद्धरणोपसमेधपक्षयो-स्तुल्यो विकल्पः। आयुष्कामस्य गतश्रियश्च नियत उपसमेधपक्षः। उद्धरणाद्य-ग्निहोत्रार्थं समन्त्रकं, प्रायश्चित्तेऽनूद्यमाने मन्त्रेण वाचा त्वा होत्रा इति, इतरेषु कर्मसु तूष्णीमुद्धरणम्। दक्षिणाग्निस्त्वमात्यादाहार्यस्तूष्णीम्। उपसमेधपक्षे त्वाधातुमुद्धृत आहवनीयो नित्यो धार्यो नोत्स्रष्टव्यः। एवमाधातुमाहृतो दक्षिणाग्निः। तस्मिन् द्वादशाहे वर्तमानस्य व्रतमेतं नानृतं वदतीत्येवमादि। भक्ताशनं सकृदशनं, यथालाभमशनमित्यपरे। अग्निहोत्रोच्छिष्टव्रतत्वं सद्यो-निर्वापपक्षे। तच्च स्थाल्यामवशिष्टसंभवात्। शेषपक्षापेक्षमेतदुत्तरस्य पक्षान्तरत्वाय इत्यपरे। एतदेव ज्यायः। पक्षान्तरे च तूष्णीमग्निहोत्रशेषं निधायाप्याय्य व्रतयेदित्यपरे।[१२] द्वादशसु रात्रिष्वनु निर्वपेदित्यस्मिन् पक्षे [. . . .][१३] त्विष्टिषु[१४] य उत्तरो द्वादशाहस्तत्रैव ते नियमा इत्यन्ये॥ [२]

१. M Ad B समा. २. Ad प्रश्नयः. ३. Ad ऋतय. ४. M Ad B होतार. ५. M Ad B णाना. ६. M Ad B द्विध्रु°. ७. M Ad B हविरुद्यास°. ८. M Ad B °गृही°. ९. M Ad B °बर्हमानी दे:. १०-१०. M Ad B अथयो भवति. ११. M Ad B व्यतीति. १२. Ad B व्रतयैदि°. १३. M Ad B broken. १४. M Ad B स्विष्टि°.

तथा सति [१]सर्वदोपस्थानादिविधिना न त्वशक्यं, तत्रैतदग्निहोत्राभावो वर्तते। सोमाधानेऽस्य चरितार्थतोच्यते[२]। दर्शपूर्णमासारम्भनिमित्ता एते होमाः। इष्टिं च तत्र सकृदेव क्रियेरन्। सकृदारम्भाभावः [३][. . .] कस्य अन्वाधाना-[ख्यस्या][३]दः कर्मकलापस्योपलक्षणम्। भस्मोद्धरणस्य च तेषु संयोगात् प्रत्युपवसथं प्रवृद्धभस्मापनया औपवसथिकस्य व्यृद्धं प्रति तन्त्रतावचनात्, इतरेषु अश्मन्नूर्जम्[४] इति तु भेदेन कुर्वन्त्याम्नानभेदात्। बर्हिःसंहरणे परिदेश-नादुपगूह[त्यनुलोमं स ते माऽऽस्थात् इति। उर्वन्तरिक्षम][५]न्वित, देवगमं स्थ इति। रुद्राय गाम् इति तृणहस्ता मिथुनं गृह्णन्ति। अद्याग्नीषोमीयविकारश्चरुरूपात् शुचियाजविकारोऽन्त्य आग्नेयविकारः॥ ३॥ इति तृतीयोऽनुवाकः॥

## अथ चतुर्थोऽनुवाकः

### [ पुनराधेयम् ]

प्रसिद्धा आग्न्याधेयिकाः संभाराः। अथेतरे पुनर्निष्कृतो जीर्णः पुनः संस्कृतः, पुनरुत्स्यूतं [६]जीर्णं वासः[६] प्रोतं, पुनरुत्सृष्टोऽनड्वान्[७] जीर्णमुत्सृज्य पोषयित्वा कर्षणादिभिः पुनरपि जीर्णमुत्सृष्टः। प्रातराहुतिमपि यथोक्तं करोति। अत्रापि यस्य पदेऽग्निराहितस्तमध्वर्यवे दत्त्वा पुनरुत्सृष्टादीन् सर्वेभ्यो दद्यात्। परोप्तपुनराधेयं नाम। इयन्तं कालमग्नीनुत्सृज्याधास्यमिति यदाधानं तत् परोप्तपुनराधानम्। तस्यापि विधिर्यथोक्त एव। एतस्यां क्रियायां क्रियमाणायां तां दिशं न गच्छेत्। यदि गच्छेद् अन्यां दिशं प्रत्याऽस्तमयाद्[८] गच्छेत्[९]॥ [१]

### [ अग्निहोत्रम् ]

अथाग्निहोत्रस्य प्रयोगो वक्ष्यते। पुराऽऽदित्यस्यास्तमयादुदयाच्चापि प्रत्या-गत्य[१०] अग्निहोत्रशालां परिसमूह्य गोमयेनोपलिम्पति। तं त्वा[११] इति यजमानोऽ-प्रतिषिद्धैः काष्ठैरग्निं मन्थीत, यथोक्तं च प्रविश्य [१२]आवेद्युपवेशनात् करोति। ततोऽध्वर्युः प्राण्यापान्य प्रजापतिः प्राची दिग् इति यज्ञपुरुषनमस्कारं [कृत्वा][१३] तीर्थेन प्रविश्याधानक्रमेणाग्नीन् समूह्य परिस्तीर्योत्तरेण गार्हपत्यमुपावहरणीयं कूर्चं निधाय वेद्यामुपसादनीयं च [करोति][१४]। अथाग्निहोत्रहवणीं स्रुवं समिधं

१. M Ad B सर्वदेवोप°. २. M Ad B चरितार्थोच्य°. ३-३. M Ad B broken. ४. M Ad B इमामूर्जम्, thus Tai.B 3.7.4.3. ५. M Ad B broken. ६-६. M Ad B जीर्णं जनः. ७. M Ad B °ष्टोध्वाज. ८. M Ad B प्रत्यस्तमयान्. ९. M Ad B give the sign of broken text after गच्छेत् क... १०. M Ad B अप्रत्यादित्यं. ११. M Ad ता, B त्वा. १२. M Ad B om. १३. M Ad B om. १४. M Ad B om.

मृन्मयीं स्थालीमुपवेषमभिद्योतनं च। उष्णोदकेन प्रक्षाल्य तीर्थेन प्रपाद्योपावहरणीयकूर्चे न्युब्ज्य द्वन्द्वशः [पात्राणि][१] सादयित्वा दक्षिणया द्वारा पय आनीयापरेण गार्हपत्यमुत्तरेणोत्करं च गत्वा तीर्थेन प्रपाद्यापरेण गार्हपत्यं सादयित्वा कामण्डलुकाभिरद्भिरुत्तानानि पात्राणि कृत्वा तूष्णीं त्रिः प्रोक्ष्य ऋतं त्वा सत्येन [ परिषिञ्चामि इति][२] सायं परिषिञ्चति, सत्यं त्वर्तेन परिषिञ्चामि इति प्रातः। न वा परिषिञ्चति। ततोऽङ्गारान्निरूहणादि प्रतिपद्यते। यावद्भिर्हविः श्रप्यते तावतोऽङ्गारान्[३] इह व्यन्तान् करोति पृथक् करोति। गृह्णाति अग्निहोत्र-द्रव्यम्। अग्निहोत्रस्थाल्यां पय आनयति। ततो यथोक्तमङ्गारेष्वधिश्रयति। मूलतोऽभिद्योतनमापीड्य प्रागपवर्गमुदगपवर्गं वा स्थालीं संस्पर्शयन्तीव प्रातः पर्यग्नि कुर्यात्। दूरात् सायं दक्षिणा प्रतीचीं[४] प्रत्यभिद्योतनस्य निरस्यति। उदगुद्वासयति निष्टपयति। त्रिरिहान्तात्स्त्रुचमावेद्यासादनात् निदधाति। देवेभ्यः इत्यादिनाऽनुजानाति। यजमानः पूर्णान्वाऽनूचो वा चतुरुन्नयति। पञ्चममुन्नयनं[५] पञ्चावत्तिनामित्येके॥ [२]

अविशेषेण सर्वेषामेवेत्यपरे। अयं पक्षो युक्त इवाभाति। स्थालीगतमुन्नीतं चाभिमृशति सजूर्देवैर् इति। दशहोतारमुन्नीत एव ग्रहवर्जम्। अग्निं वैश्वानरम् इत्युद्यच्छति। प्रागग्राः समिधमादधाति। समिध्यादीप्तायामनादीप्तायां[६] मूलतो द्व्यङ्गुले जुहोति अग्निर्ज्योतिर्ज्योतिरग्निः[७] स्वाहा। सूर्यो ज्योतिर्ज्योतिरग्निः स्वाहा इत्युदितहोमी जुहोतीति केचित्॥ [३]

इहोक्तयोरनयोश्च ब्राह्मणोक्तयोरनयोश्च अविशेषेण वैकल्पिकमिच्छन्ति। स्त्रुचमनिधायैव प्राणिति यजमानः पूर्वेणाहवनीयं परीत्य। दक्षिणेनाध्वर्युर्गत्वा अपरेण गार्हपत्यं प्रागावृत्योपविश्य समिधमाधायानाधाय वा स्थाल्यामवशिष्टात् स्त्रुवेणोपहत्य यथोक्तं हुत्वा पुनर्यथेतमागच्छति। प्रत्यवेक्ष्याध्वर्युर्दश-होतुराहुतिमनुद्रुत्य पूर्वाहुतेर्भूयोऽङ्गार एव जुहोति। समिधि स्त्रुचमधिधायैवापानिति। स्त्रुचमतिवाल्याग्नेरुपरि प्राग् गमयित्वा कूर्चे प्रागग्रां सादयति, तथा च यो हस्ते लिप्यते तथा प्रत्यग्रमुपमार्ष्टि। तं लेपं स्त्रुच उत्तरतः[९] कूर्चे प्रमार्ष्टि। तूष्णीमोषधीभ्यः सङ्कल्प्य तत एवमेव द्वितीयमुपमृज्य लेपं गृहीत्वा पितृभ्य इति सङ्कल्प्य यथोक्तं निमार्ष्टि। केचिदत्र न[१०] प्राचीनावीतत्वमिच्छन्ति। ततोऽत्रैवोत्तरतः कुड्याः समीपे कृतकर्तेऽसि कर्तेऽपोप्ते[११] कुड्ये जलप्रस्त्रवणार्थं

१. M Ad B om. २. M Ad B om. ३. M Ad तावतोऽङ्गतावतो. ४. M Ad B twice. ५. M Ad B °वर्त्तिना°. ६. M Ad B °दाप्तायां. ७. M Ad B om अग्निः. ८. Ad अविशि°. B अविसृ . ९. M Ad B सूत्तरतं. १०. B om. ११. Ad प्राप्ते.

सुषिरवती[१] द्वाराऽऽचम्याचम्याच्चुकारं शब्दमकुर्वन् प्रजा ज्योतिर् इति वा तूष्णीं वा प्राश्य पुनः समस्तमग्निहोत्रद्रव्यं स्रुग्गतं हस्ते गृहीत्वा आनीय यथोक्तं मन्त्रेण भक्षयित्वा द्विराचम्य स्रुचं द्विः संक्षाल्य आहवनीये त्रीन्निष्टप्य स्रुच्युदकमानीयोदगावृत्तसप्तं ध्यात्वा द्विरुद्दिश्य दक्षिणा पर्यावृत्य याज्ञिकानि काष्ठानि प्रक्षिप्य [२]उपवीजनेनोपवीज्याग्नीनाधानक्रमेण समिध्य स्रुग्गता आपो [३]निनीयापरेणात्मानं पूर्वेणोत्करं स्रुचमानीयोत्तरतः क्षेमे विधाय ऋतं त्वा सत्येन इत्यादिना पुनः परिषिञ्चति। ततो यजमानोऽग्न्यनुवीक्षणादि सर्वमनुवाकशेषं करोति॥ [४]

तत्रानामग्रहणाद् यजमानायतन एव तिष्ठन् करोति। तत उपप्रयन्तो अध्वरम् इत्यनुवाकद्वयेनोपस्थाय ज्योतिष्मन्तं त्वाऽग्ने इत्यादिना माहाचमसेनोपतिष्ठते। अन्ते ब्रह्मवर्मेण[४] सायमनुवीक्षणेन प्रातर् एषः स्वयंहोमपक्षे विशेषः। स्वयमेव देवेभ्यो हव्यं मह्यम् इत्यनुजानाति। पत्नी शिष्यो वा यः कश्चिदध्वर्युर्वा सं त आकुर्वन्तु इति। तथैव गार्हपत्यहोमं स्वयमेव शीघ्रं गत्वा जुहोति। अध्वर्युरित्यपरे॥ [५] इति चतुर्थोऽनुवाकः॥

## अथ पञ्चमोऽनुवाकः

अग्नीनुपस्थास्यमानो[५] भवति। यदि नक्षत्र आधत्ते माहाचमसेनोपस्थायानुवाकद्वयेनोपतिष्ठत आपर्वणं पर्वदिवसात्प्रागित्यर्थः। सर्वाधानपक्षे तु यथापाठमेव अग्निपावमानीभिरुपतिष्ठमान आद्ये दिवसे साग्निपावमानिकेनानुवाकेनोपस्थाय ततः संवत्सरमनग्निकेनोपतिष्ठते। तत्र उप त्वाऽग्न इत्यतः प्राग् याजमाने[६] कृत्वाऽग्रेणाहवनीयं परीत्यापरेणाहवनीयं[७] गार्हपत्यं प्राङ् तिष्ठन् उप त्वाऽग्ने इत्यादि तत्सवितुर्वरेण्यम् इत्यादिभिरुत्तरेणाहवनीयं तिष्ठन्नुपस्थाय यथोक्तं गार्हपत्यमुपस्थायाशिष आशास्य ज्योतिष्मन्तं त्वाऽग्ने इत्यादिना माहाचमसोपस्थानाख्यं कर्म उत्तरविहारस्थ एव करोति॥ [१]

तत्र समिन्धनमिहोक्तक्रमेण पूर्ववत् सहोपस्थानाभिवादनान्तमपरेण[८] गार्हपत्यं स्थित्वा करोति। सप्तर्षिनमस्कारानन्तरं वृष्टिरसि वृश्च मे पाप्मानम्, ऋतात्सत्यमुपैमि [९]इत्युपस्पर्शनमभिवादनम्, तत्तदभिमृश्य। यत्रास्पष्टा[१०] मन्त्रोक्तिः सर्वत्र इमाम् इत्युक्ते भूमिं प्रतीयात्। वेदिमभिमृशामि इति प्रसङ्गेनैतदुच्यते।

---

१. M Ad B सुषिरपति. २. M Ad B उपजानं. ३. Ad विनी°. ४. M Ad B °वर्णेन. ५. M Ad B °नुपास्यमानो; thus Vādhśs 1.19.1. ६. M Ad B प्राग्यज°. ७. M Ad B °नीय. ८. M Ad B °नाधिवद. ९. M Ad B इत्यपस्प°. १०. Ad यत्रस्पृष्टा.

सर्वत्र दक्षिणत उत्तरविहारं गच्छतामुत्तरतो वा दक्षिणविहारं गच्छतामग्रेणाहवनीयमार्गः, तथा दक्षिणाग्निं गच्छतां चापरेण गार्हपत्यं प्रातरप्येवं[१] करोति। तत्र मार्जनमुत्तानेन पाणिना। अनुवाकद्वयं ब्रह्मवर्मोपस्थानं च नास्ति। तत्र पयोऽभावे यवागूराज्यं दधिमांसमोदनं[२] तण्डुलः [३]सोमस्तैलं जलमितीमानि द्रव्याणि भवन्ति। तत्राज्येऽपां प्रत्यानयनकाले दर्भाग्रे प्रत्यस्यति। दधिसोमतण्डुलानामधिश्रयणं नास्ति। [४]तदभावेऽङ्गारनिरूहणमपां [५]प्रत्यानयनमुद्वासनमङ्गारप्रत्यूहणञ्चेत्येतानि न सन्ति। मन्त्रेणादाय बर्हिरिव निधाय अभिद्योतनपर्यधिकरणे करोति। सोमे रसं वा लतां वा गृह्णाति। तत्र श्रपणार्थं हिरण्यं निदधाति। केचिदधिश्रित्य पचन्ति। रसग्रहणपक्षे कुट्टयित्वा रसं गृह्णाति। लताग्रहणपक्षे छित्त्वा स्रुवेणैवोन्नयति। तैलेऽपां प्रत्यानयनमत्र नास्ति॥ [२]

[६]यावानोदने यावतोदकेन सम्यक् पच्यन्ते तण्डुलास्तावदपां प्रत्यानयने पय आनीय श्रपयति। हविःष्वप्सु सर्वं क्रियते। विशदद्रव्यमोदनाद्यपि स्रुवेणैवोन्नयति। प्रवत्स्यन् अग्नीन् प्रज्वाल्य अथातो विराजक्रमाः ( वाधूश्रौ ३.१.२८ ) इत्यादि विधानेन याजमानोक्तेन प्रवासविधिना विराजक्रमैर्वा। अथातो माहाचमसम् ( वाधूश्रौ ३.२.१ ) इत्यादिना माहाचमसेनोपस्थाय व्रजित्वा पुनरागच्छेत्। पथ्ये वा त्रिप्रादेशां समिधमादायागत्य येनोपस्थाय गतस्तेनैवात्रोक्तेन विधिनोपस्थाय तूष्णीं तृतीयं समिधोऽभ्यादधाति ( वाधूश्रौ. ३.२.१९ ) इत्यादि च यथोक्तं करोति। बहुकालेनाप्येवं प्रवसतो दोषो नास्ति। यदि प्रवत्स्यदुपस्थानमनुपस्थाय प्रव्रजति यत्र स्मरेत्, तिष्ठन् अभिमुखो जपेत् इहैव सन् तत्र सतो वो अग्नय इति। प्रवसन्नग्न्युद्धरणकालमनशनेन ( वाधूश्रौ. १.२२.२ ) इति[७] विधानेनोभयोः कालयोः भूर्भुवः सुवरग्नय आहोष्यमाणाः ( वाधूश्रौ. १.२२.४ ) इत्यादि मन्त्रं प्राङ् वोदङ् वा तिष्ठन्नासीनो वा जपित्वा नित्येनोभयोः कालयोर्यथोक्तं जपति। स्वगृहाभिमुखोऽग्निहोत्रं यदा हुतं मन्यते तत्र यानि कर्माण्यनेन कर्तुमशक्यानि तान्यध्वर्युर्वा पुत्रो वा करोति। अमन्त्रकं पिण्डपितृयज्ञं, सर्वं समन्त्रकं च। समस्तं वा याजमानमस्मिन् पक्षे प्रवसदुपस्थानमेव। याजमानस्य सर्वं याजमानं वा अस्मिन् पक्षे देवेभ्यो मह्यम् इत्यनुज्ञानमपि यजमान एव करोति। प्रशास्तर्यज इतिवत् समाकृतं प्रैषं च। तथा पराग्निहोमं स्वयमेव जुहोति। अत्रोक्तान्युपस्थानानि कर्तव्यानि, विकल्प्यानि च॥ [३] इति पञ्चमोऽनुवाकः॥[८]

## ॥ इत्याधानाख्यः प्रपाठकः समाप्तः ॥[९]

---

१. M Ad B ॰प्येव. २. M Ad B ॰मांससमो॰. ३. M Ad B स्तोम॰. ४. M Ad B तदभामङ्गारान्निरू॰. ५. M Ad twice. ६. M Ad B यवान्नो. ७. M Ad B ॰मनश = प्येनेति. ८. M इति षष्ठः; Ad इति षष्ठः समाप्तः. ९. M आधोनाख्यो प्रपाठक; Ad ॰प्रपाठकश्च॰.

## ॥ अथ द्वितीयः प्रपाठकः ॥[१]

## ॥ अथ पुरोडाशी ॥

### अथ प्रथमोऽनुवाकः

अथ पुरोडाशी प्रारभ्यते। यज्ञोपवीत्यप आचम्य तीर्थेन प्रपद्य [२]प्राण्यापा-[न्याग्नीन]न्वाधायाग्निहोत्रोच्छिष्टमातच्य[३] निधाय शाखां छित्त्वाऽऽहृत्य तया वत्सानपाकृत्य गा अनुमन्त्र्य यजमानं चाभिमन्त्र्य शाखामुद्गृह्य बर्हिः संभारान् प्रस्तरादन्यानयुजो मुष्टीन् समन्त्रकान् लूत्वा सम्भृत्य यजमानस्य सर्वं लूता सम्भृत्य निधाय वेदं परिभोजनीयं[४] सकृदेकविंशतिर्वा[५] पालाशः खादिरो वा। तत्र त्रिप्रादेशाः परिधयो द्विप्रादेशा इध्मकाष्ठानि। ततः शाखां प्रादेशमात्रगतां छित्त्वा तत्र दर्भमयं त्रिगुणं शाखापवित्रं कृत्वा मन्त्रेणाग्नीन् परिस्तीर्य वत्सज्ञुं मूतकार्यमूर्ध्वाग्रं त्रिवृच्छिरसं[६] वा वेदं त्रिवेदिं[६] करोति, रत्नं धृत्वा संमार्ष्टी-त्यातः[७]। पौर्णमास्यां तु यथापाठमग्न्यगारपरिशोभनं[८] भस्मोद्वपनं पात्रप्रक्षालन-मिति च कृत्वाऽपराह्णे पितृभ्यो दत्त्वा तूष्णीं परिस्तृणीयात्। वेदं कृत्वा वेदिं कृत्वा पितृभ्यो दत्त्वाऽग्नीन्मन्त्रेण परिस्तीर्य वेदिमभिमन्त्रयत इत्यपरे। सान्नाय्य-पात्राण्युपावहृत्य [९]गा आयतीः[९] प्रतीक्ष्य यजमानञ्चाभिमन्त्र्य हुत्वाऽग्निहोत्र-मुत्तरेण गार्हपत्यं तृणानि संस्तीर्य तेषु द्वन्द्वं न्यञ्चि पात्राणि सादयेत्॥ [१]

सः [१०]तान्युत्तानानि कृत्वा शुन्धध्वं दैव्याय कर्मणे देवयज्यायै इति वा, तूष्णीं वा संस्कृताभिरद्भिः कामण्डलुकाभिरद्भिर्वा प्रोक्ष्य प्रसिद्धं सान्नाय्यं दोहयेत्। ततः प्रैषमभिमन्त्रणं प्रतिदोहमावर्तते। त्रिवृद्गृह्णतः कामधुक्ष इत्याद्या वर्तते। पूर्ववत् प्रातर्दोहाय वत्सानपाकुर्यात्, तूष्णीं वा दर्भैः प्रातर्दोहं दोहयन्। उदीचीनाग्रं पवित्रं निदधाति। प्रतिषिद्धवर्जं सर्वं कुर्यात्। अन्ते संक्षालानयनं नात्र धर्मपदविधानम्। अथाग्रेणाग्निं तृणानि संस्तीर्य तेषु द्वन्द्वं न्यञ्चि पात्राणि यज्ञायुधानि सादयति। स्फ्यादीनि सादयति। इतराणि[११] सादयति जुहूं च स्रुवं चोपभृतं च ध्रुवां च प्राशित्रहरणं चेडापात्रं च पुरोडाशमेक्षणं च पिष्टोद्वपनीं च प्रणीताप्रणयनं चाज्यस्थालीं च वेदं च दारुपात्रीं च मेक्षणं च चरुस्थालीं च

---

१. M Ad B om. २. M Ad B broken between प्राण्यापा [MSS मान्यप्रज्य] and न्वाधाय° [MSS पाधाय]. ३. M Ad B °तथ्यं. ४. M Ad B °भोजनी. ५. M Ad B °विंशतिं वा. ६-६. M Ad B त्रिवृच्छिरन सं वापेदं त्र्यवेदिं. ७. Ad B °त्यतः. ८. M Ad B °परि परिशोभनं. ९-९. M Ad B गायत्रयतिः. १०. M. तन्यु°. ११. M Ad B त्वेतरा°.

**मदन्तीस्थालीं**[१] **चान्वाहार्यस्थालीं च समिधं च पत्नीसन्नहनं च वृषारवं चोपवेषं च। अयोदर्व्यादीनि अन्यान्यपि द्वन्द्वशः सादयेत्। अथ ब्रह्माणं दक्षिणत उपवेश्य पुरोडाशीयानाहृत्य निधाय पवित्रे आदाय प्रणीतापात्रमुत्तानं कृत्वा तूष्णीं कामण्डलुकाभिरद्भिः प्रोक्ष्य तत्राप आनयन्नाह**—ब्रह्मन्नपः प्रणयिष्यामि **इति। ता आनीता आपः परिगृह्य जपति**—भूर्भुवः सुवर्देवस्य त्वा **इति। ता उपादायोत्थाय मुखसंमिता अस्कन्दयन् हृत्वोत्तरेणाहवनीयं प्रबाहुगीषदिति**[२] ॥ [२]

**गता वा मन्त्रेण दर्भेषु सादयित्वाऽभिमन्त्र्य दर्भैः प्रतिच्छाद्य पवित्रे** [३]**आहरन्नेतीत्यादि प्रतिपद्यते। अग्निहोत्रहवण्यादीनि च तथैव प्रोक्ष्यादत्ते।** वेषाय त्वा **इति शूर्पादानमन्त्रम्। किञ्चित् पुरोडाशीयेभ्योऽधि निरस्यति। निरसीयन् तृणादीनि निर्वपति। उप्त्वाऽभिमर्शनमाध्वर्यवम्। याजमानमित्येके।** रक्षायै त्वा नारात्यै **इति हविरभिमन्त्रणम्।** अग्ने हव्यं रक्ष **इति गार्हपत्याभिमन्त्रणम्। उदिङ्गयति उत्कम्पयति, पाणिना चोर्ध्वं गमयति। सकृदेव मन्त्रस्त्रिरुदिङ्गनम्। त्रिर्वा च्छेदो मन्त्रस्य। अन्याभिरद्भिः प्रोक्षति।** [४]**जुष्ट्यावचनमन्त्रस्यावृत्तिः।** हविष्कृदेहि **इति ब्रुवन् प्रहरति। नायं प्रहरणमन्त्रः। उद्वादने चैकमन्त्रत्वमनावृत्तिश्च, त्रयो वा मन्त्राः। उत्तुषान् उन्मुक्ततुषान्, पृथग्गततुषान्। मन्त्रेण विवेकमारभ्य सर्वान् वितुषीकृत्य सहैवाभिमृश्य उलूखले आवपन्नाह प्रैषम्। प्रेषिता पत्नी त्रिष्फलीकृत्य प्रब्रूयात्। अथैनान् प्रक्षाल्य प्रक्षालनमन्तर्वेदि निनीय पुनरेषूदकमासिच्य निदध्यात्**[५] ॥ [३] इति प्रथमोऽनुवाकः॥

## अथ द्वितीयोऽनुवाकः

**उपवेष उपधानार्थो नित्योऽन्यः शाखामूलम्। तेनाङ्गारनिर्वर्तनप्रतिनोदनावर्त्तनानि कुर्यात्। प्रधिकं प्रधावुपधेययोरन्यतरत्। परिचितमितरत् परिचिन्मन्त्रेण। परिचितान्दक्षिणपूर्वं पूर्वेण सपर्याहृत्योपदध्यात्। तथा दक्षिणापरम्। तथोत्तरपूर्वमुत्तरेषां कपालानां निर्वर्तनप्रतिनोदने न स्त इत्येके। सर्वत्र परिचिन्मन्त्रकाणि प्रदक्षिणं प्रागुदक्संस्थान्युपदधाति। विस्राव्य प्रेषणीयान् निदधाति। चरव्यानध्येतानपि**[६] **विस्राव्य केचित् निदधति। भूयस एधान् प्रक्षिपन्ति। मदन्तीरधिश्रयन्ति। तपन्ति च पिष्टोद्वपनीम्।** धान्यमसि **इत्येव मन्त्रेण प्रतिमुष्ट्यावपते**[७]**। भिन्ना एव मन्त्राश्चत्वारश्चतुर्णां मुष्टीनाम्।** धान्यमसि **इति**

---

१. M Ad B मदन्ति. २. M °दति. ३. M Ad B आहन्नैती°. ४. M Ad B मुष्ट्यावचन°.
५. M Ad B निदध्याः. ६. M Ad B चरव्यानद्ये तानवि. ७. M Ad B °प्रतिपुष्ट्या पत्तते.

च सर्वत्रानुषज्यत इत्यपरे। प्रपतितानन्ववेक्षते[१]। प्रैषमाह[२] संवपत पिष्टानि[२] तूनिकुरुताद् इति। प्रेषिता पत्नी दासी वा पिनष्टि। असंवपन्ति अमिश्रयन्ति पिष्टानि तण्डुलैः। न वा प्रैषैः, यदि कश्चित् पिनष्टि। पिष्टानि संवपन्ति। तप्तायां पिष्टोद्वपन्यां मुहुरालोड्याथ स्रुवेणाप आनयति। प्रणीताभ्योऽध्याहृता भूयसीरप आनयति मदन्तीभ्यः शनैःशनैः प्रम्णायन्। वीक्षमाणः परिप्रजनयति परितो गमयति। आनीता अपः संयौति मेक्षणेन। प्रम्णाय प्रमृद्य हस्तेन व्यावर्त्यादिशेन्मन्त्रेण। तूष्णीं पूर्वायतं प्रागायतं कूर्माकृतिं कृत्वा पुरोडाशमधिश्रयेत्। सर्वाणि कपालान्यभिप्रथयति। सर्वाणि छादयति। पुरोडाशं नातिप्रथयेत्। त्वग्ग्रहणम् अद्भिरभिमर्शनं त्रिष्कमसकृन्मन्त्रः। दधनि पूर्वमवदेये दधिपूर्वमुपनिधेयं शृते शृतम्। एवमासादनेऽभिघारणेऽभिमर्शने। प्रयाजशेषाभिघारेण स्विष्टकृदवदान इडावदाने च। शृते केचित् पूर्वावदेये [३][पूर्वव]देव तमभिपूरयन्ति। दध्ना [४]स्विष्टकृतः देवस्त्वा सविता इति चरुं चाभिमृशेत्। पुरोडाशविषयमेवाभिमर्शनमित्येके॥ [१]

अवज्वलनाभिवासने तु पुरोडाशस्यैव, तथा वेदेन संस्पर्शनम्। सर्वत्रैतदित्यपरे। संक्षालनं पिष्टपात्रीं पिष्टोद्वपनीम्। वेदेन वेदिं संमृज्य विमाय स्फ्यं च बर्हिश्चान्तर्वेदि निदधातीत्यादि प्रपद्यते। अन्तर्वेद्युदीचीनाग्रं बर्हिर्निदधाति। उत्करस्यार्जवे दक्षिणेन [५]ब्रह्माणमुत्तरेणोलूखलं स्थानं प्रहृत्य बर्हिःखण्डं सह पुरीषेणाहरेत्। अन्ते समस्तं इमां नरा इति जपः। समुद्धननं तूष्णीं हस्तेन हरणं संमार्जनं च। प्रैषेऽध्वर्युणोक्तेनाग्नीत् प्रैषार्थान् करिष्यन् मार्जयित्वा प्रोक्षणीरभिपूर्य तासां स्फ्यस्य वर्त्मन्नुपनिनीय तत्रैव मन्त्रेण सादयित्वोत्तरेण प्रणीता[६] अन्तरा प्रणीताश्चात्मानं च हृत्वोत्तर[७] एव प्रागाहुतिमिध्माबर्हिरुपसादयति। दक्षिणमिध्ममुत्तरं बर्हिः। अध्वर्युः स्फ्यं निहत्य मार्जयित्वा स्फ्यं प्रक्षालयति। अथाग्नीध्रः स्रुचः संमृज्य संमार्जनान्यग्नौ मन्त्रेण प्रहरति। तूष्णीं वा सञ्चर उदस्य सादयित्वा स्रुचः पत्नीसन्नहनाद्याज्यसादनान्तं करोति। अवान्तरावकाशेनावेक्षेते अध्वर्युरग्नीच्च। अग्नेर्जिह्वासि इति मन्त्रोऽवान्तरावकाशो वाचनेषु सर्वेषु। वाचयित्रोक्ते वक्ता ब्रूयात्। आत्मनश्छायामवेक्ष्य मन्त्रेणाज्यं पुनराहार्य[८] त्रिः सकृद्वोत्पूय प्रोक्षणीषु पवित्रे अवधायाज्यग्रहणादि

१. M Ad B प्रपतिता ननु अन्वपेक्षते. २-२. M Ad B माहा संवपति पीषान्. ३. M Ad give the sign of broken text between °देये and देवतम° (Ad देवताम°). ४. M Ad B दध्नान्विष्ट°. ५. M Ad B ब्राह्मणमु°. ६. M Ad B अन्तराप्रणीता twice. ७. Ad हुत्वो°. ८. M Ad B °हार.

प्रतिपद्यते। वरुणप्रदेशे[१] यत्राज्यं गृहीतं पवित्रे आदाय प्रोक्षणीशेषं निनीयाप उपस्पृशेत्। पवित्रे अपिसृजेत्। प्रदेशं लक्षयेत् साग्रं समाग्रं, प्राचः प्रागपवर्गान् दक्षिणतो मध्यत उत्तरत इति। समन्त्रकैस्त्रिभिर्मुष्टिभिः प्रागपवर्गैः समस्तां वेदिमास्तीर्याह—स्तृणीत बर्हिर् इति। त्रिवृत् त्रिगुणं बर्हिस्तृणन्ति॥ [२]

परिकर्मिणः सह पूर्वेण गुणेनानतिदृश्नम् अधिद्रष्टुमशक्यम्। पूर्वेण पर्याहृत्य दक्षिणं परिधिं परिदध्यात्। तथैव पुनः पर्याहृत्य प्रहरेत्। समिधा-वूर्ध्वाग्रे[२] तिरश्च्योर्ग्रहणं परिभोजनीयात्। स्तीर्णस्य[३] वा बर्हिषो मध्यमात् गुणात् सव्येनोपभृतं सादयेत्। प्रत्यङ् चरत्येव[४] हवींष्युद्वासयेत्। सर्वेषु पक्षेषु समन्त्रकमेवोद्वासनमुपस्तरणम्। पात्र्यां यवमयेषु हविःषु लुप्येतोपस्तरणमन्त्रः। न लुप्यत इत्यपरे। अभिघारयेत्[५] पुरोडाशं, सर्वतः सन्तर्पयेत्। उद्वास्यापि चरुमभि-घारयेत्। यथापाठमित्यपरे। उत्तरस्योद्वासने सुरूपम् इति मन्त्रो लुप्यते। यथा-देवतमभिघारमित्येके[६]। हविष्यासादयन्नवदानक्रमेण सान्नाय्ये सादयित्वाऽभि-मृश्य मन्त्रेणानुपूर्वं हवींष्यभिघार्य दक्षिणेन ध्रुवां स्रुवं सादयित्वा साज्यस्रुवायां सादयेत्। यजमान इत्यपरे। वेदं सादयित्वा संसन्नं यज्ञं यज्ञसाधनेष्वभिमृशेत्। यजमान इत्येके। सर्वत्रैव प्रत्यगाशिषो मन्त्राः कर्मकरणाः कर्मवशादाध्वर्यवा एव यजमानेनापि सह जपनीयाः। अत्राध्वर्युर्व्रतमुपेयात्। यजमानस्यैव कश्चिद् व्रतकाल इत्यन्ये। स्रुचोऽभिमृशति। पृथक् पृथङ् मन्त्रमावृत्य सहैवासकृदेव [. . .][७]। व्याख्येयोऽत्र[८] ग्रहणे होमविधिः॥ [३] इति द्वितीयोऽनुवाकः॥

## अथ तृतीयोऽनुवाकः

अग्नये दधाति। आहवनीये भूयस एधान् प्रक्षिप्य गन्धपुष्पैरलंकृत्य होतारमामन्त्र्य तस्मै देवतामभिधाय इध्मात् समिधमादधानो अग्नये समिध्य-मानायानुब्रूहि इत्युक्त्वा त्रिषु प्र[णवेषु तिस्रः समिधोऽभ्यादधाति। अत][९] ऊर्ध्वं प्रतिप्रणवमेकैकमभ्यादधाति। अथवा आद्ये प्रणव एकामभ्याधाय अनन्तरे न्यासे तिस्रः। अत ऊर्ध्वं प्रतिप्रणवमभ्यादधाति। एवं पञ्चदश दारूण्यभ्याधेयानि। प्रतिप्रणवं तिस्रोऽभ्याधाय अत ऊर्ध्वं प्रतिन्यासं प्रतिप्रणवं पञ्च [अभ्याधे-यानि . . .][१०]। एवमेकविंशतिदारूण्यभ्याधेयानीत्येके। सुव्यक्तान्येतेषामेक-

---

१. M Ad B °देशो. २. M Ad B समिधादू°. ३. M Ad B तीर्ण°. ४. M Ad B चरेत्येव. ५. M Ad घातयेत्. ६. M Ad B °मभिधान°. ७. M Ad B broken. ८. M Ad B व्याख्ये यत्र. ९. M Ad B broken; cf VādhŚS 2.10.2-3. १०. M Ad B broken.

विंशतिपक्षे कल्पवाक्यानि सुयोज्यानि भवन्ति। आ जुहोत इति परिधानीयोपलक्षणं, नोपवाजनमन्त्रस्यावृत्तिः। आदीप्त इध्मे घ्रातहवन[१] इति श्रुत्वा ध्रुवाया अधि स्त्रुवेणोपहत्य वेदेनोपयत्य मनसा मन्त्रमन [. . . .][२] वते प्रजापतये संकल्प्य दक्षिणा तिर्यञ्चं सन्ततमृजुमाघारमाघारयेत्। सर्वेषु होमेषु प्रक्षेप्ता देवतां ध्यायेत्। भुवनमसि[३]=नमः इति जुहूपभृतौ प्रत्यञ्जलिं कुर्वन्नाहवनीयमुपतिष्ठते। सर्वत्र जुहूमुपभृत्यध्यूहन् पुरस्तात्प्रतीचीमध्यूहन् पश्चा प्राचीमुपावरोहेत्। सर्वत्रात्याक्रामन् सव्येनात्याक्रामन् पुनरत्याक्रामन् दक्षिणेनात्याक्रम्य प्रदक्षिणमावर्तते। प्रयाजत्रयायावशिष्योत्तरमाघारमाघारयेद्। उदञ्चं तिर्यञ्चमृजुम्[४]। सन्ततमृजुम् इन्द्राय संकल्प्य जुह्वा ध्रुवां त्रिः समनक्ति। त्रेधा मन्त्रं छित्त्वाऽनुषज्य, सकृदेव वा, समस्तेन मन्त्रेण बर्हिस्तीर्णाददीत[५]। अध्वर्युणाऽऽश्राविते अस्तु श्रौषट् इत्यग्नीत् प्रत्याश्रावयेत्॥ [१]

सर्वत्रैवं कुर्यात्। आश्रावण आद्यौ स्वरौ ब्रुवते। अस्तु श्रौषट् इत्याकारः। श्रावयेदिति चाध्यश्रौषट् इति च। अगानग्नीत् इत्याकारे ब्रूहीत्यूकार उदेहीत्येकारः आगुरित्येव याजान्तो वषट्कारं च। पृष्टो[६] होता स्वनाम प्रब्रूते। होतृषदने बर्हिः स्तीर्त्वाऽऽह सीद होतर् इति। एवं ब्रह्मयजमानयोश्च प्रागुपवेशाद् दक्षिणेनाहवनीयं ब्रह्मणः, ततः पश्चाद् यजमानस्य, तथा जघनेन पत्न्याः। सर्वाणि बर्हिःकार्याणि परिभोजनीयान्युक्त्वा[७] वेदिस्तरणं स्त्रुचावुभाभ्यां हस्ताभ्यां नासिकाया आर्जवे धारयित्वा तिष्ठन्नाश्रावयेत्। यत्र तिष्ठन्नाश्रावयेत् तत्रस्थ एव जुहुयात्। प्राचः प्रयाजान् यजति, प्रदिशं वा प्राङभिक्रम्याभिक्रम्य। तेषु वसन्ताद्या देवता यथाक्रमम्। अन्त्यस्य हेमन्तशिशिरौ। सर्वत्र वषट्कारप्रदाने यजमानः स्वाहेत्यनुमन्त्रयेत, अध्वर्युर्वा। सर्वं हुत्वा त्रीन्वा[८] स्त्रुचं धारयन्न क्वचिदग्नौ अत्यूहेत्। अथेदं शनैः प्रत्याहृत्य प्रतिसन्दध्यात्। आज्यभागाघारयोः[९] प्रबाहुक्त्वं जुहोति। मुखं चेत्येके। ध्रुवाया उपस्तरणाभिघारणे, प्रत्यञ्जनमाज्यस्थाल्याः समञ्जनं च सर्वं च मनुष्यसंबन्धं होमं च प्रागाघारादरण्योश्च[१०] वचनादन्यत् सान्नाय्याङ्गुष्ठप्रदेशिन्यौ, मा भेर्मा संविक्था: इत्यवदातुमत्र[११] प्रेयात्। व्यतिषज्याङ्गुली भरतमुद्धर इत्यवदातुमारभेत। तिर्यक् पूर्वमन्वपेत् पुरस्तात्पश्चादन्येषां हविषां मध्यात्। पूर्वार्धादपरार्धादिति पञ्चावत्तिनाम्[१२]।

---

१. M Ad B घ्राताह . २. M Ad B broken. ३. M Ad B abr; cf VādhŚS 2.10.9. ४. M Ad B om जु. ५. M Ad B स्तीर्णादादीत. ६. M Ad B वृष्टो. ७. M Ad B परिभोजनीयान्मु . ८. M Ad B भीन्व . doubtful. ९. M Ad B ॰भागावासयोः. १०. M Ad ॰दवरण्यो . ११. M Ad B ॰मच. १२. M Ad B ॰वर्तिनां.

इति प्रतीचीमुपभृतमपोहति। स्रुचा मध्यमं परिधिमन्वारभ्योत्तरतः प्रह्वस्तिष्ठन्नाश्रावयेत्। सूक्तवाकान्ते प्रस्तरं प्रहरेत्। यथापाठमित्यपरे। शाखां च सहते न प्रहरेत्॥ [५]

अनुप्रहृत्य बर्हिरध्वर्युः स्वगा दैव्या होतृभ्यः इति प्रेष्येत्। इमां पृथिवीमात्मानं हृदयदेशं [प्रत्यभिमृशते][१]। आयुष्पा इति नासिकां प्र[त्यभिमृशते][२]; चक्षुष्पा इति चक्षुषी, श्रोत्रपा इति श्रोत्रे। सकृदेव वा सर्वान् प्राणान् समस्तं मन्त्रमनुद्रुत्य। अभितः परिधी प्रहृत्याधस्ताच्चोपरिष्टाच्च मध्यमस्य[३] स्रुचा [अपः] संप्रगृह्णाति[४] सम्यक् प्रस्त्रावयन् गृह्णाति। आहवनीये जुहूं, जुह्वामुपभृतं ध्रुवायां संस्त्रावमुभयोः प्रश्च्योत्य स्फ्ये सादयति। स्फ्यान्तया संस्पर्शयति। मन्त्रान्तयैव होत्रे वेदं यजमानेनामन्त्रितं प्रयच्छेत्। उपांशु पत्नीसंयाजमन्त्रा उपांशुतरा देवता वेदः। तेषूपभृत्स्थानीयः पुरस्तात् परिश्रिते देवानां पत्नीर्यज इति यथाश्रुतम्। तेषु देवता अग्नीध आदधाति द्विपत्नीवते[५] सवे [. . .][६] परमेष्ठी प्रजापतिः। एवं सर्वेषु[७] यागहोमेषु चतुर्गृहीतं गृहीत्वा फलीकरणानोप्यापसलैः पर्यावृत्य इध्मपश्वाज्योलूखलमुसलम्[८] इति पिष्टलेपमनुवर्तयेत्, अनुजपेद्वा। अनेन मन्त्रेण होमानन्तरं निवर्तयेदित्येके। तत्र विश्वेदेवा देवताः। प्रसलैः आवृत्य देवं प्रदाय पत्नीं विस्त्रंसयेत्। समायुषा इत्यनुवर्त्य यथेतमेत्य नारिष्ठहोमान् जुहो[९][ति। नारिष्ठ]पूर्वेषु नारिष्ठो चतुर्थे सोम ऋषभं[१०] त्वा त्रिषूत्तरेषु यज्ञपुरुषः। अन्त्ये प्रजापतिराप्यायताम् इत्याज्यस्थालीस्थमाज्यं ध्रुवायामवनयति। वेदस्य तृणानि वेद्यां स्तीर्णेन बर्हिषा ध्रुवामुपसंगृह्य उत्थाय दक्षिणेन पदा वेदिमत्याक्रम्य ध्रुवयैव समिष्टयजुर्जुहोति। समङ्क्ता [बर्हिर्हविषा घृतेन इति ध्रुवायां][११] बर्हिरक्त्वा दिव्यं नभो गच्छतु इत्यनुप्रास्य स्वाहा वाते धा इत्यभिहुत्येध्मसन्नहनानि मन्त्रेणानुप्रहृत्य स्रुचा संस्त्रावं स्रुच आनीयाभिहुत्य प्रणीता आवृत्यार्धमन्तर्वेदि यजमानस्याञ्जलावानीय सादयित्वाऽद्भिः पूरयित्वा पूर्णपात्रे वाचयित्वा प्राच्यां दिशि देवाः इति पञ्चभिः पञ्चकृत्वः पुनरञ्जलावानीयातिशिष्टाः॥ [६]

आपोहिष्ठीयेन तृचेनाञ्जलावेवानयेत्। विष्णुक्रमादयोऽध्वर्युणाऽपि कर्तव्याः। यजमानभागप्राशनवर्जमित्येके[१२]। यजमान एव वा सर्वे। प्रवसति

१. M Ad B om. २. M Ad B broken. ३. M मध्यस्य. ४. Ad संप्रतिश्रृ°. ५. M Ad B °पत्नीवर्जा. ६. M Ad B broken. ७. M Ad B सर्वे. ८. M Ad B °पश्वनान्यन्वाबले मुसल. ९. M Ad B broken. १०. M Ad B ऋभवं. ११. M Ad B broken. १२. M Ad B °पाशवर्ज°.

यजमानेऽध्वर्युणाऽपि कर्तव्याः। इहाम्नाता विकृत्यर्थाः। पृथग्याजमानाः प्रकृत्यर्था इत्यपरे। सर्वेषु पक्षेषु व्रतविसर्गो यज्ञविमोकः कपालविमोकश्चाध्वर्योः। उपवेषं चोदपात्रं चादाय उपप्रेत इत्युत्परेत उभौ। मन्त्रमुक्त्वापसृजति। अध्वयुर्यजमानेन सहायः परिषिच्याप्रतीक्षमागत्य होतृषदनैर्वेदिमभिच्छाद्य व्रतं विसृजेत्। यजमानस्यायं व्रतविसर्गकालः। प्राङेत्योपसमिधमादाय व्रतं विसृजेदित्येके। प्रदक्षिणमावृत्य प्रत्यङ्ङाद्रुत्यान्वाहार्यपचने सर्व ऋत्विजो वरुणविमोकं कुर्युः॥ [७] इति तृतीयोऽनुवाकः॥

## अथ चतुर्थोऽनुवाकः

### [ याजमानम् ]

यजमानोऽपि यज्ञोपवीत्यप आचम्य विद्युदसि विद्य मे पाप्मानम् इत्यप उपस्पृशति। वृष्टिरसि वृश्च मे पाप्मानम् इत्यन्ते प्रधानयागाद्यन्तयोर्वा। अथान्वाधायाग्निं गृह्णामीत्युद्यन्तमादित्यमनु समारोहन्तमग्निमुपस्थाय विक्रममाण इव दक्षिणतः स्थितेषु व्रतमुपेत्याद्भिरात्मानं मार्जयित्वा अग्ने व्रतपते इति समिधमादायारेचनेन प्राणानायम्यानुच्छ्वसन् पूरणेनात्मानमन्तरतः पूरयित्वाऽनृतात्[१] सत्यमुपेयात्। बर्हिषा पूर्णमासे व्रतमुपेयात्। वत्सैरमावास्यायाम्। शिवा च मे इति पूर्वस्मिन् परिग्राहे जपति। श्वोभूते पौर्णमास्यामपराह्णे पिण्डपितृयज्ञेन प्रचरेत्। आदित एव प्राचीनावीतं कृत्वा दक्षिणेनान्वाहार्यपचनं दक्षिणाग्रेषु दर्भेषु एकैकं पैतृयज्ञिकान् संभारान् सादयेत्॥ [१]

उदकुम्भमुलूखलमुसलं शूर्पं स्थालीं मेक्षणं दर्वीं सकृदाच्छिन्नं दशामिति। स्रुवं चाज्यस्थालीं चैके सादयन्ति पिण्डानामुपस्तरणाभिघारणार्थायेति[२]। अथैकं पवित्रं तिरस्कृत्य दक्षिणामुखः पितृपितामहप्रपितामहान् मनसा संकल्प्य स्थाल्यां निर्वपति। यथार्धपात्रं चरु स्यादविवेकं[३] विवेकवर्जः। सकृदेव वा वितुषीभावः। सकृदवहत्य सकृदेव फलीकृत्य यावतीभिः सम्यक् पाको भवति तावतीभ्यो न्यूना एकपवित्रा अप आनीयाधिश्रित्यैकपवित्रानेव तण्डुलानोप्य श्रपयित्वा नवनीतं प्रक्षिप्योद्वास्य दक्षिणत स्फ्येनोद्धन्ति[४]। दक्षिणतश्चेत् पिण्डदानमपरेणोद्धन्ति। अपरेण चेत् पिण्डदानं दक्षिणत एवोद्धन्ति। अपरेण पिण्डदानमित्यपरे। अथोल्मुकमादायेत्यादि प्रतिपद्यते। तृणमुष्टिं सकृदाच्छिन्नं दर्वी-

---

१. M Ad B ॰नृतत्. २. M Ad B ॰र्थाविति. ३. M Ad B VādhŚS 2.2.9, fn.11 अनपवेकं. ४. M Ad ॰ध्वन्ति.

सादनान्[१] पिण्डान् यथा चतुरश्चमसांश्चतुरः स्रुवान् इति। दर्व्यौ दक्षिणापवर्गाः। जीवत्पिता पिण्डद्वयं दद्यात् एतद्वः पितामहाः, एतद्वः प्रपितामहाः इति मन्त्रद्वयेन। विनिविष्टश्च मन्त्रविकल्पः[२]। एकेनैव मन्त्रेण पिण्डद्वयं दद्यात्॥ [२]

उदङ्ङावृत्य आतमितोरावेदनाद् [३]अनुच्छ्वसन्नसित्वाऽऽहवनीयमभिव्यनिति। व्यपगतोष्माणः पिण्डानभिपर्यावृत्य स्थालीगतमेवावजिघ्रति त्रिः[४] सकृन्मन्त्रः। दीर्घान् दशान् छित्त्वा मन्त्रेण पिण्डत्रये निदधाति। संसादयति[५]। विसर्जयति। मन आह्वयति। मत्वा ब्रूयात्। आहवनीयस्यार्धमेति मन्त्रेण। पात्रे चरुस्थाल्यां समस्यति। अथैतान्यायुधान्येकैकमुदाहरन्ति। अथान्वाहार्यपचने स्थालीपाकं श्रपयित्वा तस्मिन्नेव हुत्वा प्राश्नीयात्। अध्वर्युणा वा हुतं प्राश्योपवसेत्। श्वोभूते वाचं यच्छ इत्युक्ते वाग्यत आसीनो[६] हविष्कृदाह्वानात् अन्यत्र यज्ञसादनात्[७]। अधिनिहितेषु पवित्रेषु पुरोडाशीयेष्वध्वर्युणा वाच्यमानो धूः मन्त्रं ब्रूयात्। अग्निं होतारम् इति निरुप्यमाणं हविरभिमन्त्रयेत। अध्वर्युणा वाच्यमानः सकृदेवात्रैवाभिमन्त्रणं [८]मन्त्रयोर्विकल्पे इत्येकेनापि विकल्पः। निरुप्तेष्वेव सकृद्वाच्यमानोऽभिमन्त्रयेतेत्यपरे। उलूखलमुसलं दृषदुपलं च अध्वर्युणा युज्यमानमभिमन्त्रयेत, परेक्षेत वा। तथा सत्यध्वर्युणा दृषदुपलं परेक्षणीयं स्वेन स्वेन कर्मणा युज्यमानम्। पृथक् पृथगवघातेन युज्यमानमुलूखलमुसलम्। पेषणेन युज्यमानं दृषदुपलम्। एवं सति विमोकोऽपि स्वस्वकर्मणोऽन्ते, उलूखलमुसलस्यावघातान्ते, दृषदुपलस्य पेषणान्ते। सैव कपालानां विकल्पना यथा त्वमग्ने इति। निरुप्तानामभिमृशति[९]। अध्वर्युरित्येके। हविष्कृतमाहूयमानं मन्त्रेण प्रत्युत्थाय मन्त्रेणैवोपविश्य त्रिष्फलीक्रियमाणानामिति। तण्डुलेषु प्रक्षाल्यमानेषु जपित्वा परिग्रहणयोः जपित्वा स्फ्य उदस्यमाने जपेत्॥ [ ३ ]

अध्वर्युणा जप्यमान[१०] आज्यमसि इति निमीलयन्निवाज्यमवेक्षेत। तथाऽऽज्यग्रहानभिमन्त्र्य पवित्रयोरपिसृज्यमानयोः जपित्वा, बर्हिषि स्तीर्यमाणे जपित्वा, आस्तीर्यमाणां[११] वेदिमभिमन्त्र्य अस्मिन् यज्ञे इति परिधानारंभे जपित्वा, धत्त इत्यादींश्च परिधीयमानेषु जपित्वा, अग्निर्द्वेषांसि इत्यनुयुङ्क्त्वा, ऊर्ध्वयोः समिधयोरभ्याधीयमानयोर्जपित्वा, ध्रुवोऽसि इत्यादिभिर्वाच्यमानोऽपि

१. M Ad साधनात्. २. M Ad B °कल्पं. ३. M Ad B °न्नासित्वा°. ४. M Ad B त्रिष्कमसकृ°. ५. M Ad B संसाधय°. ६. M Ad B आसीता. ७. M Ad B °साध°. ८. M Ad B तालयो°. ९. M Ad B °प्तानभिमृ°. १०. M Ad B °मानम्. ११. M Ad B °स्तीर्यमा.

परिधीनभिमन्त्र्य मध्यमं परिधिमन्वारभ्याग्नियोगं जपित्वा, तिरश्च्योः साद्यमानयोर्जपित्वा, यन्मे अग्ने इति [१]प्रस्तरमासाद्यमानमभिमन्त्र्यायं प्रस्तरं जपति। सर्वासु स्रुक्षु[२] प्रस्तरे साद्यमानास्वयं[३] मन्त्रः। नैकस्यामित्येके। [४]जुह्वामासाद्यमानायामुपभृति ध्रुवायां च अग्नेरहम् इत्यादिमन्त्रत्रयं जपित्वा यन्मे अग्ने इति मिथः स्रुचोऽभिमृश्यासन्नानि हवींष्यन्यानि च अयं यज्ञः इति संसन्नं यज्ञं यज्ञसाधनानि हवींष्यभिमृशति। अध्वर्युरित्येके। अग्ने देवेद्ध इतीध्ममाधीयमानम्। प्रत्याहवनीयमभिमन्त्र्य उच्छुष्मा इति वेदेनोपवीज्यमानम्। पूर्वस्मिन्नाघारे प्रजापतिं देवतात्वेन सङ्कल्पयेत्। सर्वेषु प्रदानेषु देवता ध्यातव्याः। आख्याता आध्वर्यवे[५] देवताः। मनोऽसि इति पूर्वमाघारमभिमन्त्र्य अग्नौ संसृज्यमाने अग्ने वाजजित् इति जपित्वा, वागसि इत्युत्तरमाघारमभिमन्त्र्याध्वर्युप्रवरे अमर्त्यस्य ते होतर् इति जपेत्॥ [४]

देवाः पितरः इति च। अहं देवेषु इति चाश्राविते ब्रूयाद्, अहं मनुष्येषु इति प्रत्याश्राविते। यज इत्युक्ते हविषां देवान् इति। ये यजामहे इत्युक्त्वा यथाभागं देवता इत्युक्त्वा वषट्कृते देवतां ध्यात्वा प्रतिमा तिष्ठ[६] इत्युक्त्वा प्रथमे प्रयाज[७] एकं प्रयाण इत्यनुमन्त्र्य वसन्तमृतूनाम् इत्यनुमन्त्रयते॥ [५]

एवं सर्वेषु प्रयाजेषु अमुष्य इत्यत्र द्वेष्यस्य नाम गृह्णाति। तथा असौ इति। सर्वत्र वषट्कारप्रदानेषु यत्र चाश्रावणादयो विद्यन्ते तत्र सर्वत्र निमित्तमङ्गीकृत्यानुमन्त्रणानि प्रवर्तन्ते। प्राशित्रमवदीयमानम् अग्निर्मा दुरिष्टात्पातु इत्यभिमन्त्र्य आज्यायो यवमात्रात् इति जपेत्। इडायामवदीयमानायां मनुना दृष्टाम् इति प्रति हविर्जपित्वा इडामाह्रियमाणामनुमन्त्रयते सुरूपवर्षवर्ण इति। अवान्तरेडामवदीयमानां रन्तिरसि इति। अथागत्येडामन्वारभ्य जुष्टे जुष्टिं तेऽशीय इत्युपांशु। उपाशीयमानाम् उपहूतः इति श्रुत्वा वायुष्टेऽवतु इति वायुं ध्यात्वा सा मे सत्याशीः इति अभिमन्त्र्य ओम् इति त्रिरुक्त्वा उपहूतः पशुमानसानि इति व्याहृत्य, यथेतं प्रत्येत्य यजमानायतन उपविश्य बर्हिषदमष्टाकपालं कृत्वा ब्रध्न पिन्वस्व इत्यनुमन्त्रयेत। अपि वा नीचा हस्तेन तमभिमृश्य जपेत् आयुषः क्लृप्तिः इति। अथोत्तान[हस्तेन][८] ब्रध्न पिन्वस्व इति। अथ आग्निर्मा दुरिष्टात्पातु इति

१. M Ad B प्रस्तरासाद्य°. २. M Ad सुस्रु स्रुक्षु. ३. M Ad B साद्यस्वयं. ४. M Ad B जुह्वां सा°. ५. M Ad B चाध्व°. ६. M Ad B तिष्ठप°. ७. M Ad B याज. ८. M Ad B broken.

पूर्वस्मिन्। अग्नीध्रीयावदानेऽभिधाय उपहूतो द्यौष्पिता **इति जपित्वा** सविताऽघशंसात् **इत्युत्तरस्मिन्।** सविता माऽघशंसात् पातु **इति सानुषङ्गेण।** उपहूता पृथिवी माता **इति जपेत्। इडां प्राश्यावमार्जयते**[1]॥ [६]

बृहस्पतिस्तनुताम् **इति। सादितमन्वाहारमभिमन्त्रयते** प्रजापतेर्भागोऽसि **इति।** मनो ज्योतिः **इत्यनुमन्त्र्याथानूयाजान्** बर्हिषः **इत्यादिभिः। अथाध्वर्युणा सह स्रुचावत्यूह्य**[2] **उज्जितीरनुमन्त्र्य** आशास्तेऽयं यजमानः **इति श्रुत्वा** एमा अग्मन्नाशिष **इति जपित्वा** रोहितेन त्वा **इति प्रस्तरं प्रह्रियमाणमनुमन्त्र्य** [. . .][3] **अथात्रैव [वाऽऽसीनो]**[4] **दक्षिणेन गार्हपत्यमासीनः पत्नीसंयाजाननुमन्त्र्येडां प्राश्य मार्जयित्वा प्राडेत्य ध्रुवामाप्याय्य समिष्टयजुर्हूयमानं** देवा गातुविदः **इत्यन्वारभ्यान्तर्वेद्यासादितासु प्रणीतासु** [सदसि सन्मे][5] भूयाद् **इति जपित्वाऽञ्जलावानीताभिर्हस्तौ प्रक्षाल्य [अथाप आचम्यापो न्युप्य**[6]] सदसि **इति पूर्णपात्रेऽभिधाय** प्राच्यां दिशि देवा **इत्यञ्जलावानीताभिरद्भिर्यथादिशं मार्जयित्वा** आपो हि ष्ठा मयोभुव **इति तृचेनातिशिष्टा आत्मनोऽञ्जलावानीताभिर्मुखं संमृष्टे** समिन्द्र णः, सं वर्चसा **इति। अथोपो[त्थाय दक्षि]**[7]**णं वे[द्यन्तमनु विष्णुक्रमान्,]**[8] विष्णोः क्रम **इत्यादि**[9]**[ना। य]दि चतुर्थेन मन्त्रेण चेत्, तिर्यक्**[10] **कृषेत गोमतीं जपित्वा।** अयमात्मीयाद् गृहादनपायिनमिच्छन्तमुपवेषमाहर **इत्युक्त्वाऽनेनाहृतमुपवेषं** यं देवा मनुष्येषु **इत्यादयः। मन्त्रेण शाखामूलेनोपवेषोऽन्तरेण त्रिभिर्मन्त्रैः** येन संप्र **इति,** उपप्रेत **इति उपेत्य,** अव सृष्ट **इत्यवसृज्यापः परिषिच्याप्रतीक्षमागत्य व्रतं विसृज्य समिधमाधाय प्राण्यापान्यापानेनात्मानमन्तरतः पूरयित्वाऽऽह** इदमहं सत्यादमृतमुपैमि **इति। दक्षिणत उपविश्य** इदं हविर् **इति पयः पीत्वा यथा समुदिता ब्राह्मणाँस्तर्पयेत्**॥ [७] [इति चतुर्थोऽनुवाकः।[11]] इति याजमानं समाप्तम्॥

## [अथ पञ्चमोऽनुवाकः[12]]

### [ अथ ब्रह्मत्वम् ]

**ब्रह्मा स्नातः शुचिवास**[13] **आचान्तः** भूपते **इति यजमानेन वृतो** अहं भूपतिर् **इति जपित्वा प्रयुज्य अजिनं वासो वा यज्ञोपवीतं कृत्वा आपोहिष्ठीयाभिराचम्य**

१. M Ad B प्राश्यवमा°. २. M Ad B स्रुचान्यूह्य. ३. M Ad B broken. ४. M Ad B broken. ५. M Ad B broken cf. VādhŚS 3.6.19. ६. M Ad B broken. ७. M Ad B broken. ८. M Ad B broken. ९. M Ad B broken. १०. M Ad °तिर्यक्. ११. M Ad B om. १२. M Ad B om. १३. M Ad B °वाससा.

व्याहृतीभिः परिमृज्य प्रजापतिः प्राची दिग् इति जपित्वा [१]प्राण्यापान्याग्निग्रहणमन्त्रद्वयं जपित्वा हस्तौ संमृश्य बृहस्पतिर्ब्रह्मा इत्यन्तरा वेदिं चोत्करं च प्रत्यङ् प्रपद्यापरेण वेदिमत्याक्रम्य दक्षिणं वेद्यन्तमनु गत्वा दक्षिणेनाहवनीयं प्रबाहुगिध्मसदन उपस्तीर्णानां शुष्काग्रं वा प्रतिच्छिन्नाग्रं वा मन्त्रेणादाय निरस्य अप उपस्पृश्य मन्त्रेणोपविश्य देव सवितर् इति जपति। असौ इत्यत्रात्मनो नाम गृह्णीयात्। प्रणय यज्ञम् इत्युपांशु जपन् प्रणवादिप्रसवमुच्चैर्ब्रूयात्। एवं सर्वेषु प्रसवेषु मन्त्रवत्कर्मसु येन केनचित् क्रियमाणेषु तस्य तस्य कर्मण आ समाप्तेर्वाग्यमः[२]। प्राशित्रमुभाभ्यां हस्ताभ्यां प्रतिगृह्य वेद्यां सादयित्वा अङ्गुष्ठोपकनिष्ठिकयाऽतिहाय दन्तान् मन्त्रेण जिह्वामूले निदध्यात् ब्राह्मणस्योदरेण[३] इति सहाद्भिः गिरति। अग्रेण दक्षिणजान्वेतां दिशं प्राचीमुदीचीं प्रति संक्षालं निनयेत्। प्राणाः स्वमन्त्रैर्यथालिङ्गम्। अरिष्टा विश्वान्यङ्गानि इति चोदितेषु स्थानेषु वाचयित्वा यथार्थमाभाषेत। वाग्यमनकालेऽपि यज्ञसिद्ध्यर्थमन्तर्हन्वेव ब्राह्मणेन संभाषेत॥ [१]

समिष्टयजुरन्ते यथेतं निष्क्रम्यापरेण गच्छेत्। शकलौ प्रास्य[४] वरुणविमोचनं कृत्वा यथार्थं गच्छेत्। एतेनैव विधानेन दर्शपूर्णमासविकाराणामपि ब्रह्मत्वं कुर्यात्। चातुर्मास्येषु तु वरुणप्रघासेषूभौ वेदी अत्याक्रम्यापरेण गच्छेत्। प्रणीतयोरग्न्योर्मन्त्रेणोपविशेत्[५]। उभयोः प्रणीतयोरूहेन प्रसौति प्रणयतं, वर्धयतं, धत्त। इमां प्रणय इति। नास्त्यूहोऽध्वर्युरेव प्रणयेदित्येके। परिग्राहप्रसवं चोहेत्। वेदिं प्रिया स्योना नो स्तम्[६]। अनन्तरयोरुपस्थयोः अपां परिगृह्णीतम् इति। बृहस्पतिः परिगृह्णीतम्[७] इति केचिदूहन्ति, अध्वर्युपरतां बृहस्पतिशब्दस्य मन्यमानाः। पितृयज्ञे पितृशब्दोऽन्वासङ्गः। कर्मणे वां देवेभ्यः पितृभ्य इत्यूहेत्। बृहस्पतिर्ब्रह्मा [स यज्ञं पातु][८] स यज्ञपतिं पातु स मां पातु यज्ञन्यम् इति। अपरेण पितृवेदिमत्याक्रम्य दक्षिणेन दक्षिणाग्निमुपविश्य देव सवितर्[९] ओमहं मानुष इति। प्रणीतासु प्रसवे प्रणय यज्ञं देवताः पितॄन् वर्धयैतेन नाकस्य पृष्ठ अस्तु सप्तर्षीणां यज्ञं च धेह्योम् प्रणय इति। परिग्राहे प्रिया देवानां पितृणाम् इति पितृशब्दोऽन्वासङ्गः। पक्षे विपर्ययेणाग्निं गत्वोत्तरतः उपविशेत्। अनुयाजेषु प्रसवे स यज्ञं पाहि स पाहि मां पाहि यज्ञन्यम् इति त्र्यम्बकैः प्रचरद्भिः सह

१. M Ad B °पान्यग्नि°. २. M Ad B °वान्यमः. ३. M Ad B ब्रह्मणस्यो°. ४. M Ad B प्राश्य. ५. M Ad °णो.... शेदु°; B णोशेदु. ६. M Ad वेदिप्रियस्येनेन स्ताम् [B °प्रीय°]. ७. B गृहीतम्. ८. M Ad B om. ९. M Ad B सवितरेतः.

**गच्छेत्। पशौ त्वपरेण वेदिमत्याक्रामेत्। प्रणीतेऽग्नावुत्तरवेदिमपरेणात्याक्रम्य मन्त्रेणोपविशेत्। प्रसिद्धमितरत् सर्वत्र कृत्वा कृतमन्वीक्षमाणः। यद्दक्षिणत एव स्यात् तत्रोक्तं च करोति॥** [२]

**मैत्रावरुणदण्डे वाचनं, पशोर्मृत्यवे नीयमानस्यानुगमनं,** रेवतीः **इति वपाश्रपणीभ्यामन्वारम्भः। संज्ञप्यमाने पशौ पुनरेत्य पृषदाज्यावेक्षणे वाचं यत्त्वा पशुमनवेक्ष्यासनम्। संज्ञप्ते पशौ** शमितार उपेतन **इति पुनः पशोरुपायनम्;** उर्वन्तरिक्षमन्विहि **इति पुनर्वपानुगमनं, वपाश्रपण्योः पुनः** अन्वपा रमयन्तु[१] गाव **इति मन्त्रं सन्नमयेत्।**[२] **वपान्ते चात्वाल आपोहिष्ठीयाभिर्मार्जनं पृषदाज्यरक्षणं पशुपुरोडाशस्य परिहृतस्य मनसा प्राशित्रप्राशनम् आप्राणसंमर्शनाद्भिः प्राशनम्। हृदयशूलप्रचार इति प्रायश्चित्तहोमश्च सर्वे ब्रह्मणः। अध्वर्युरेवेत्यपरे॥** [३] इति पञ्चमोऽनुवाकः[३]॥ इति ब्रह्मत्वं समाप्तम्॥

**[॥ इति पुरोडाश्याख्यः प्रपाठकः समाप्तः ॥]**[४]

---

१. Ad रस°. २. The text beginning with अथ हुतेऽग्निहोत्रे [M. 414, line 15; Ad p. 837, line 5, B p. 243, line 10] and ending with तिसृभिराहवनीयोपायनं [M p. 416, line 1, Ad p. 839, line 10; B p. 244] does not belong to *Brahmatva*. It is rather related to the *Vaiśvadevaparvan* under *Cāturmāsya*. So that text has been shifted to its proper place, i.e. *Cāturmāsya* (p 28, line 4, p. 29, line 1). The text, covering about four lines given after तिसृभिराहवनीयोपायनम् in the above MSS, deals with the *Brahmatva*, hence it follows after 'अन्वपा रमयन्तु गावः' इति मन्त्रं सन्नमयेत्. With this description ends the *Brahmatva* of the present text. ३. M Ad B Anuvāka number not given. ४. M Ad B om.

[1]॥ अथ तृतीयः प्रपाठकः॥

## ॥ अथ चातुर्मास्यानि॥[1]

[2][अथ प्रथमोऽनुवाकः]

### [वैश्वदेवपर्व][2]

शिशिरादौ वनमुपोष्य तेषु तरुणदर्भेषु संजातेषु फाल्गुनशुक्लचतुर्दश्याम-ग्निहोत्रोच्छिष्टमातच्य निदधातीत्यादि प्रतिपद्यन्त इति केचित्। पञ्चदश्यामित्यपरे। अस्मिन् पक्षे यजनीयेऽहनि वैश्वदेवश्च पौर्णमासी च स्याताम्। तत्राग्निहोत्रोच्छिष्टमातच्य[3] निधाय यज्ञोपवीत्यप आचम्य तीर्थेन प्रपद्य प्राण्यापान्य प्रजापतिः प्राची दिग् इति यज्ञपुरुषाय नमस्कृत्याभ्याधायोत्परेत्य[4] पलाशशाखामाच्छिनत्ति। तत्र इषे त्वोर्जे त्वा इति प्राकृतस्योपलक्षणम्। एवं वायव स्थोपायव स्थ इति सन्दिग्धेष्वेकमित्यपरे[5]। प्रस्तरमात्रं प्रसूमयम्। अन्येषु मुष्टिष्वनियमाः। त्रेधा सन्नहनं तूष्णीं, समस्तसन्नहनं समन्त्रकम्। तदुपगूहनान्तं कृत्वा प्रसिद्धमारम्भणीयाया बर्हिर्लुनाति। तत्रार्वाक् परिदेशनातन्त्रम्। ततश्चोद्यमानादिसादनान्तं मन्त्रविपरिणमनं[6] च। मन्त्रं पुरुषसंस्कारं चाभ्याधानं च वचनात्। अथ परिस्तरणादेरान्तादावृत्तिः। अग्निं होतारम् इति वाचयित्वा प्राणग्रहादयो व्याख्येयाः। व्यावर्तने यथाभागं व्यावर्तध्वम् इति दक्षिणपिण्डं विच्छिन्द्यात्[7] अथेतरो यथाभागं व्यावर्तेथाम् इति। एवं पुरोडाशग्रहणे[8] सर्वत्र

---

१-१. M Ad B None of the MSS mentions the serial number of the *Prapāṭhaka.* Instead following benedictory verse—

शोभनश्रुतिशरीरशिल्पवित्कल्पसूत्रकृदनल्पबन्धवे।
श्रोत्रियाय शिवशब्दसमुदितश्रोणनामपरिशोभिने नमः॥

is given. This verse, in no way, is from the pen of the author. Most probably, this verse belongs to the copyist who himself composed it in the honour of Śivaśroṇa, the author of the *Prayogakḷpti*, highlighting the excellent knowledge of Śrauta rituals of the author. After the benedictory verse the title of the Chapter is wrongly given as अथ पितृयज्ञः प्रारभ्यते instead of 'अथ चातुर्मास्यानि प्रारभ्यन्ते'. As the topic, dealt here, belongs to the Cāturmāsya rituals, I have accordingly given the title as 'अथ चातुर्मास्यानि'. २-२. M Ad B om. ३. M Ad B °मासच्य. ४. M Ad B °त्पत्यै. ५. M Ad B सन्दिग्धेष्वेवमि°. ६. M Ad B °परिणांश्च. ७. M Ad B °पिण्डमवि°. ८. M Ad B °गणे.

चरु इत्यूहः। यन्म अग्ने इति हवींष्यभिमृश्य प्राणग्रहांश्चोत्तरांश्च[१] पृश्नींश्च व्याचक्षीत। दश-होतारं[२] चतुर्होत्रर्थं प्रत्याम्नातः। संस्थितायामारम्भणीयेष्ट्यां[३] वेदं कृत्वाऽभि-मन्त्र्याग्नीन् कृत्वा परिस्तीर्य दोहनाय गा आयतीः प्रतीक्षमाणः इह वो विश्वेदेवा इति। [४]अथ हुतेऽग्निहोत्रे प्रसिद्धं दोहयेत्। पात्रासादनकाले[५] वाजिनपात्रमा-मिक्षापात्रमाशयपात्रं च सादयेत्। अविकृत्या प्रोक्षणमन्त्रः, न वा। नाग्नेय-विकारेषु जुष्ट-शब्दं स्वे स्वे स्थाने चरुस्थालीमपिश्रित्य तिरःपवित्रमप आनीय मारुतस्य कपालान्यभिधायामिक्षापात्रमधिश्रित्य तिरःपवित्रं प्रातर्दोहमानयेत्। स्वयैव स्थाल्या शृतमधिश्रयेत्। एककपालं पुरोडाशमात्रमुपदध्यात्। पुरोडाशं कूष्माण्डमात्रं कुक्कुटाण्डमात्रं वा, यथाप्रकृति वा। चरव्यानपयच्छन् पृथक् पौष्णस्यापयच्छति। पुरोडाशार्थान् पिष्ट्वा तूष्णीं पौष्णान् पिंष्यात्। अपेषणं पौष्णस्यैके। मारुतमधिश्रित्य तप्ते पयसि शृताप्ये सायंदोहं दध्यानीय उद्वास्याग्निनाऽऽमिक्षां श्रपयित्वा वाजिनं कृत्वा प्रतापे निदधाति। मेक्षय चरून् इत्यूहेत्। अलङ्कुर्वन्त्यानुपूर्वं हवींषि गन्धपुष्पेनाज्येन वा। भूयसोपस्तरणं चालङ्कारः। स्वरूपापादनं वा सर्वेषां हविषाम्। उपस्तीर्णाभिघारितामामिक्षा-मुद्वासयति कांसे[६] वा चमसे वा। दारुपात्र्यामेवेत्यपरे। तथा कांसे वा चमसे वोपस्तीर्यैकैकं पात्रमुद्वास्याभिघार्य बह्वानीयापिपृष्ठं कुर्यात्। समभिघार्य [७]हवींष्याहृत्य सादयेत्। सान्नाय्यमन्त्रद्वयेनामिक्षां सादयित्वा आमिक्षा मयि श्रयताम्, मां धिनोतु इत्यभिमृशेत्। विकल्प इत्येके। श्रुतमन्त्राभ्यामेवेत्यपरे। वाजिनमाधायोत्करे विशये वा सादयेत्। निर्मन्थ्येन चरति॥ [१]

शकलादानादिनाऽभिहोमान्तेन उपांशुधर्मः। सावित्रश्च एककपालश्च त्र्यवत्तश्चैककपालकेऽस्यानुमन्त्रणं प्राकृतं प्रत्यानमेत्। समुच्चय इत्यपरे। [८]अनुयज्ञैः इत्याध्वर्यवमित्यन्ये। पर्यावृत्तं पुरोडाशं स्रुचा[९] सादयेत्, न हस्तेन। याज्यानुवाक्याभ्यां प्रत्यृचमभिहोमः। ताश्चतस्र आहुतयः। आमादेककपाल-स्येडामप्यवद्येत्। सन्ततिमनु विष्टम्भान्वारोहान्। आच्छिद्रिकोपादानपक्षे अनाज्ञातम् इति तिस्रः स्रुवाहुतीरनु वाजिनस्य। प्रणीताभ्य उपस्तरणाभि-

---

१. M Ad B °पनग्रहाश्चोत्तरश्च पृश्नीन्. २. M Ad B दशहो [B °होतु]. ३. M °मरंभणी°. ४. The text beginning with अथ हुतेऽग्निहोत्रे and ending with तिसृभिराहवनीयोपायनं, as referred to in f.n. 3 on p. 26, has been wrongly put under *Brahmatva* due to displacement of folios. I have given this text here as it deals with the *Vaiśvadevaparva*. ५. M Ad पात्रसदन°; B पात्र सा°. ६. M Ad B कः सो. ७. M Ad B हविष्या°. ८. M Ad B अनुयज्ञेरि°. ९. M Ad B स्रुचं.

घारणेनोपारंभः। उप त्वाग्ने दिवेदिवे इति तिसृभिराहवनीयोपासनम्[१]। स्तरणा-भिघारणे इत्यपरे। अन्तर्वेदि तिष्ठन् वाजिभ्य आश्रावयेत्। दिग्भ्य[२] उच्छेषयेत्। दिशो हुत्वा भक्षायोच्छिनष्टि। किञ्चिदुपादाय घ्राणभक्षं[३] भक्षयेयुः सर्वे[४]। यजमानः प्रत्यक्षं भक्षयेत्॥ [२]

संस्थामनु [हविषो निवर्तयते][५]। तस्य पौर्णमासान्ते वा निवर्तनम्। लोहितायसस्ताम्रमय अयोविकारः कश्चिदित्यपरे। वपनमेव परिवर्तनम्। वपनार्थो विभागः केशानाम्। शलल्यैवेत्यपरे। समानेऽहनि वैश्वदेवपौर्णमासौ पञ्चदश्यां वैश्वदेवस्य काले। पौर्णमास इत्यपरे॥ [३] इति प्रथमोऽनुवाकः॥

## [अथ द्वितीयोऽनुवाकः]

### [ वरुणप्रघासपर्व ]

सर्वेषु पर्वसु [अर्धकक्षमुपो][६]षति। ग्रीष्मे वरुणप्रघासार्थं कक्षमुपौषत्, शरदि साकमेधार्थम्, यथार्हं शुनासीरीयाय। वैश्वदेव एव प्रसूनियमो, नोत्तरेषु पर्वस्वित्यपरे। चतस्रश्च स्थाल्यो दोहनार्थाः। यज्ञायुधानामेकतयाधिकानि[७] दक्षिणविहारार्थानि। तान्येतानि भवन्ति — स्फ्यश्च वैकङ्कतश्चाग्निहोत्रहवणी[८]-श्च शूर्पञ्च शमीपर्णानि च करीरसक्तवश्च मेष्यै च लोमानि मेषस्य च।[८]चतस्रो यथाप्रकृतीत्यपरे। आज्यस्थाली इध्मानां द्वावग्निप्रणयिनीयौ यवाः करम्भपात्रं मेषमेष्यार्थाः। ऐषीकं शरमयं, करीरसक्तवः करीरफलानि चूर्णीकृतानि, मेषमेष्योर्लोमानि नानैव निधेयानि वरुणप्रघासार्थम्। श्वोऽषाढाभिः पौर्णमासीत्यग्निहोत्रोच्छिष्टमातच्य[९] निधाय शाखामाहृत्य वत्सानपाकृत्य बर्हि-र्द्वयमध्वर्यवे लुनीयात्। वचनादन्यतस्तूष्णीम्। तल्लक्षणं विहारार्थम्। अथेध्मद्वयं सन्नय्य शाखापवित्रं निष्पाद्य वेदौ कृत्वाऽभिमन्त्र्य गार्हपत्यं चान्वाहार्यपचनं च परिस्तीर्य गा आयतीः प्रतीक्ष[ते। एता मरुतो][१०] वरुणश्च रमयन्तु गाः इत्यूहित्वा

---

१. M °योपायनम्, B °योपानयनम्. २. M Ad B दिग्य. ३. M Ad B °पक्षं. ४. M Ad B सर्व. ५. M Ad B broken; thus VādhŚS 4.4.21. ६. M Ad B broken; cf. VādhŚS 4.1.1. ७. M Ad B केतयादनि. ८-८. M Ad B होत्र . . . ण्याक . . . चतस्रो. cf. VādhŚS 4.5.2 ९. The text beginning with च्छिष्टमातच्य निधाय शाखामाहृत्य [M p. 435, line 18; Ad p. 874, line 1; B p. 261, line 3] and ending with 'होतुराहुतौ हुतायाम्' [M p. 440, line 11; Ad p. 882, line 1; B. p. 265, line 4] due to displacement of folios, is given under Paśubandha in all the MSS. Actually, it belongs to the *Varuṇapraghāsa*, so it has been placed here at its proper place under *Varuṇapraghāsa*. १०. M Ad B broken.

हुतेऽग्निहोत्रे दोहमारभेत बहु दुग्धि इत्यातः। प्राङ् मारुत्याः कृत्वा वारुण्याश्च करोति। तदेव पवित्रमुद्धाय तावान् मारुतं चाननुसृजेत्। अथ बहु दुग्धि मरुद्भ्यो वरुणाय हविः इत्युक्त्वा वत्सेभ्यो देहि इत्यादि प्रतिपद्यते। विप्रुषा-मनुमन्त्रणतन्त्रं संक्षालनान्तम्[१]। पृथगामन्त्रणश्चावर्तते[२]। तथाभिद्योतनप्रत्यानयने तन्त्रम्। पर्यग्निकरणं प्रतिष्ठापनं तु युगपदेव यथासम्भवम्। आतञ्चनं पृथगेव मन्त्रस्यानावृत्तिः। तथा पात्राभ्यामभिधानतन्त्रम्। तथा प्रातर्दोहं दोहयित्वा पूर्वेणाहवनीयं त्रयोदशाङ्गुलान्तराले वेदिं मिनुयात्॥ [१]

तयोः पशोरुत्तरा दार्शिकी दक्षिणा पाशुक्या समानायामा पशुबन्धस्येव चात्वालोत्करौ। तन्त्रमुक्तम्[३]। तयोः स्तम्बयजुषी हविष्यसौ[४] वेदाभ्यां वेदी संमृष्टस्तूष्णीं प्रतिप्रस्थाता। एवं सर्वत्र सहक्रियायां स्तम्बयजुराज्यग्रहणमेव प्रतिप्रस्थातृकर्मणा। तूष्णीकत्वमित्येके। वेदिं मिमाय स्फ्यदानात्प्रभृति प्रागुत्तरस्मात् परिग्रहात् कुरुतः। [५]अध्वर्युरेव करणं जपति। संनमयन् इमे नराः कृणुत वेदी एत्य इति। हर इति चाह सर्वत्र। प्रतिवचनाश्रावणप्रैषाः सहक्रिया-मध्वर्योरेव। गच्छन्नागच्छंश्च प्रतिप्रस्थाताऽध्वर्युं परिगृह्णीयात्। अपरेणात्मान-मुत्तरेणाध्वर्युं, प्रतिप्रस्थातारमपरेणोत्तरवेदिमध्वर्युं च प्रतिप्रस्थातुः संचारः।[५] पशाविवोत्तरस्यां वेद्यामुत्तरवेदिं न्युप्य शूर्पेणावतृणैर्वा प्रच्छाद्याध्वर्युरुत्तर-वेदिकस्यावृता प्रहरति। षड्ढोतृहोमवर्जमधर्मकं प्रतिप्रस्थाता दक्षिणस्यां वेद्याम्। सधर्मकमधर्मकमित्यपरे। अपरेणोत्तरवेदिं परीत्यान्तरेण वेदी प्रत्यङ् गत्वा-ऽपसलैः पर्यावृत्य दक्षिणमिध्मं सादयित्वा प्रावृत्य यथेतं गच्छेत्॥ [२]

एवमुपयमनीहरणं चाधर्मकम्। पक्षे सधर्मकत्वेऽप्युपयमन्यसन्नोपस्नान-मतिमुक्तयश्चेत्येतावान् प्रतिप्रस्थाताऽध्वर्युश्च[६] वैतमूहेन्न किञ्चिदधर्मकत्वे। अथ तावग्नी परिस्तृणीतः। अग्रेणाग्नीदध्वर्युः[७] दर्भान् परिगृह्य, दक्षिणमग्निं प्रतिप्रस्थाता परिस्तृणीयात्। अथाग्रेण गार्हपत्यं तृणानि संस्तीर्य तेषु यथास्थानं[८] पात्राणि सादयतः — स्फ्यं प्रोक्षणीपात्रं स्रुवं स्रुच आज्यस्थालीमामिक्षापात्रं वेदमिति। प्रतिप्रस्थाता आमिक्षाश्रपणीं च केचित्। अध्वर्युरेवोभयानि पात्राणि सादयित्वा सहैव प्रोक्षेदित्येके। पञ्चहोतुरित्येके। अध्वर्युरेव यवोदनं मृदित्वा तेन [९][प्रति]पुरुषं करम्भपात्राणि करोत्येकमतिरिक्तम्, यावन्तो गृह्या भवन्ति। गृह्याः

---

१. M संक्षालयविमर्ज्य, Ad संक्षालविमात्रर्वर्ज्य, B संक्षाल विमर्ज्य; thus VādhŚS 4.5.23.
२. M Ad B पृथगाममन्त्र॰. ३. M Ad B ॰मुत्करः. ४. M Ad हरिष्यसौ. ५-५. M Ad B text beginning from अध्वर्युरेव to संचारः repeated. ६. M Ad B ॰स्थातरध्वर्युश्च. ७. M Ad B ॰णाग्नीन्दध्वर्युः. ८. M Ad ॰स्थं. ९. M Ad B om प्रति; cf. VādhŚS 4.5.40.

पिता पुत्रा भ्राता चाप्रत्ता दुहितारश्च[१]। अविभक्ताः सपिण्डा इत्येके। कल्याणकर्मणः सपिण्डा इत्यपरे। यवोदनेन मृदितेन मेषीमध्वर्युः करोति, मेषं प्रतिप्रस्थाता। लोमानि चाश्लेषयतः। अध्वर्युरेवोभयं कुर्यात्। अथ कपालोपधानाद्यध्वर्युः प्रतिपद्यते। वेदौ सवेदौ परिवासय इति मन्त्रसन्नामः। प्रतिप्रस्थाता पवित्रे आदाय प्रोक्षणीः संस्कृत्य पात्राणि प्रोक्ष्य प्रोक्षणीशेषं निधायैन्द्राग्नकपालोपधानानन्तरं तिरःपवित्रं पय आनीय मारुत्यर्थमधिश्रित्यैन्द्राग्ने अधिश्रित्य[२] दध्यानीय मारुतीमामिक्षां परिश्रपयेत्। अथाध्वर्युर्वारुणीश्रपणादि प्रतिपद्यते। हविर्भिः सह करम्भपात्राण्यपि पर्यग्निकुर्यात्। प्रतिप्रस्थाताप्याज्यानि[३] निरुप्याधिश्रित्य पर्यग्निकृत्वोपास्ते। अथाप्यग्निनयनान्त उभौ स्फ्यावादाय परिग्रहणयोयोपने[४] कुरुतः। अध्वर्युरेवावस्कम्भनं प्रैषं च। प्रैषानग्नीत्[५] कुर्यात्। प्रतिप्रस्थाता स्वयंमेव दक्षिणविहारे। पत्नीसंबन्ध एवाग्नीत् कुर्यात्॥ [३]

साऽप्युभयमाज्यमवेक्षेत। अग्नेर्जिह्वाऽसि इत्यध्वर्युणावेक्ष्य प्रतिप्रस्थातावेक्षेत। मेषमेष्यौ शमीपर्णानि करीरसक्तूंश्चामिक्षापात्रयोरेवावदध्यात्। शतादधिकानि शमीपर्णान्येकैकस्मिन् पात्रे निवपेत्। नवाजिनद्वयमेकस्मिन् पात्रे कृत्वा निधाय[६] सादयेत्। ध्रुवा असदन्, यन्म अग्ने पञ्चहोता इत्युभयोः। पञ्चहोता अध्वर्योरेव इत्यपरे। निर्मन्थ्योऽध्वर्योरेव। अध्वर्युरेव संप्रैषमाह— अग्नीभ्यां समिध्यमानाभ्यामनुब्रूहि इति। यथाप्रकृत्येव प्रेष्येन्नैवोहेदित्यपरे। सन्नाम एव ज्यायान्। एवं सर्वत्राग्न्यभिधायिनां वा शब्दानाम्। उच्छुष्मो अग्ने इत्युभयोः। पत्नि कति ते जाराः इति पृष्टा यावन्तो जारास्तेषां संख्यां निर्दिशेदेक इति वा, त्रय इति वा। संख्यां निर्दिश्य असौ मे जारः इति। पुनस्तेषां नामानि निर्दिशेत्। अथ यं द्विष्यात् तं वरुणो [७]गृह्णातु इति[७] ब्रुवन् प्रतिप्रस्थाता यजमानेन द्वेष्यान् जारान्[८] ध्यायति[९]। न वा पत्नीं पृच्छन्ति। करम्भपात्राण्येकातिरिक्तानि कृत्वा हरति। यद् ग्रामे यदरण्ये इति याज्यामुभौ दम्पती ब्रूयाताम्। ब्रुवन्तीं पत्नीं वाचयेत् अनुच्छिन्दञ्छिरसः शूर्पम्। स्वाहाकारान्ते करम्भपात्राणि वरुणाय हुत्वा शूर्पमनु प्रास्येत्। ततो दम्पती अक्रन् कर्म इति यथास्थं[१०] स्थानं नयति यजमानायतनम्[११]। यजमानं जघनेन गार्हपत्यं[१२] यथेतम्। संमार्ष्ट्यग्नीदग्निं[१३] दक्षिणम्। अग्निजघनेनोत्तरवेदिं गत्वा यथास्थं स्फ्येध्मसन्नहनम्।

---

१. M Ad B दुहितरश्चा°. २. M Ad °न्द्राग्नेऽधि°. ३. M Ad °ज्यान्निरू°, B °ज्यानिरू°. ४. M Ad B °योर्योपने. ५. M Ad B °ग्नीन्. ६. M B विधाय, Ad निधाय. ७-७. M गृह्णाति, Ad गृह्णानि. ८. M दारान्. ९. M Ad B जायति. १०. M Ad B यथास्वं. ११. M Ad B °यतना. १२. M Ad B गार्हपत्नीं. १३. M Ad B °मार्ष्ट्यग्निन्द°.

**अध्वर्युरेव प्रवरं प्रवृणीते** अग्नी देवौ होतारौ देवान् यजेतां विविद्वांसौ[१] चिकित्वदा च वहताम् **इति**॥ [४]

**प्रत्याश्रावणादौ साधारणकर्मण्यौत्तरविहारिकमेव स्फ्यमग्निं धारयेत्। अध्वर्योरेवाश्राव्य प्रेष्येत्। अभिघारणात्[२] प्राङ् मेषमेष्यौ व्यतिहरणम्। उपभृत्यन्ततः[३] प्रतिप्रस्थाताऽभिघारयति।** अनुब्रूहि **इति वाऽध्वर्योरेव। आज्यभागयोर्यजति च। एवं सर्वत्र सहक्रियां स्वाहेत्यनुमन्त्रणमुभयोरेव। अध्वर्योरेवेत्यपरे। उपवेशनं व्यापारादुपरमा ऐन्द्राग्नादित्यभिविधिः। न शमीवर्जं करीरसक्तूनां शेषकार्याणि विद्यन्त इत्यपरे। दारूणि जघनेनोत्तरां वेदिमाहृत्य तस्यां निधाय स्विष्टकृतमवदाय यथेतमाहृत्यायतने सादयित्वैवमेवाहृत्येडामवद्येत् प्रतिप्रस्थाता। सोऽपि हस्तादुद्गतं गन्धमाघ्राय प्राणेन मार्जयते। सन्नह्याद्यध्वर्योरेव[४]।** ब्रह्मन् प्रस्थास्यामः समिधावाधायाग्नीदग्नी सकृत्सकृत् समृड्ढि **इति प्रेष्येत् सूक्तवाकाय च। अथ** इदं ब्रूहि **इति।** अनुप्रहर संवदस्व **इत्यग्नीत्।** अगा३नग्नीत् [५]श्रावय स्वगा दैव्या होतृभ्यः[५] **इत्यध्वर्योरेव। बर्हिरनुप्रहरणाभ्युपयो वाजिनभक्षान्त उभौ होत्रे दत्तः। पत्नीसंयाजाद्यध्वर्योरेव। ध्रुवाऽऽप्यायनात् फलीकरणहोमं चाज्यस्थालीभ्यां चतुर्गृहीतं गृहीत्वा सर्वफलीकरणानोप्योभयानीध्मप्रवृश्चनान्यभ्याधाय जुहुयात्। उभयोः पृथगेव फलीकरणहोम इत्येके। तन्त्रमेव ज्यायान्। तुल्यैषा [६]नारिष्ठहोमानां विकल्पना। ध्रुवाऽऽप्यायनादि स्रुचः[७] सम्पद्यते तथा कल्पयेत्। तथा सत्रकर्ममध्येऽग्निहोत्रं हुत्वा ... न्येकं प्रथमे पर्याये द्वे मध्ये द्वे उत्तमे इत्येके**॥ [५]

[८]**प्रणीताप्रणयनमध्वर्योरेव। अथवाऽवभृथपात्रसादनादि प्रतिपद्यते। पात्राणि स्फ्यमग्निहोत्रहवणीं स्रुवं जुहूमाज्यस्थालीं वेदमिति। सादयित्वा पवित्रे** आदाय यजमान वाचं यच्छ **इत्युक्त्वा** कर्मणे वाम् **इति हस्तौ मार्जयित्वा प्रोक्षणीः संस्कृत्य पात्राणि प्रोक्ष्याज्यं निरुप्य पर्यग्निकृत्वा स्फ्येनावस्कभ्य संप्रेष्यति** स्रुवं च सुचश्च संमृड्ढि **इति। अथवा स्रुवं च स्रुग्जुहूमाज्यस्थालीं वेद-**

१. B °द्वांसोचिकित्वा. २. M Ad B अभिकार. ३. M Ad B उपभृत्यव्यन्ततः. ४. Ad °ह्याध्व°. ५-५. M Ad °स्वगदैव्याहृतभ्य, B °हत्यभ्य. ६. M Ad नारिषुगोमानामविकल्पना. ७. M Ad स्रुगः. ८. The text beginning with प्रणीतानिनयनमध्वर्योरेव [M p. 441, line 13; Ad p. 883 line 13; B p. 266 line 2] and ending with आ गच्छेयुः [M p. 443, line 1; Ad p. 886, line 2; B p. 267, line 6] has come wrongly under *Paśubandha*, due to displacement of folios. Actually, it belongs to the remaining part of the *Varuṇapraghāsa*, and *Anīkavatīṣṭi*, hence it has been placed here at its proper place.

मिति। संमृज्याज्येनोदेहि इति प्रैषेत्। अथ पञ्च स्रुवं च संमृज्य पत्नीमवेक्षयेत्। अथाध्वर्युरग्नीत्सहितोऽन्वीक्ष्य यजमानं चावेक्षणं वाचयित्वाऽऽत्मनश्छायामवेक्ष्योत्पूय[१] स्रुवमाज्यस्थाल्याज्यं निष्कासतुषानित्यादीनादायावभृथं[२] गच्छेद् उरुं हि राजा इत्येतामु च त्रिरनुब्रुवन्। अत्र पत्नीयजमानावूर्णासूत्रमये[३] मेखले तूष्णीं पर्यस्येते[४]। अभिहोमो जुह्वा[५]सद्याज्यस्थाल्य अवदाय अपूर्वेणेत्येके। चतुर्गृहीते जौह्वैर्मन्त्रैर्ध्रुवैराज्यभागयोस्तूष्णीमुपस्तरणाभिघारणे कुर्यात्। अग्नीवरुणाभ्यां समस्यनिष्कासान् सकृदवदाय द्विरवघारणम्। सकृदेवेत्येके। द्विरिति ज्यायान्। अनूयाजार्थं चतुर्गृहीतं तूष्णीमर्धस्रुवैः। ब्रह्मन् प्रस्थास्याम इत्येतावदुक्तं [६]प्रवत्स्यतोऽनुयजति॥ [६]

[७][प्रव]सेतापीत्यपरे। देवौ यज यज इत्याद्यैः यज इत्येवेतरस्मिन् किन्दून्बिन्दून् संप्रकिरति। तुषादुत्तरसिचावुत्तरीये वाससी दम्पत्योरध्वर्यू न्यस्यतः वासोभ्यामप्सु न्यस्ताभ्यामुभौ स्वयमेव स्वके शरीरे अभिनि[वेष्टयेते दशामेखले स्व][८]यमेव विस्रंसयेते। [९]पृष्टीर्धावतः पृष्ठे शोधयतः। [प्रतिप्रस्थाता][१०] उन्नयति तीरत आगमयति। एकैकां समिधं बहुसमित्प्रमाणां कुर्वाते[११]। तथैवाभ्याधत्तः एनौ दम्पती स्वं स्वमग्निम्। उपस्थापयत्यध्वर्युः। पूर्वमग्निमौत्तरवेदिकं विसृजति। शकलयोः संभारे नह्य पशाविव॥ [७] इति द्वितीयोऽनुवाकः॥

## [अथ तृतीयोऽनुवाकः]

### [ साकमेधपर्व ]

#### [अनीकवतीष्टिः]

सायमग्निहोत्रं हुत्वाऽभ्याधानप्रभृत्याप्रणीताभ्यां कृत्वाऽऽदित्योदयमाकांक्षेत्। उद्यता गभस्तिमताऽनीकवतस्यारभेत। अपि वा यत उदयत उदयेन प्रधानया गच्छेयुः।

#### [गृहमेधीयेष्टिः]

[१२]. . . . वपायोगो वा प्रहरणकाले परिधीन् निवर्तयति, पृथक् प्रेरयति। शयं बर्हिर्यथास्तीर्णमेव शाययितस्य। [१३]आगृहमेधीयसमाप्तेर्न समिष्टयजुषा सहानु-

१. M Ad B ॰वेक्ष्यात् पूय, [B ॰यूय]. २. M Ad B तुषानित्यादियावभृथं. ३. M Ad B ॰माना पूर्णा॰. ४. M Ad B पर्याग्नीस्वेते. ५. M Ad B जुह्वासद्यादा॰. ६. M Ad B पास्यतोनु॰. ७. M Ad B broken before सेवापी॰. ८. M Ad B broken. cf. VādhŚS 4.8.34. ९. M Ad वृष्णिर्धा॰. १०. M Ad B om; cf. VādhŚS 4.8.36. ११. M Ad B कुर्वते. १२. M Ad B the opening part of the *Gṛhamedhīyeṣṭi* is broken. १३. M Ad B मागृह॰.

प्रहरणाः। अथ गृहमेधीयस्य सायमभ्याधाय प्र [. . .][१] त्यवे [२][. . . अभि]-मन्त्र्याग्नीन् परिस्तीर्य वेदमभिमन्त्र्य स्फ्यमग्निहोत्रहवणीं स्रुवं जुहूमुपभृतमाज्य-स्थालीं चरुस्थालीं मेक्षणमिडापात्रमोदनोद्धरणाय दारुपात्रीं चेति पात्राणि सादयित्वा [३]ब्रह्माणमत्र मन्त्रेणोपवेशयेत्। सति वेदिकरणे पवित्रे आदाय यजमा[न . . .][४] मा त्वा कर्मणे हस्तौ वर्जयित्वा प्रोक्षणीः[५] संस्कृत्य पात्राणि प्रोक्ष्य सर्वासां स्वानां गवां दुग्धे सम्यगवहितैस्तण्डुलैर्गृहमेधीयतण्डुलाभ्यादानं[६] श्रपणमाज्यं[७] निरुप्याधिश्रित्य पर्यग्निकृत्वा वेदिं करोति॥ [१]

बर्हिष[. . . .][८]स्तम्बयजुर्हरेद् उद्धननकर्मवर्जम्[९]। नैव वेदिकरणमित्येके। भाव एव ज्यायान्। प्रोक्षणीरासादय स्रुवं स्रुचौ संमृढ्याज्येनोदेहि इति प्रैषः। स्रुवं च स्रुचौ च संमृज्य सादयित्वा पत्न्यवेक्षितेनाज्येनोदेत्याथ अग्नेर्जिह्वासि इति चावेक्ष्य यजमानमेवेक्षमाणं [. . . .][१०] मवेक्ष्योत्पूय शृतस्योदनस्य त्रीन् [११]राशी-नुपस्तीर्णाभिघारितान् उद्धरति पात्रत्रये। दारुपात्र्यामित्येके। प्रथमोद्धृतं व्यूहमदधानं कृत्वा श्लक्ष्णीकृत्य तत्र ध्रौवैर्मन्त्रैश्चतुर्गृहीतं गृह्णानश्चतुर्थे स्रुवे भूय आनयेत्। इतरयो[१२][रुप]सिञ्चेत्। अथ वेदिं प्रोक्ष्य[१३] निनीय प्रोक्षणीशेषमुदूह्य प्रोक्षणीपात्रं यथास्थानं परिधीन् निधायाग्नियोगं कृत्वा तूष्णीं स्रुचौ सादयित्वौदनान् सादयन् ध्रुवामन्ते[१४] प्रथमोद्धृतं मध्यत आसादयेत्। तूष्णीं दक्षिणतश्चोत्तरतश्च . . .[१५] ध्रुवाभाजनमभिघार्य दक्षिणेन ध्रुवाभाजनं मन्त्रेण स्रुवं सादयित्वा ध्रुवाभाजने चातिरिक्तमुत्तरेण वेदं सादयित्वा व्रतमुपैति॥ [२]

ध्रुवासन्नां विष्णो पाहि, यन्म अग्न इति ध्रुवाभाजनमभिमृश्य तत्र चतु-र्होतारं सग्रहं व्याख्याय उच्छ्र[यणे-][१६]नोपावाज्य[१७] अग्नीदग्निम् इति प्रेष्य संमृष्टेऽग्नौ प्रवरं प्रवृत्य अश्विनावध्वर्यू इत्यश्विभ्यां ब्राह्मणेभ्यश्च नमस्कृत्या-ज्यभागादि प्रतिपाद्य, तेन नमस्कार इत्येके। प्राक्स्विष्टकृत्संस्रावाभिहोमात् सर्वान् परिधीन् सह संगृह्य तूष्णीमनुप्रहृत्य तान् संस्राव्येडामनुपस्तीर्णा-भिघारितामवदायोपहूतायामिडायामुत्तरमोदनमग्नीधे समस्तमुपोहेत्, नावद्येत्। दक्षिणं ब्रह्मणे परिहरति। स्थाल्यामवशिष्टमध्वर्युयजमानौ नियोगतः प्राश्नी-याताम्। अन्य ऋत्विजो ब्राह्मणाश्च यथाकामम्। अन्यपक्वं पत्नी प्राश्नीयात्।

१. M Ad B broken. २. M Ad B broken. ३. M Ad B ब्राह्मण°. ४. M Ad B broken. ५. M Ad B णी. ६. M Ad B मेधीभ्यादा. ७. M Ad B श्रपयन्नाज्यं. ८. M Ad B broken. ९. M Ad B उद्धननक . . . नवार्जं. १०. M Ad B broken. ११. M Ad द्राशी, B दशि. १२. M Ad B broken. १३. M Ad B प्रेक्ष्य. १४. M Ad B ॰मन्त्रे. १५. M Ad B broken. १६. M Ad B broken. १७. M Ad B नोपलाज्य.

यजमानश्च गृह्या भृत्याश्चाञ्जनाभ्यञ्जनादिभिरभिपूजिता आशिता गायन्तो हसन्तश्च क्रीडमाना एतां रात्रीं जाग्रयति स्वाद्वन्नं भुञ्जाना पिबन्तश्च। वत्साश्चैतां रात्रीं मातृभिः सह वासयेयुः। आज्येनानीय प्रयन्ते। निहितं यजमानः स्वयमेवैतां रात्रीं रक्षेत्। औषसमग्निहोत्रं हुत्वा दर्विहोमिकमाज्यं संस्कृत्य स्रुवं च दर्वीं च संमृज्य तस्यामुपस्तीर्य निष्कासेन दर्वीं पूरयित्वाऽभिघार्य जुहोति। यजमानस्य रवथे रु-शब्देन[१] साकं [. . . .][२]ख्यातम्। अतिमुक्त्यन्ते महाहविषस्तन्त्रमुपक्रमेत। ऋजु शेषः॥ [३] इति तृतीयोऽनुवाकः॥

## [अथ चतुर्थोऽनुवाकः]

### [ पितृयज्ञः ]

अथ पितृयज्ञः प्रारभ्यते। अम्बरीषं भर्जनपात्रमभिवान्याऽन्यवत्सा[३] यस्या नास्ति स्ववत्सः इक्षुशलाका[४] च मूलच्छिन्ना वेदिर्दक्षिणाग्नेर्दक्षिणपूर्वस्यां दिशि तल्प्यावकाशा तत्प्रमाणा पुरुष[संमिताप्र-][५]वति दिशि [६]चतुःस्रक्तिः सर्वतः समान्वेक्षणा च[७] क्वचित् प्रवणा द्राघीयान् प्राकृतात् प्रादेशप्रमाणात् कशिपुस्तरिर्याकार[८] उपबर्हणं शिरोपधानं दर्भमये वा भाक्ते।

अथ प्रयोगः। गार्हपत्यान्वाहार्यपचनयोरभ्याधाय[९] बर्हिः संभरेत् समूलम्। देवस्य त्वा इत्यभ्रिमादाय देवेभ्यः पितृभ्यो जुष्टं देव[ानां पितॄणां परि]षूतं[१०] देवेभ्यः पितृभ्यस्त्वोर्ध्वबर्हिभ्यः इत्येवं सर्वत्राङ्गं प्रधानार्थेषु स्वार्थे देवशब्दे पितृशब्दमन्वासंजयेत्। यथाप्रकृत्येवेत्येके। अन्वासङ्ग एव ज्यायः। अवढति मा रिषम्[११] इत्याच्छिनत्ति। यथाप्रकृत्येवेत्येके। तदेव ज्यायः[१२]। नास्ति प्रच्छेदनाभिमर्शनमित्ये[के। प्रणी]यमाणो[१३] यजमानशब्दमपोहेत्। वेदोऽसि विन्द पुष्टिम् इति दक्षिणेन गार्हपत्यं तृणानि संस्तीर्य तेष्वेकैकशः पैतृयज्ञिकानि[१४] यज्ञायुधानि सादयेत्। षट् कपालान्यम्बरीषं च मन्थपात्रं च सादयेत्। धानापात्रं च। पात्र्यामेके धाना उद्वासयन्ति। पवित्रादानं कृत्वा अपः प्रणे[ष्यामि, वाचं][१५] यच्छ इत्येव ब्रूयात्। अथैनाः प्रणीय पैतृयज्ञिका वेदेरुत्तरतः सादयेत्। यथा वेदिमध्ये सादितस्याग्नेः। प्रबाहुग् उत्तरतो ब्रह्मयजमानौ दक्षिणाग्नेरभितः प्रणीताः।

---

१. M Ad B शब्दे. २. M Ad B broken. ३. M Ad °वान्यान्य वत्सां. ४. M Ad B इक्ष्वाकुशलाका. ५. M Ad B broken. ६. M Ad B om चतुः. ७. M Ad B समान्वः. ८. M कशिधास्तरि. Ad कश्चिद्यास्तरिद्याका. ९. M Ad °पचयोर°, B °पचनोर°. १०. M Ad B देव . . . ष्कृतं. ११. B रिषीमीत्या°. १२. M Ad B न्याय. १३. M Ad B broken. १४. M Ad B °यज्ञिका यज्ञा°. १५. M Ad B broken.

ब्रह्मयजमानौ च प्रागग्निप्रणयनात्। प्रणीतेऽग्नौ तस्याभिहिता भविष्यन्तीत्येके। ऊहेन हस्तौ संमृज्याग्निहोत्र[हवण][१]यां दक्षिणतः प्राचीनावीती[२] सोमाय पितृमते व्रीहीन् निर्वपेत्। यज्ञोपवीतीत्येके॥ [१]

पितृभ्यो बर्हिषद्भ्यो यवान्। पितृभ्योऽग्निष्वात्तेभ्यश्च यवानेव। वैश्वानरं ज्योतिः इत्याहवनीयं परेक्षते। अन्वाहार्यपचनमित्येके। प्रहरिष्यमाणमभिध्याय-तीत्यन्ये। अतीत्य [. . . .][३] या भावाल्लुप्यत इत्यन्ये। आदित्यास्त्वा[४] इति दक्षिणतः सादयेत्। दक्षिणत एवावघ्नन्ति। न यवानामवघातोऽनवहता एव भर्जनीयाः[५]। सकृदवहत्यान्तरेण त्रिष्फलीक्रियां भर्जनीया इत्येके। अवघातपक्षे प्रागावपनात्[६] तन्त्रम्। कृष्णाजिनादानादि ऊर्ध्वं च हविष्कृदाह्वानात्। [दक्षिणार्धे][७] कपालान्युपधाय दक्षिणार्धे दक्षिणाग्नेरम्बरीषं प्रथमेन कपालमन्त्रेणैवोप्य यवान् भर्जयति। तेषामर्धाः फुल्ला धाना भवन्ति। सक्तूनितरान् धानान् कुर्वन्ति। तान् पुरोडाशीयपेषणानन्तरं पिनष्टि। तत्र कृष्णाजिनादानात्प्रागधिवपनात् तन्त्रम्। कालेऽम्बरीषाधिश्रयणमात्रं कृत्वाऽधिश्रिते पुरोडाशयवानोप्याम्बरीषे तान् भृष्ट्वा फुल्लानर्धानां धानार्थान् निधायार्धान् सक्त्वर्थान् पिनष्टि। पूर्वतनपक्षो ज्यायान्। प्राक् पेषणादुत्तरार्धे गार्हपत्यस्य प्रतिपुरुषं [८]स्त्र्यम्बका[नवघ्नन्त्ये-][९] ककपालम्। तूष्णीं श्रपयेत्। प्रतिपुरुषमिति व्याख्यातम्। अथ पुरोडाशीयान् पिष्ट्वा सक्तून् पिंषेत्। पुरोडाशमधिश्रित्याज्येन धानाः संयुवन्ति। अभिवान्यायै दुग्धेऽर्धपात्रे सक्तूनोप्य शलाकया सकृदुपमथ्य सर्वाणि हवींषि पर्यग्निकुर्यात्॥ [२]

पत्नीवर्जं प्रेष्येत्। [१०]उ[त्तर]तोऽग्नौ प्रोक्षणीरिध्माबर्हिश्च सादयेत्। तदा-नीमेवान्वाहार्यपचने स्रुचः संमृज्यात्रैव सादयित्वा पत्न्यनवेक्षितेनाज्येनोदेत्याधि-श्रित्यान्वाहार्यपचनस्यान्ते सादयेत्। अथ अग्नेर्जिह्वासि इत्यवेक्ष्य[११] यजमान-मवेक्षमाणं वाचयित्वाऽऽ[१२]त्मनश्छायामवेक्ष्यो[दीचीनाग्राभ्यां पवित्राभ्यामाज्य-मुत्पूय][१३] उपभृति द्वे षट् गृह्णीते। एकमित्येके। द्वे इति ज्यायान्। सर्वत्रान्त्यस्य मन्त्रस्यावृत्तिः। अत्रैवाज्येन सादयित्वा पुरोडाशमुद्वास्यान्वाहार्यपचनस्यार्धं हरेत्। [१४]आज्यानि धानाश्च[१४] संयुतांस्तत्समीपे हरेत्। तथा मन्थं पुरोडाशोद्वासना-

---

१. M Ad B broken. २. M Ad B ॰वीति. ३. M Ad B broken. ४. M Ad B अदित्यात्वे॰. ५. M Ad B ॰नीयः. ६. M Ad B वाशावपनात्. ७. M Ad B broken. ८. M Ad B त्र्यम्ब॰. ९. M Ad B broken. १०. M Ad B broken. ११. M Ad B ॰सीर्यवेक्ष्य. १२. M Ad B ॰त्मनच्छाया॰. १३. M Ad B ॰क्ष्योत्. . . . ताग्नि उप॰. १४-१४. M Ad B ॰ज्यनाधानेश्च.

**नन्तरम्।** [. . . .][१] **द्वा सादयेत्। यथार्थं तन्त्राणामूहः। तथा सति मन्त्रस्योपस्तरण-मधस्तादुपाञ्जनं चार्थलुप्ते। उभयोश्च भस्मोदूहनम्**[२]**। धानानां तूहो, न मन्त्रस्य।** स्योनं वः सदनं करोमि[३] = सीदतामृते[४] प्रतिष्ठित, यवानां मेधाः सुमनस्यमानाः, आर्द्राः प्रथस्तनवो भुवनस्य = [५]जनयित्र्यो मतीनाम्, सुरूपा वो वसुविदः पशूनां तेजसा पितृभ्यो बर्हिषद्भ्यो जुष्टा अभिघारयामि, आत्मन्वत्यः सोम घृतवत्यो हि भूत्वा पितॄन् गच्छत सुवर्विन्दत[६] = कामान्। **नानाग्नेयविकारस्येदमभिघारणमित्येके।** खमङ्ध्वं [७]त्वचमङ्ध्वम् **एव** आत्मानं पशुषु प्रविष्य[स्तमङ्ध्वम्][८] आत्मानं वर्षप्रविष्टंस्तमङ्ध्वम् **इत्येके। न चास्य मन्त्रस्य ऊह इहेत्यपरे।** स विन्दति लोकम् **इति सर्वत्र यजमानशब्दमपोहेत्। भर्जनानन्तरमेवोभयमम्बरीषान् मन्त्रेणोद्वासयेदित्येके। अर्थलुप्तमुभयस्य मन्त्रेणोद्वासनमित्यपरे। आच्छिद्रिको-पादानमत्र क्ष** [. . .][९] **नादग्निं** [. . .][१०] **वेद्यै सादयित्वोपसमाधाय तस्या स्तम्बयजुः मनसा मन्त्रमनुद्रुत्य हरेत्। अपरेणाग्निं बर्हिर्निधाय प्रहरेत्। तस्या एवोत्तरत उत्करः।**[११] **प्राकृत एवोत्कर**[१२] **इत्यपरे। प्राकृतत्वेऽग्रेणाहवनीयं हरेत्। अपरेणेत्येके॥** [३]

**सर्वेषां द्रव्याणामृत्विजां**[१३] **यजमानस्य** [. . .][१४] **ननं वर्जयित्वेत्येके। एतदेव ज्यायः। अथोदकुम्भमाहृत्य दक्षिणेंऽसे निदधाति। प्रोक्षणीश्चाहृत्यास्याग्नेरपरत आहृत्य। यद्यग्नेरुत्तरतो बर्हिरिध्मं तु पृथक् पृथक् सादयेत्। अत्रैव प्रोक्षणी-रासादयेदिध्माबर्हि** [. . . .][१५] **कः। अथ** प्रोक्षणीरासादय **इत्याद्यास्त्रुग्व्यूहनात् करोति, धरुणप्रोक्षणवर्जम्। अथोदकुम्भमादाय परिषेक्ता कश्चन बलवान् परिषिञ्चन्नपसलैस्त्रिरग्निं पर्येति। निधाय यथायतनं कुम्भं प्रतिपथं त्रिः पुनः परिद्र[वति। मुष्टिनाऽभिच्छादयति]**[१६] **प्रस्तरं सकलं बर्हिः स[कलम्]**[१७]। उरु यज्ञाय **इत्यादिभिर्मुष्टिमभ्यन्तरतः[परि]**[१८]**स्तृणन् पर्येति बर्हिः।** उरु [यजमा-नाय][१९] **इति द्वितीयं बर्हिः।** तत उरु [यज्ञपतये][२०] **इत्येव तृतीयम्। तृतीयेन सह प्रस्तरादन्यत् परिसमापयेत्।** [२१]**एतदेव त्रिवृतत्वम्**[२१]**। निधाय प्रस्तरं प्रतिपथं त्रिः**

---

१. M Ad B broken. २. M Ad B भस्मेदू. ३. M Ad B abr. ४. M Ad B सिद॰. ५. M Ad B abr. ६. M Ad B abr. ७. M Ad B तच॰. ८. M Ad B broken. ९. M Ad B broken. १०. M Ad B broken. ११. M Ad B उत्तर. १२. M Ad B उत्तर. १३. M Ad B ऋत्युजां. १४. M Ad B broken. १५. M Ad B broken. १६. M Ad B broken. १७. M Ad B broken. १८. M Ad B om. १९. M Ad B om. २०. M Ad B om. २१-२१. M Ad B ॰देवास्त्रिवृत्वं.

पुनः परिद्रुत्य प्रस्तरमादाय [१][प्राडुत्सृप्य परि]धीन् परिधाय परिधिषु वाचयित्वाऽग्निं युक्त्वा परिहाप्य तिरश्च्योः सादनम्। अपरेणाग्निं तूष्णीं प्रस्तरं सादयित्वा स्रुगादीनि सादयेत्। तत्र स्वैर्मन्त्रैः स्रुचः सादयित्वाऽथेतराणि यथास्थानमासाद्य ध्रुवा असदन् इति स्रुचोऽभिमृश्य यन्म अग्ने इति हवींष्यभिमृश्य [२][षड्ढोतारं व्या]ख्याय स्रुवेणानुपूर्वं हवींष्यभिघारयन् यजमान-शब्दमपोहेत्। धानासु पूर्ववदूहः। दक्षिणेन ध्रुवायामरिक्तं ध्रुवायां सादयित्वा वेदं सादयन् यजमानशब्दमपोहेत् स विन्दतु लोकम् इति॥ [४]

अथास्मात्[३] समिधमाधाय अग्नये देवेभ्यः पितृभ्यः समिध्यमानाय इत्युक्त्वा [. . . .][४] वः समिधेभ्यो दध्यात्। तृतीये प्रयाजे[५] सर्वं[६] समिधेभ्यो दधाति। अनूयाजसमिधमतिशिष्याद्[७]। वेदेनोपवाजयन् यजमानशब्दमपोहेत् उच्छुष्मो अग्न एधि इति। आघारप्रभृति समानमेतावदेव। नानाऽग्नीदग्निं सकृत्सकृत् संमृड्ढि इति प्रैषः। यज्ञपतिशब्दमपोहेत्। [८]आ श्रावय इत्याश्राव्य[८] सीद इत्येतावत्प्रवरो होतुर्वचनं च नास्तीति। त्रीन् प्रयाजानिष्ट्वोपभृत्यर्धं समानीयोत्तमं प्रयाजं यजति। परिश्रयन्ति यथा परिश्रयणस्यान्तर्वर्तिनः सर्वे कर्तारः स्युः। अतिचङ्क्रम्य पुनरत्याक्रामति। अनु स्वधा कुरु इति तृतीयमक्षरं प्लवते। आ स्व[धा इति आश्राव्य][९] द्वन्द्वे अस्तु स्वधा इति। तृतीयमेव ये स्वधा इति आद्यस्वधा नमः इति चाद्या। स्वाहा इत्यनुमन्त्रणमन्त्रो लुप्यत इत्येके। स्वधा नमः इत्यनुमन्त्रयत इत्यन्ये। यथाप्रकृतीत्यपरे। मध्येऽपसव्यं मण्डलाकारं प्रधानाहुतीर्हुत्वा अग्निं कव्यवाहनं[१०] दक्षिणार्धेऽतिहाय पूर्वार्धे [. . .][११] जुहोति। तान्यवघातान्यत्रैवोपपात्रे संप्रकिरति। मार्जयस्व इति च प्रैषोऽञ्जलौ चावदान-माध्वर्यवमितरत्सर्वं याजमानं बहुवचनश्रवणे सर्वे कुर्युः। ऋजुधा चरन्ति। दैववद्यथाप्रकृत्येवाश्रवणादि कुर्वन्ति। विपर्यन्ति। यथाप्रकृत्येव[१२] [प्रयाजा]नूयाजौ यजेत्। देवा यज यज इत्याद्ये यज इत्येवान्त्ये शयन्ते[१३] पत्नीरसंयाज्य[१४] समृद्धिहोमान्यृध्वा चेति। स्रुवाहुतीर्हुत्वा[१५] फलीकरण-होमाद्यर्वाक् ध्रुवाऽऽप्यायनं[१६] कृत्वा समिष्टयजुर्वर्जम्। स्रुक्संस्रावहोमान्तं

---

१. M Ad B broken before धीन् [MSS °धन्]. २. M Ad B broken. ३. M Ad B अथेस्मा. ४. M Ad B broken. ५. M Ad B प्रणयः. ६. M Ad B सर्वः. ७. M Ad B °धमिति°. ८-८. M Ad B शक . . . . श्रव्य. ९. M Ad B broken. १०. M Ad B °हन. ११. M Ad B broken. १२. M Ad B broken. १३. M Ad B शःयन्ते. १४. M B पतीरसं°, Ad प्रतीरसं. १५. M Ad B चाहुती°. १६. M Ad B °प्यायनात्.

**कृत्वा हविःशेषान्** [. . . .][१] **प्राजापत्ययाऽऽहवनीयस्यार्धमेति॥** [५] इति चतुर्थोऽनुवाकः॥

## अथ पञ्चमोऽनुवाकः

**पितृशब्दान्वासञ्जनपक्षेऽङ्गप्रधानार्थेषु देवशब्दे स्वार्थे पितृशब्दे अन्वासञ्जयेयुः। प्रधानार्थे देवशब्दे तस्य स्थाने पितृशब्दं प्रयुञ्जीरन्। अविकारो** [अ][२]**ङ्गार्थे। तद्यथा** देवेभ्यः पितृभ्यो जुष्टम्, [देवानां पितृणां][३] परिषूतम्, देवेभ्यः पितृभ्यस्त्वोर्ध्व[४]बर्हिर्भ्यः, देवपितृबर्हिर्भ्यस्त्वा[५], देवपितृबर्हिः शतवलिश, देवपितॄन्[६] गमयसि, यज्ञं तनुवै देवानां पितृणामात्मना, देवानां पितृणां ब्रह्मणा देवा **देवेष्वन्यार्थो देवशब्दः। नात्र पितृशब्दोऽन्वासङ्गः। अत्रापीत्येके।** कर्म[णे वः][७] पितृभ्यः शकेयम्, तं धूर्व, पितृणामसि सस्नितमं पितृहूतमम्, हुवे पितॄन् यज्ञियान् 'आयान्तु पितरः सुमनस्यमानाः'[८], 'नयन्तु[९] देवाः' **इत्यङ्गित्वादविकारः। विकार इत्येके।** इदं पितृणाम्, इदं पितृभ्यः, कव्यास्तृप्यन्तु, पितरः कव्यस्य मे। अन्यदेवायुवम् **इत्यविकारः।** देवपितृयुव **इत्यपि।** प्रियाय कर्मणे देवपितृयज्यायै पितृपीतये[१०] वः, स इदं पितृभ्यः कव्यं शमिष्व, पितृभ्यः शुन्धध्वम्, आ पितृयजं वह, आ देवपितृयजं वह **इत्येके॥** [ १ ]

निर्वपामि देवपितृयज्यायै, देवेभ्यः पितृभ्य ऊर्जे सीद, सुभूर्देवानां पितृणां धाम्नेधाम्ने, देवेभ्यः पितृभ्यः ध्रुवायाम्। प्रियं देवानां पितृणाम्, अनाधृष्टं देवपितृयजनम् **इति। उपभृत्येवमित्येके।** पितृणां विष्ठामनु, पितॄन् गच्छ देवानाम् **इति विक्रियेतेत्येके।** पयस्वती देवानां धेनुः, पृथिवि देवपितृयजनि, देवपितृयजनात् पृथिव्याः देवपितॄन्, बर्हिरूर्णाम्रदसं त्वा, स्वासस्थं देवेभ्यः पितृभ्यो युनज्मि त्वा [. . .][११] **न पित्रियेण**[१२] **हव्याय कव्याय चास्मै। पितृशब्दोऽन्वासङ्गः**[१३]**।** कव्याय च **इति नियोगतो वाच्यं सर्वत्रैव प्रधानार्थे। यथा** प्रियं देवानाम् **एवं** प्रिया देवानाम् अग्नये, देवेभ्यः पितृभ्यः **इति** योगतः सिद्धम्। एवं देवान्, पितॄन् हविष **इति। पितृशब्दोऽन्वासङ्गपक्षे। एवं** देवान् पि[तॄन् हविष इत्य][१४]ङ्गविकार **इत्येके ह्वयति।** देवपितृयज्यायै **नात्र विकार इत्येके। एतदेव**

---

१. M Ad B broken. २. M Ad B broken. ३. M Ad B om. ४. M Ad B broken. ५. M Ad B °बर्हिर्मात्वा. ६. M Ad B पितृं. ७. M Ad B broken. ८. M Ad B °मानां. ९. M Ad B नीयन्तु. १०. M Ad B °पितये. ११. M Ad B broken. १२. M Ad B °येणव. १३. M Ad B °ङ्गति. १४. M Ad B broken.

**ज्यायः।** ब्रह्म देवाः पितरोऽवीवृधन्, यं देवाः पितरः कल्पयन्। स्वाहाकृत्वाऽऽह त्रिरेकदेवान् पितॄन्॥ [२] इति पञ्चमोऽनुवाकः॥

## अथ षष्ठोऽनुवाकः

### [ चातुर्मास्ययाजमानम् ][१]

**अथ याजमानानि। आरम्भणीयवैश्वदेवयोस्तन्त्रेणान्वादधत्** अग्निं गृह्णामि **इत्यूहेत्। अद्य श्वो** यज्ञाय रमताम् **इति।** इमामूर्जं [पञ्च][२]दशीमारम्भणीयं वैश्वदेवहविरित्यूहेत्। **पृथगेवोहेत्। आरम्भणीय**[३] **अनुमन्त्रणानि** अन्नादो भूयासम् **इति पुरोडाशानां,** दब्धिरसि **इति चरोः। अथ** वैश्वदेवस्यान्नादो भूयासम् **इति। आद्यतृतीययोः** दब्धिरसि **इति चरूणाम्।** इन्द्रियाव्यन्नादो भूयासम् **इति मारुतस्य** [. . .][४] **इत्यामिक्षायाम्,** जेमानं महिमानं गमेयम् **इति महेन्द्रयाजिनामित्येके।** वृत्रहा भूयासम् **इत्येककपालस्य। सूत्रान्तराद्वा गमयित्वाऽन्यप्राकृतानामनुमन्त्रणमुपांशुयाजविकारवर्जम्। वाजिनयागोऽपूर्वसान्नाय्यविकार इत्येके। यजमानायतने [प्रागावृ]**[५]**त्त उपस्थं कृत्वोपविश्य वाच्यमानो वपनमन्त्रान् भूयाद्। देवव्रतानि चरन्नमांसमश्नाति, अन्यत्र यज्ञसदनात्**[६]**। न स्त्रियमुपैति, अन्यत्रर्तोः। पल्पूलनं रजकधवलिकरणम्। अधःशायीति खट्वादि प्रतिषेधः। प्रासादमञ्चादावपि न शयीतेत्येके**[७]**। अमृन्मयपायीत्यभ्यपहा**[८][. . . **उ]पलक्षणमिति क्षेमा। अशूद्रोच्छिष्टं प्रयच्छेदन्यात्मदासात्**[९]**। स्वयं पादौ प्रक्षालयेत**[१०]**, नान्येन पादप्रक्षालनं कारयेत्। भक्ताशी सकृदाशी। प्रथमे त्वेव संवत्सरे व्रतचर्या। यावत्प्रयोगमित्यपरे। वरुणप्रघासानामपि चातु[र्मास्येषु]**[११]**। तत्र** इमामूर्जं चतुर्दशीं वहतु वरुणप्रघासा हविः **इत्यूहः। पूर्वस्मिन् परिग्राहे द्विवदूहेत्।** शिवे च मे शं च मे स्तम्, स्योने च मे सुषदे च स्तम्, ऊर्जे सत्ये स्तम् **इति। दक्षिणस्या दक्षिणत उपवेशनम्। दक्षिणाग्निप्रणयनस्य सधर्मकत्वे** कविर्यज्ञस्य वित[नुतः पन्थां ना]कस्य=[१२] हव्यं वहथ याथ दूतावितः प्रचेता अमुतः सनीयांसौ[१३] **इत्यूहेत्॥** [१]

**उत्तरस्मिन् परिग्राहे[ऽनुमन्त्रण]**[१४]**मिति षट्कृत्वं** चतुःशिखण्डे युवती

---

१. MSS do not give the heading. २. M Ad B broken. ३. M Ad B °णीया. ४. M Ad B broken. ५. M Ad B broken. ६. M Ad °साध°, B °साधनं. ७. M Ad B शयित्येके. ८. M Ad B broken. ९. M Ad B °दासाय. १०. M Ad B °यत. ११. M Ad B broken. १२. MSS do not show sign of abridged text. १३. M Ad B सनीयसवि°. १४. M Ad B broken.

सुपेशसौ घृतप्रतीके [**भवनस्य मध्ये**][१] मर्मृज्यमाने [**महते सौभगाय**][२]मह्यं दुग्धं यजमानाय कामान् **इति योयोपने जपेत्। दुहाथाध्वर्योराज्यमवेक्ष्य प्रतिप्रस्थातुरपेक्षते।** पञ्चानां त्वा वातानाम्' **इति सर्वेष्वाज्यग्रहणानुमन्त्रणेषु** त्वा-**शब्दस्य स्थाने** वां-**शब्दं निदध्यात्।** इमौ प्राणौ चापानौ च यजमानमपि गच्छताम्[३]। यज्ञे ह्यभूवन् पोतार:[४] पवित्राणि हव्यशोधन[ानि **इति**][५] **विसर्गे जपेत्।** चतु:शिखण्ड **इत्युक्तम्।** वयुनानि वसतात् **इति स्तीर्यमाणे,** मे दुहाताम्[६] **इति स्तीर्णयोर्जपेत्।** दुग्धम् **इति वा;** धर्तारौ, धरुणौ, धरीयांसौ **परिधीयमानेषु।** अग्निर्भेषांसि **इत्यग्नियोगे।** यं वामग्नी पितरौ चरन्तौ अग्नी योनौ द्वेष्टि सौतानग्नी[न्][७]सन्दहताम् **इति समिधो नाराधीयमानयो:।** ध्रुवौ स्थ:[८], उग्रौ स्थ:, अभिभवौ स्थ **इति परिध्यनुमन्त्रणानि।** युनज्मि वां ब्रह्मणा[९] = जातवेदसौ; इन्धाना वां सुप्रजस:; पयो वामग्नी **इति पृथगेव मध्यमे परिधी अन्वारभ्य** आ नू ह **इति केचित्।** [. . . .][१०] **त्रिभि:** विशो[११] यन्त्राभि:, विशो यन्त्रा नुदमाना अराती:, सीदन्त्यो देव्य: सुकृतस्य लोके, धृत्य: स्थ विधृत्य: स्थ, प्राणान् मयि धारयत, प्रजां मयि धारयत, पशून् मयि धारयत **इति तिरश्चीषु साद्यमानासु।** यन्मे अग्ने **इत्यन्तरित्वाऽध्वर्यो: प्रस्तरं साद्य[मानासु]**[१२] **पुनस्तथैव जपेत्।** इमौ प्रस्तरावुभयस्य धर्तारौ प्रयाजानां तौ दधत, तयो: स्रुचोर् असि **इति प्रस्तरयो:;** जुह्वोरारोहतं पथो, जुहूरेव[१३]। हिरण्यपक्षे, अजिरे सा भृताङ्गे वहाथोम् **इति। उपभृतो:** अवभृद्भ्यां सपत्नान् **इति॥** [२]

[१४][. . . .]**ति।** यन्मे अग्न [अस्य यज्ञस्य][१५]रिष्याद् **इति जपित्वा ध्रुवाम्। अथ दक्षिणस्यामेव जुह्वोरुपभृतोश्चान्तत: पृषदाज्यग्रहण्यां हवि:षु च जपेत्। नैन्द्राग्नेन जपित्वा मारुत्या जपेत्। वारुण्यामन्तत:। संसन्नं यज्ञमभिमृशेत्। इध्मावाधीयमानावभिमन्त्रणे** [१६][उच्छुष्मा]वग्नी यजमानाय स्तं निशुष्मावभि-दासते **इति।** अग्ने वाजजित् **इत्यभ्यूह्यावर्त्य** मन: स्थ: प्राजापत्यं मनसा मा भूतेनाविशतम् **इत्याघारानुमन्त्रणम्।** वाक् स्थ ऐन्द्री सपत्नक्षयणी वाचा मेन्द्रियेणाविशतम् **इत्युक्तयोर्वाङ्मन:परौ मूर्धन्निप्रेव** [. . . .][१७] **उत्तरस्यां वेद्यां**

१. M Ad B om. २. M Ad B om. ३. M Ad B गच्छन्तु. ४. M Ad B पोतार. ५. M Ad B broken. ६. M Ad B दुह उताम्. ७. M Ad B broken. ८. M Ad B add ध्रुव: after स्थ:. ९. M Ad B ब्राह्म°; text abr. १०. M Ad B broken. ११. M Ad B पिशो. १२. M Ad B broken. १३. M Ad B जुहूदेव. १४. M Ad B broken. १५. M Ad B broken. १६. M Ad B broken. १७. M Ad B broken.

**स्रुचौ व्यूह्याथ दक्षिणस्यां व्यूहेत्।** रोहितेन वामग्निर्देवतां गमयतु, हरिभ्यां वामिन्द्रो देवतां गमयतु, [१]एतशेन वां सूर्यो देवतां गमयतु[२] **इति प्रस्तरप्रहरणानुमन्त्रणौ।** वेदौ स्थः वित्ती स्थः विदेय; कर्मणी [स्थः करुणे स्थः क्रि][३]यासम्; सनी[यांसौ][४] स्थः, सनितारौ] स्थः सनेयम्; [घृतवन्तं कुलायिनं रायस्पोषं सहस्रिणं][५] वेदौ दत्तां वाजिनम् [इति][६] **वेदानुमन्त्रणम्।।** [३]

**यथोक्तकाले तु शुनासीरीयं कुर्वन् यथोक्तं करोति।।** ४[७]।। इति षष्ठोनुऽवाकः।।

**।। इति चातुर्मास्ययाजमानं समाप्तम्।।**

**।। इति चातुर्मास्याख्यस्तृतीयः प्रपाठकः समाप्तः[६]।।**

१. M Ad B गमयित्वेतशे॰. २. M Ad B गमयित्विति. ३. M Ad B broken. ४. M Ad B broken. ५. M Ad B abr. ६. M Ad B om. ७. M Ad B put this Kaṇḍikā after इति चातुर्मास्ययाजमानं समाप्तम्. ६. M Ad not mentioned.

## [1] ॥ अथ चतुर्थः प्रपाठकः ॥

## ॥ अथ पशोर्याजनम् ॥

### अथ प्रथमोऽनुवाकः

[2] संवत्सरे द्विः सकृद् वा नित्येन पशुबन्धेन यक्ष्यमाणः प्रोष्ठपद्यां[3] माघ्यां वाऽमावास्यायां वे[दिं करोत्य][4]भ्यगारे। ततोऽन्यत्र वेदेरवसाय[5] यज्ञोपवीतं कृत्वा मन्त्रेणाचम्य प्राण्यापान्य[6] प्रजापतिः प्राचीर्दिक् इति जपित्वा तीर्थेन प्रपद्याग्नीन् विहृत्य यूपाहुत्या[7] सहापरेण[8] त्र्यरत्निं चतुररत्निं[9] वा पालाशं स्वाद्योनेरूढं बहुपर्णं [10]बहुशाखमसुषिरमक्रिम्णं परिष्वङ्गपराध्र्यप्रादेशावमपरि-[माणमनक्षसङ्गंवृ][11]श्चति यथा स्थानपक्षो न सज्येत। प्राञ्चं वोदञ्चं वा प्रप्रापयति पातयति। शाखानुगुण्येन[12] प्रसूदयति। प्रवृश्चति विगतशाखं करोति। यूपार्थत्वात् मन्त्र-स्यावृत्तिः। परिवासयति छिनत्ति। चषालच्छेदनेऽपि मन्त्रत्रयमिति। यूपं चषाल-शकलाभ्याच्छादने प्रथमशकलं यूपावटेऽव[दधाति][13], प्रथमशकलं स्वरु। स चाग्निष्ठाया निस्तक्षणीय इत्येके। अथ पिण्डपितृयज्ञं कृत्वा, इष्टिपक्ष इष्टिं कृत्वा वेदिं मिमीते रथावकाशाम्[14], रथप्रमाणाम्। अष्टाशीतितमाङ्गुल-पार्श्वमानीं च चतुःशताङ्गुलपश्चिमबाहुं षडशीत्यङ्गुलपूर्वरज्जुं, पूर्वरज्ज्वोर्मध्ये[15] यूपावटीयः शङ्कुः परिणाहाभ्यां मनागुपरमति। खनन्त्येके उपरविभागान्वयात्[16]। तां[17] विमाय समन्ततः स्पन्द्यया परितनोति। अथ तूष्णीं दक्षिणतो ब्रह्माण-मुपवेश्य तस्याः स्तम्बयजुर्हृत्वा[18] उत्तरस्मात् परिग्रहात् स्फ्यमुदपात्रमित्यादि प्रतिपद्यते। उत्तरेणाहवनीयमुत्तरस्माद्व्रेद्यन्ता[त् . . . .][19] चात्वालकालं शम्यामात्रं चात्वालात् परिणाहतो निम्नतश्च। तमपरेणोत्करः॥ [१]

अतः प्रभृति तयोरन्तरेणैव सर्वेषां प्रपदनं[20] निष्क्रमणं च वा। शम्यानिधाने मन्त्राः। अनुलेखन इत्येके। यूपावटीयाच्छङ्कोरर्धप्रक्रमे शम्यामात्री चतुःस्रक्ति-

---

१. None of the MSS gives the number of the Prapāṭhaka. २. M Ad B तथा. ३. M °पाद्यां. ४. M Ad B broken. ५. M Ad B वेदवसाय. ६. M Ad प्राणा°. ७. M Ad B °हुत्वा. ८. M Ad B सहोप°. ९. M Ad B चतुरेतिं. १०. M Ad B शाखानसु°क्रिणं. ११. M Ad B broken before श्चति [MSS °त्]; cf. VādhŚS 5.1.8-9. १२. M Ad B शाखानुपुण्येन. १३. M Ad B om. १४. M Ad B °काशाः. १५. M Ad B °रज्जो°. १६. M Ad B °राविभाभत्व°. १७. M Ad B कां. १८. M Ad B °यजुर्हुत्वा. १९. M Ad B broken. २०. M Ad B प्रवद°.

रुत्तरवेदिः। तत्र पु[रीषं][१] यजमानोऽन्वारभेत। मन्त्रं च ब्रूयादित्येके। मध्य उत्तरवेद्या न्युप्तेन पुरीषेणोत्तरनाभिं करोति सुष्ठु श्लक्ष्णामनग्नामप्रकाशाम्। ऊर्णास्तुका वेद्यन्तरा[२] शृङ्गयोरुपात्ता। यथोपपादमित्यपरे। पौतुद्रवाः परिधयः प्रादेशमात्राः, प्रोक्षण्यः, [३][पञ्चगृहीतमाज्यम्। षड्ढोतारं मनसाऽनुद्रुत्यान्वा]-ख्यातिं जुह्वदिध्ममभिजुहुयात्। निरुक्तायामाद्यायामृचीध्ममुद्यच्छन्ते परिकर्मिणः। एकस्फ्यया आग्नीध्रो यथालिङ्गमनुदिशमुत्तरनाभिं प्रोक्षति। व्याघरणानि सर्वाणि प्रागपवर्गाणि। मध्यापवर्गाणीत्येके। स्रुचमुद्गृह्णाति। ससंस्रावान् संभारान्नि-वपति। विनियुक्त [४][उपयच्छन्त्युप]यमन्यः सिकता प्रथमः। सीद योनिम् इत्युच्यमाने पुरस्तात्प्रत्यगावृत्त इध्मं सादयेत्। उपस्थानं[५] याजमानम्। आध्वर्यवमित्यपरे[६]। अग्निमुपसमाधायालंकृत्य तूष्णीं परिस्तीर्यातिमुक्तीर्जुहुयात्। अत्र प्राकृतमन्त्रं प्रक्रमे मध्यमवर्जम्। त्रीनग्नीनन्वाधाय व्रतमुपेयात्। अध्वर्युरन्वाहितेष्वेवाभ्याधाय बर्हिः संभृत्य प्लक्षशाखामिडसूनं[७] चोपकल्प्य वेदं कृत्वा परिस्तृणीयात्। आच्छिद्रिकोपादानपक्षे प्रातः स्तम्बयजुषो वेदकरणम-पकृष्येत। अथ पात्राणि सादयेत् स्फ्यं चाग्निहोत्रहवणीं [च][८] जुहूमुपभृतं च स्रुवं च स्वधितिं च प्रणीताप्रणयनं च सर्वार्थत्वे प्रणीतानाम् आज्यस्थालीं च वेदं च समिधश्च पत्नीसन्नहनं च वसाहोमहवनीं च प्लक्षशाखां चेडसूनं[७] च रशनाद्वयं च मैत्रावरुणदण्डं च हिरण्यशल्कांश्च[८] कुम्भीं च शूलं च वपाश्रपण्यौ च यच्चान्यदेवंजातीयकानि[९] सर्वाणि संसाद्य पवि[त्रेण . . . .][१०] ब्रह्माणमुपवेश्य सर्वार्थत्वे प्रणीतानां प्रणीताः प्रणीय, प्रणीताऽभावेऽपि यजमान वाचं यच्छ इत्युक्त्वा हस्तौ मार्जयित्वा [. . . .][११] पर्यग्नि कृत्वा दधि चोपनिधाय सहोत्तरपरिग्रहादि प्रतिपद्यते। यथासमाम्नातं प्रैषं प्रसि[द्धं . . . . ][१२]। स्रुवं संमृज्य स्रुवमन्त्रेण स्वधितिं संमृजेत्। स्वधितिरसि इत्यूहित्वा अथवा स्रुवस्वधिती जुहूपभृतौ प्रसिद्धं संमृज्य उपभृज्जुहूध्रुवासि इति ध्रुवामादाय प्रसिद्धं निष्टप्य प्रजां योनिं[१३] चक्षुः श्रोत्रं गोष्ठाद्रयिं[१४] मा निमृक्षं संमार्ज्मि इति संमार्ष्टि। प्रसिद्धमित्येव न्याय इवाभाति। प्रसिद्धमाज्यग्रहणम् [. . . .][१५] प्रसिद्धं जुह्वां गृहीत्वोपभृति न्यायप्रसिद्धं चतुर्गृहीतं गृह्णीयात्। शास्त्रप्रसिद्धमष्टग्रहणमित्येके।

---

१. M Ad B broken. २. M Ad B वेत्वन्त°. ३. M Ad B broken before ख्याति; cf. VādhŚS 5.2.1-6. ४. M Ad B broken; cf. VādhŚS 5.2.8. ५. M Ad B °पस्तानं. ६. M Ad B अध्व°. ७. M Ad B इडसूनुं. ८. M Ad B om च. ९. M Ad B °कास्म नि. १०. M Ad B broken. ११. M Ad B broken. १२. M Ad B broken. १३. M Ad B योनेश्च°. १४. M Ad B गोष्ठुद्रयिं. १५. M Ad B ग्रहणा . . . . न्नति.

ध्रुवायां पृषदाज्यग्रहणं तत एव वनस्पती हृदयाभिघारणे पृथगेव वा तयोरर्धमाज्यस्थाल्याः किञ्चिदाज्यं पात्रान्तर आसिच्य निदध्यात्। तृतीयं च पूर्वमाज्यं दधिसंसृष्टं हृदयाभिघारितं [. . . .][१] वति ज्याय इवाभाति। आज्य-स्थाल्याज्यध्रुवा कार्येति दिष्टं न ग्रहणमन्त्रा नार्वाञ्चो ध्रुवासंस्काराः। प्रसिद्धं जुहूमुपभृतो सादयित्वा उपभृन्मन्त्रेण ध्रुवां सादयेत्, ध्रुवामन्त्रेणाज्यस्थालीम्। पृथिवीजन्मनाऽऽज्यस्थालीनाम्ना इत्यूहित्वा सादयेदित्येके। प्रसिद्धं स्रुचः सादयित्वा तूष्णीं [. . . .][२] न्येव। प्रसिद्धमा होतुर्व्याख्यानाच्चतुर्होतुः स्थाने दशहोता। क्लृप्तचषालः प्रतिमुक्तचषालः प्रक्षालितस्तीर्थेन प्रपादितः पूर्वेण यूपावटमुपनिहितः स्यात्॥ [२]

सह यूपशकलौ स्वरुणा रशनया मैत्रावरुणदण्डे च प्रोक्षण्यस्तूष्णीकाः पृथिव्यै [त्वा, अन्तरिक्षाय त्वा,][३] दिवे त्वा इति मूलमध्याग्रेषु पराञ्चं यूपं प्रोक्षेत्। अपोऽवनयति प्रोक्षणीनामुच्छिष्टाः। विषूचीनाग्रं[४] व्यस्ताग्रम्। अव-स्तरणादिहोभयोः प्राचीनावीतित्वं दक्षिणमुखत्वं च। अग्निष्ठाया एवाञ्जनम्। अग्निष्ठमन्त्रेणोक्त्वा तूष्णीं सर्वमनक्तीत्यपरम्। अ[. . . .][५] वनितः प्रतिभाति। पृथ्वीं वा तीक्ष्णां वाऽध्वर्युरनक्ति। यजमान इत्यन्ये। अध्वर्युणा मन्त्रेणाज्यसिक्ते यजमानो हस्ताभ्यां सर्वमनक्तीत्यपरम्। आन्तमनक्ति। नोपरमनक्ति। अञ्जनादि-यूपमध्वर्युयजमानौ न विसृजतः। आशकलावगूहनं स्रुवं स्थापयति। यथाऽऽहवनीयेऽनूर्जमिता स्यात्। उत्काशयति उदीक्षयति। दृंहयति दृढयति। प्रवयति अस्यत्यास्यति परिव्यये रशनागुणे॥ [३] इति प्रथमोऽनुवाकः॥

## अथ द्वितीयोऽनुवाकः

अथ पशुं [६]सिक्तरेतसमन्तरेण चात्वालोत्करौ प्रपाद्य उत्तरे यूपं प्रत्यङ्मुखं स्थापयित्वा च [. . . .][७] र्वन्। पशोः[८] पृष्ठे बर्हिषी निधायोपर्युपरि कदमन्तरेण शृङ्गे विकर्षेत्। प्रज्ञाते उपलक्षिते यथा पुनरप्यादीयेयातां शकलम् अभिमन्थन-शकलं वृषाणौ वृषणस्थायौ शकलद्वयमेव तस्याभिमन्थनस्याभितो निदध्यात्। घृतेना[क्तौ इति स्वरुं स्वधितिं च।][९] तेनाञ्जन् युगपदेवानक्ति। ततः शकलेषु समन्त्रकामधरारणिं निधाय मन्त्रेणान्यामुत्तरारणिमवदध्यात्। प्रजातिभिरात्मानं प्रति निवर्तयते। अधरारण्यां यजमानोऽयं प्रथमो मन्थति। प्रेष्यति चेत्यपरे।

---

१. M Ad B broken. २. M Ad B broken. ३. M Ad B broken. ४. M Ad B °नाग्रा. ५. M Ad B broken. ६. M B सितरे Ad. ७. M Ad B broken. ८. M Ad B वशोः. ९. M Ad B broken; cf. *VādhŚS* 5.5.12.

निर्वर्तनमन्थनमित्यन्ये। परिवर्तनं मन्थति। बलवन्तः कुशलाः परिकर्मिणः। जातायानुब्रूहि इति जात आह। प्रह्रियमाणायानुब्रूहि इति प्रहरिष्यन्। अक्ष्णया शृङ्गं दक्षिणं सहास्येन पशोः परिहरति। परितो बध्नाति। युनक्ति यूपरशनायाम्। यूप इत्यपरम्। न प्रोक्षणीनां मन्त्रेण संस्कृतिः। मन्त्रेण [१][प्रोक्ष्य पा]ययित्वा तत उत्तराणि [२]वक्षप्रोक्षणपृष्ठप्रोक्षणनिपाय्य प्रोक्षणानि तूष्णीकानि कृत्वा निधाय पात्रम् अग्नये समिध्यमानाय इत्यादि प्रतिपद्यते। जुह्वा जुहूगतेनाज्येन पशुं समनक्ति सं ते प्राणः इति। ललाटे संयजत्रैः इति, ककुदि सं यज्ञपतिः इति, दक्षिणा[३] समङ्गानि [४][इति, गच्छ]न्ताम् इति मनसा क्रियापदं स्मरेद् वाक्यपरिपूरणायेति। निस्तूष्णीत्येके। स्रुच्येकादशाय प्रयाजायाज्यमतिशिष्य दश प्रयाजानिष्ट्वा कः स्वधितिहस्तम् इति ब्रुवन्नत्याक्रम्य स्वरुं च स्वधितिं चादाय विषूचीनाग्रे कृत्वा मन्त्रेण युगपत् स्रुच्यनक्ति। बिले स्वरुं स्रु[चः स्व][५]धितिं[६] युगपदेव[७] मन्त्रेण। पशुं संमृज्य विशेषेण स्वधितिना ललाटं प्रति पशोरुन्मृज्य शमित्रे स्वधितिं प्रयच्छन्नुपलक्षयेत्। तामश्रिं यया पशुः समक्तो नैतयावदास्याग्नि इति शमित्रे प्रादर्शये॥ [१]

नैतया विशसितव्यमिति। पर्यग्नयेऽनुब्रूहि इत्यध्वर्युणा उक्तेऽग्नीदाह[वनीयादुल्मुकमादायान्तरा चात्वालोत्करौ निष्क्रमय्य प्रस][८]लैस्त्रिः पर्यग्नि कुर्यात्। सह यूपाहवनीयाभ्यामिति केचित्। सहाज्यैश्चेत्येके। सह शामित्रेण चेत्यन्ये। सह ब्रह्मयजमानाभ्यां चेत्यपरे। पशुमेवेत्याचार्याभिप्रायः प्रतिभाति। तस्मिन् पक्षे विस्त्रस्य पशुं पर्यग्निकृत्य[९] यथास्थानमुल्मुकं[१०] निधाय यथेतमपसलैस्त्रिः[११] परीत्य तदेवोल्मुकमादायाग्नीध्रः[१२] प्रथमो गच्छेत्तमन्वगितरे। तीर्थेन निष्क्रम्याश्राव्य संप्रे[ष्य वपाश्रपणीभ्यां पशुम][१३]न्वारभ्यापरेण शामित्रावभिगश्चेदग्रेण

१. M Ad B broken. २. M Ad B पक्ष°. ३. M Ad B broken between दक्षिणा and अङ्गानि. ४. M Ad B broken. ५. M Ad B broken. ६. M Ad B °धितिन्त. ७. M Ad B °पद्देव. ८. M Ad B broken between दाह and लैस्त्रिः [M Ad B लेत्रिः] cf. VādhŚS 5.5.18. ९. Due to displacement of the folios in the original MS from which the Madras MS was copied, the text between पर्य[ग्निकृत्य and ]यथास्थानमु dealing with *Cāturmāsya* covering 5 pages from M p. 435, line 18; Ad p. 874, line 1, to M p. 440, line 11; Ad p. 882, line 1 has been wrongly copied down here in MSS. The text beginning with यथास्थानं up to the end of the Prapāṭhaka belongs to the remaining part of the *Paśubandha*. १०. M Ad B स्थानमुन्दुकं. ११. M Ad B मवसलैस्त्रीं. १२. M Ad B °ग्नीध्रं. १३. M Ad B broken; cf. *VādhŚS* 5.5.24-26.

वश्यश्चात्वालस्योत्तरे [१]शामित्रदेशस्तस्योत्तरस्मिन् प्रदेशे मन्त्रेण बर्हिषोऽन्यतर-त्प्राचीनाग्रं वोपास्योपरि पशुं शाययन्ति।[२] प्रैष उक्ते[३] यथेतरत्तूष्णीं पुनर्गच्छेयुः। मन्त्रेणाध्वर्युयजमानौ[४]। पान्नेजनमुदकं पादप्र[क्षालनार्थं][५]माप्यायनार्थं च। आप्यायतेऽध्वर्युः[६] पत्नी वा। अध्वर्युरभिषिञ्चेत्॥ [२]

पत्न्यभिमृशेद्यथालिङ्गनं पत्न्याः। व्रताभिरद्भिरभिषिच्य पत्नीं वाचयेद् आप्यायनमन्त्रान्[७] या ते प्राणान् इति वर्जयित्वा। पदः[८] संनिधाय मार्जयति प्रक्षालयति। श्रोण्योर्निनयत्यध्वर्युः। निनीता[९] अपोऽनुमन्त्रयते। अध्वर्युरेवेत्यपरे। कवोत्तानम् ईषदुत्तानम्। दक्षिणेन नाभिमावर्तते[१०], तत्प्रति बर्हिषा त्वचमुप-संगृह्णाति[११]। सह बर्हिषा[१२] आच्छ्यति[१३] शनैरेव वा दर्शनात्। उपस्थादितरच्च बर्हिर्द्वेधा च्छित्वा तस्य स्थविमखण्डस्याग्रद्वयं पशोर्लोहिते[१४] त्वचो[१५] दूरतो मन्त्रेण निरस्येत्[१६]। शिष्टस्य [१७][अ]पि बर्हिषः खण्डस्य मूलं च्छित्वा तेन परिवासनम्। यत्र वपा परिवासिता तं प्रदेशं प्रतियौति अपिदधाति। अतोऽन्येनापि दर्भेण दृढं विधाय दर्भान्तरेण वपाद्रव्यं संवेष्ट्य सम्यक् प्रक्षाल्य मन्त्रेणोल्मुके प्रतितप्य शामित्रदेशमुल्मुकान् मातरिश्वनो घर्मोऽसि इति संप्रकृष्य संविधूय उप समादध्यात्॥ [३]

अथाग्रेण शामित्रं वपां पर्याहृत्योल्मुकप्रथमा आगच्छेयुर्वपाश्रपणी अन्वा-रम्भमाणास्तीर्थेन मन्त्रत्रयेण सर्व आहवनीयसमीपं वपाहोमान्तमुभयोः। [१८]अथो-ल्मुकमाहवनीयसमीपे विसृज्य वपामन्त्रेणान्तमेऽङ्गारे प्रतप्यान्तरा यूपाहवनीयं चाहृत्य प्रतिप्रस्थाता गच्छेत्। तत्राङ्गारनिरूहणाधिश्रयणदृंहणान्यर्थलुप्तानि। दृंहणवर्जमर्थलोप[१९] इत्येके। अर्थलोप एव ज्यायान्। तस्यां श्रप्यमाणायां विशिष्टं

१. M Ad B °त्तरगोमित्र°. २. B °यन्ती. ३. M Ad B उत्ते. ४. M Ad B °मानो. ५. M Ad B वोदप्र . . . मा°. ६. M Ad B तोऽध्वं. ७. M Ad B भाव्या°. ८. M Ad B वदसन्नि. ९. M ताः विन्यनु, Ad °ताः निन्यनु, B ताः नुम. १०. M Ad र्तत. ११. M Ad संग्रष्णौदि. १२. M Ad B repeat त्वचमुत्संग्रष्णौदि सह वर्हिषा. १३. M Ad B आज्यति. १४. M Ad B वशो°. १५. M Ad B क्त्वो. १६. M Ad B निदस्येत्. १७. M Ad B broken. १८. Due to displacement of the folios in the original MS from which the Madras MS was copied, the matter between वपाहोमान्तमुभयोः M p. 441, line 13, Ad p. 883, line 13 and ending before अथोल्मुकमाहवनीयसमीपे [M p. 443, line 2, Ad p 886, line 2] belonging to Varuṇapraghāsa has wrongly been copied down under Paśubandha. That text has been put at proper place under Varuṇapraghāsa vide p. 32 fn. 8. The text beginning with अथोल्मुकमा constitutes the remaining part of the Paśubandha. १९. M Ad B दृंहणवज्जनान्नार्थं.

बर्हिःखण्डमुपास्यैतां[१] श्रप्यमाणां घृतेनाप्याययेत्। सम्यक् श्रपणाय तस्यां मन्त्रवत्पर्यग्निकरणद्वयं तन्त्रेण कृत्वा तूष्णीमभिघार्य इदमिन्द्रियम् इति दक्षिणायां श्रोण्यामासाद्य वपां मयि श्रपयताम् इत्यभिमृश्य यस्ते शुष्म इत्यभिघार्य, वपामभिघारयेत्। न ध्रुवामित्येके। अथाज्यभागौ[२] यजति, यद्यत्र यजेत्।। [४]

अग्नय आज्यस्यावदीयमानस्यानुब्रूहि इत्याज्यं गृह्णानश्चतुरत्याक्रम्याश्रावयन्नग्नय आज्यं प्रस्थितं प्रेष्य वषट्कृते हुत्वा सोमायाज्यस्य सोममाज्यम् इति सौम्यमाज्यभागमिष्ट्वा, अथ वपाया उपस्तीर्य हिरण्यशल्कमवधाय इन्द्राग्निभ्यां छागस्य[३] इति प्रैषमुक्त्वा जुह्वा[४] उपरि स्रुवेण[५] वपां संप्रलुम्पन् विस्त्रंसयन् यथा संप्रप्लुता जुह्वां पतेत्। अथ हिरण्यशल्कमवधायाभि स्वाहा देवेभ्यः इति प्रतिप्रस्थात्रा हुते मन्त्रेणाध्वर्युर्वषट्कृते वपां जुहोति देवेभ्यः स्वाहा इति। प्रतिप्रस्थाताऽऽघार्य वपाश्रपणी अन्तरा यूपं चाहवनीयं चातिहृत्योत्तरतस्तिष्ठते प्रतिप्रस्थात्रे प्रदाय स्रुचावादाय दक्षिणत एव तिष्ठन्नाह—इन्द्राग्निभ्याम् इति। प्रति परिहृत्य वपामत्याक्रम्याश्रावयेदित्येके। स्वयमेव परिक्रम्यात्याक्रम्य परिहृतामेवादायाश्रावयेदित्यपरे। आद्य एव पक्षो ज्यायानिवाभाति। स्वाहा देवेभ्यः इति प्रतिप्रस्थात्राहुते मन्त्रेणाध्वर्युर्वषट्कृते वपा जुहोति। प्रतिप्रस्थाता जुहोति। देवेभ्यः स्वाहा इति अध्वर्युरित्येके। वपाश्रपणी प्रहरति [६][प्रति]प्रस्थाता। सर्वे मार्जयन्ते चात्वालप्रदेशे चात्वाले [७]वोदकमासिच्य।। [५] इति द्वितीयोऽनुवाकः।।

## अथ तृतीयोऽनुवाकः

प्रैष उक्तेऽग्नीत्पात्राणि संसादयेत् कपालादीनि नव, प्राशित्रहरणं च। हविर्यज्ञविधपक्षे मेक्षणं च पिष्टोद्वपनीं[८] च प्रणीताप्रणयनं च। सवविधपक्षे दारुपात्रीं च मदन्तीस्थालीं[९] चोपवेषं च वृषारवं च। पुरोडाशीयानाहृत्य निधाय पवित्रे आदाय प्रणीताः प्रणयेत् सवविधपक्षे। पक्षान्तरे यजमान[१०] वाचं यच्छ इत्युक्त्वा हस्तौ मार्जयित्वा वेषाय त्वा इत्यग्निहोत्रहवणीं शूर्पमित्यादाय निष्टप्य हविर्निरूप्य निधाय पुरोडाशीयान् प्रोक्षणीः संस्कृत्य प्रोक्षणं कुर्वन् सर्वाभिः पात्राणि प्रोक्ष्य व्रीहीनवहत्य कपालान्युपधाय पिष्टानि कृत्वा प्रणीताभ्योऽध्याहरेत्येतावदुक्त्वा समुप्य संयुत्यासंक्षालननिनयात् करोति। प्रतिप्रस्थाताऽपि

---

१. M Ad B °स्येतां. २. M Ad B °भाग्नौ. ३. M Ad B जागरस्येति. ४. M Ad B स्रुवा. ५. M Ad B °वेणापां. ६. M Ad B om. ७. M Ad B वोकमा°. ८. M Ad विष्टो°. ९. M Ad B °दन्ति°. १०. M Ad B °मानः.

पुरोडाशस्य हविष्कृदन्ते पशुं विशास्ति शासयति। विशसनाय शमितारं[१] प्रेष्येत्। विशसनादिश्रपणान्तं[२] शमितृकर्म। स चाङ्गान्यु[द्धरेत्][३]। यथैषामाकृतिराविः स्यात् तथा गात्रंगात्रमस्यानूनमुद्धरेत्। उद्धृतानि कस्मिंश्चिद् विदले काष्ठे वा लतायां वा न्युप्य[४] त्रीणि त्रीणि तथा संकल्प्योपलक्षयेत्। एकचरमसहायं तेषु[५] त्रित्व-संकल्पो नास्ति। अध्यूध्निमूढता सासह [. . . .][६] न्युद्धृत्य मेदश्चापक्षाय काष्ठस्यान्ते मिथ आसिच्य[७] सम्यक् प्रक्षाल्यावदध्यात्। प्रागेव विशसनात् शामित्रमुप समाधाय द्यौरसि इति कुम्भीमादाय विश्वधाया[८] इत्यधिश्रित्य दृंहस्व[९] इति दृंहित्वा वोपधि केनचित् पात्रेण द्यौः स्थः पृथिवी स्थ इत्यादाय[१०] अवधाय[११] कुम्भ्यामवनयेद्[१२] दृंहणम्। अर्थलुप्तमदानाधिश्रयणे चार्थलुप्ते इत्येके॥ [१]

तत उद्धृत्यावदानानि[१३] यथोक्तं कुम्भ्यामवधाय श्रपयेत्। अथ श्रिते पशावग्नीत् पात्र्यां पशुपुरोडाशमुद्वास्यालंकृत्य वेद्यामासादयेद्यथाऽध्वर्युः। यस्ते शुष्म इत्यभिघार्य यन्मे अग्ने इत्यभिमृशेत्। अत्राज्यभागाभ्यां चरति यदि पुरस्तादकृतौ स्याताम्। अथ प्रतिप्रस्थाता व्रतमुपेत्य यथोक्तं देवतासौविष्टकृते अवदाय, सन्धाय स्रुचावध्वर्यवे प्रयच्छेत्। अथाध्वर्युः स्रुचावादायात्याक्रम्या-श्राव्य यथोक्तमुभयमिष्ट्वाऽत्याक्रम्य स्रुचं पूर्णं द्विर्निनीय यथायतनं स्रुचौ सादयित्वा प्राशित्रमवद्येद् हविर्विधपक्षे। पक्षान्तरेऽवदायैव प्राशित्रम् इडामव-खण्ड्यावदानानि संभिद्याभिघार्य प्रत्यङ् वाऽऽवृत्य सहैव पात्र्येडां होत्रे प्रयच्छेत्। इडार्थमवत्तामवान्तरेडामवदायावशिष्टं बर्हिषदं कृत्वा तत्र यजमानं वाचयित्वा पुनः पात्र्यामवधायाग्नीध आधाय प्राश्नन्ति। मार्जयन्ते। अथ प्राशित्रं परिहृत्य पुरोडाशं परिहरेत् प्राशित्रपक्षे। पक्षान्तरे पुरोडाशमेव। प्राशित्रपक्षे पुरोडाशस्य नास्ति परिहरणमित्येके। परिहरणमेव ज्यायो यदि वपान्ते न नीता स्यात् सा। अन्यथा शुद्धम्। गौरित्येकेऽन्वाहार्य इत्यन्ये। गौश्चान्वाहार्यश्चेत्यपरे। ज्याया-निवैष पक्षः। अत्रानाज्यकेन फलीकरणहोमं चरित्वा पिष्टलेपमनुवर्त्य[१४] विष्णु-क्रमैश्चरित्वा सवविधपक्षमुलूखलमुसलं परेक्ष्य कपालानि विमुञ्चेद् यदि प्रागपि मुक्तानि स्युः॥ [२]

---

१. M Ad B °तारः. २. M Ad श्रवणान्तरं, B °श्रवणानन्तरं. ३. M Ad B broken. ४. M Ad B नुज्य. ५. Ad त्रिषु. ६. M Ad B broken. ७. M Ad B आसच्य. ८. M Ad B °धाय. ९. M Ad B °हस्य. १०. M Ad B °दय. ११. M Ad B विश्वधा°. १२. M Ad B °नये. १३. M Ad B °दानि. १४. M Ad विष्टलोप, B विष्टलोम°.

अथ प्रेषितोऽग्नीत्[१] प्लक्षशाखां पर्णसूनं[२] चाग्रेण शामित्रमाहृत्य तीर्थेन प्रपाद्यान्तरा यूपं चाहवनीयं चाहृत्य दक्षिणान्ते वेद्याः पर्णसूनं[३] निधाय तस्योपरि प्लक्षशाखां निदधाति। अथ प्रतिप्रस्थात्रा[४] पृषदाज्यस्योपहत्य यथोक्तसमुदितेऽध्वर्युर्मन्त्रेण पशुं पर्यग्निकृत्वा हृदयशूलेन[५] हृदयं संस्पृश्य तं प्रज्ञातं निधाय प्रतिप्रस्थातुः पृषदाज्यमादाय हृदयमुत्तमं कृत्वा सं ते मनसा इति पशुमभिघारयेद्, यथा पूर्वहृदये पतित्वा सर्वेष्ववदानेषु पतेत्। अथैतं पशुमन्तरा यूपं चाहवनीयं चाहृत्य स्थाल्या उद्धृत्य दक्षिणतः प्लक्षशाखायाः प्रत्यवदानं निष्कलिवनिष्ठुवर्जं मन्त्रेणासाद्य हृदयं मयि श्रयताम्, जिह्वा मयि श्रयताम् इत्यनुपूर्वमेव मन्त्रेणाभिघारयेत्। आसादनसंमर्शनाभिघारणमन्त्रा [६]देवतानामेव, न स्विष्टकृदिडार्थयोः। दक्षिणस्या यौष्णः[७] सव्यायाः श्रोण्या इत्येके। तदेव ज्यायः। अथ यन्मे अग्ने इत्यनुपूर्वमेवाभिमृशेत्। अथ प्रतिप्रस्थाता जुहूपभृतोर्वसाहोमीयाम्[८] इडापात्रमाज्यस्थालीद्वयं प्राकृतीमपूर्वां च स्रुवं स्वधितिमन्तरा यूपं चाहवनीयं चाहृत्य दक्षिणत आसीनो जुहूपभृतोः ध्रुवाज्यादुपस्तीर्य मनोतायै हविष इति प्रेष्येत्। हृदयादीनामुत्सादनप्रदेशेभ्योऽनुपूर्वं स्वधितिना द्विरवदाय यूष्णोपसिच्य मेदो यूषन्नवधाय तेन जुहूं प्रोर्णोति। अभिघार्य प्रत्यज्य स्विष्टकृदर्थं गुदतृतीयम्। अथ त्र्यङ्गाणां यथोक्तमुपभृत्यवदाय[९] यूष्णोपसेचनादि कृत्वा न प्रत्यज्य वसां वसाहोमीयायां विस्राव्यापूर्वाज्यस्थाल्या अभिघार्यानस्थिकेऽवधाय यूष्णोपसिच्यावत्तं मन्त्रेण पशुमभिमृश्य श्रीरसि इति केनचित् पार्श्वेन वसाहोमीयं प्रयुत्य स्रुचोः पञ्चहोतारं व्याख्यायावत्तं प्रति परिहृत्य स्रुग्द्वयं प्रतिसन्धायाध्वर्यवे प्रयच्छेत्॥ [३]

ते आदायाध्वर्युरुत्तिष्ठन् प्रैषादि प्रतिपद्यते। अथ [१०][पञ्चहो]तारमुक्त्वा [११][प्रति]प्रस्थाता मन्त्रेण वसाहोमं जुहोति। अथाध्वर्युर्वषट्कृते हविर्हुत्वा वनस्पतये इति ब्रुवन् स्रुवेण पृषदाज्यस्योपहत्य[१२] जुह्वामानीयाश्राव्य प्रैषमुक्त्वा वषट्कृते जुहुयात्। यद्यनत्याक्रम्याश्रावणेति तु प्रदक्षिणमावृत्य [. . .][१३] मेदस्य[१४] अग्नीध आदधाति। पृथगुपस्तीर्णाभिघारिते प्राश्नन्ति। मार्जयन्ते। ब्रह्मा च वक्षः प्राश्य मार्जयते[१५]। पार्श्वे प्रतिप्रस्थाता। सन्ततिमनु तिस्रः स्रुवाहुतीर्हुत्वा प्रेष्यति

---

१. M Ad B ॰ग्नीन्. २. M Ad B ॰सूननं. ३. M Ad B ॰सूनुं cf. VādhŚS 5.8.32. ४. B ॰स्थाता. ५. M Ad B ॰शूलौ. cf. VādhŚS 5.8.43. ६. M Ad B दैवता॰. ७. M Ad B दौष्ण. ८. M Ad B ॰मृतावसाहोमि॰. ९. M Ad B ॰वद्वय. १०. M Ad B broken. ११. M Ad B om. १२. MB ॰दाज्यसो. १३. M Ad B broken. १४. M Ad B मेतस्त. १५. M Ad B ॰यन्ते.

अग्नीदौपयजान[ङ्गारानाहर][१] इति। अथ ध्रुवायै वाऽनूयाजान् यजत्युपभृतैवौं[२]-[पयजान् . . .]। इहाप्याज्ये[२] मैत्रावरुणेन सह यज इति ब्रूयात्। उपयष्टा प्रतिप्रस्थाता गुदतृतीयस्य निहितस्य प्र[३][च्छेदम]संभिन्दन्नसंगमयन्नन्यस्य प्रयच्छेत्। [४]अन्यस्यैकदेशमितरेणासंगमयन् अथवा संभेदनमकुर्वन् प्रच्छिन्द्यात्। अपर्यावर्तयन्, पर्यावर्तमानमकुर्वन् एकादशभिर्मन्त्रैर्यथाक्रममेकादशकृत्वं प्रैषं [कृत्वा][५] तेषु जुहोति। हस्तौ निमृज्योपयष्टा तनूत्वचम् इति यजमानं वाचयेत्। वाचयिताऽध्वर्युरित्येके॥ [४]

अनूयाजानिष्ट्वोपपरिक्रम्य स्वरुसमीपं गत्वा स्वरुमुद्धृत्य जुह्वामक्त्वा[६] तस्यामवधाय तया पुरस्तात् प्रत्यङ् तिष्ठन् जुहोति। अथागत्य वाजवतीभ्या-मित्यादि प्रतिपद्यते। उत्तानमिडामदधद् उपस्तीर्य द्विरादायाभिघारयेत्। नीच्या अग्नीधे द्विरादधाति। शँय्वन्तमेतत् कृत्वाऽऽज्यस्यैव फलीकरणहोमं हुत्वा पिष्टलेपमनुवर्त्य प्राजापत्यं हुत्वा प्राड्त्य ध्रुवामाप्याय्य त्रीणि समिष्टयजूंषि हुत्वा प्रणीताः पर्याहृत्य तासु यजमानं वाचयित्वा ता यजमानस्याञ्जलावानीय अयं ते योनिः इत्यादि प्रतिपद्यते हविर्यज्ञविधपक्षे। पक्षान्तरे फलीकरणे होमवर्जम्॥ [५] इति तृतीयोऽनुवाकः॥

## अथ चतुर्थोऽनुवाकः

'शिवा च मे' इति पूर्वस्मिन् परिग्राहे जपित्वा वृणीत औत्तरवेदिक आदित्यं प्रत्यग्निमुपतिष्ठमानः। अद्य यज्ञाय रमताम् इति सन्नमयेत्। अथाग्नीनन्वाधाय पूर्वपरिग्राहं जपन् इमामूर्जं प्रतिपदमष्टमीं पञ्चदशम् इति तां तिथिं लक्षयित्वा पशुबन्धं हविर् इत्यूहित्वा व्रतमुपेयाद्[७] हविर्यज्ञविधपक्षे। पक्षान्तरेऽनुपेत्य वतं प्रेषितो वाचं यच्छेदागत्य प्रोक्षणात्। अथोत्तरस्मिन् परिग्राहे इमामूर्जम् इति जपित्वाऽऽज्यमवेक्ष्याज्यग्रहणमभिमन्त्रयन् प्रसिद्धमेव [८]जौहवानभिमन्त्र्यौपभृतांश्चतुरः। अथ पृषदाज्ये सुवीर्याय त्वा इति चतुर्भिश्चतुरो दधिवर्जं भूरस्माकम् इति॥ [१]

चतुर्भिराज्यस्थालीमभिमन्त्रयेत्। ग्रहणाभावादत्र नाभिमन्त्रणमित्येके। तदेव ज्यायः। अथ यत्र प्रस्तरे [९]अपिसृजतीत्यादि प्रतिपद्यते, प्रसिद्धं जुहूपभृतोः

---

१. M Ad B °यजनानिति. २-२. M Ad B °भृतैवो...रिहाप्यन्ये; [Ad °भृतौ]. ३. M Ad B प्र...संभन्द°. ४. M Ad B °नस्येक°. ५. M Ad B broken. ६. M Ad B °मक्ता. ७. M Ad B °मुपयेधा. ८. M Ad B जाहवान°. ९. M Ad B अविसृ°.

**सादने जपित्वा पृषदाज्यग्रहण्याम्** अवाहं[१] बाध **इति जपेत्।** ध्रुवा **इति सन्नमये-दित्येके। नैवमूहेदित्यपरे।** यो मा वाचा **इत्याज्यस्थाल्याः।** अहम् **इत्येके सन्नमयन्ति। अविकार एव ज्यायान्। अञ्जनादि यूपं यजमानोऽनुसृजेदा स्वरो-रवगूहनात्।** त्वां गावोऽवृणुत राज्याय **इति ब्रह्मणा वाचितो ब्रूयात्। प्रयाजा-निष्ट्वाननुमन्त्र्यमाणः प्रसिद्धांस्त्रींस्त्रींरभिमन्त्र्य चतुर्थेनोत्तरांश्चतुरः पञ्च-मेतरान्। एवमेवैकः[२] प्रयाण इत्यादीनपि ब्रूयात्।[२] अथ पशुमुदञ्चं नीयमानं वपा-श्रपणीभ्यामन्वारभमाणं गत्वा संज्ञपनाय[३] प्रैष उक्ते प्रदक्षिणमावृत्य** नाना प्राणः **इति। पुनरागत्य तीर्थेन प्रपद्य पृषदाज्यं मन्त्रेणावेक्ष्य पशोः प्राङ्मुख आसित्वा हुते संज्ञप्तहोमपेषलैः पर्यावृत्य[४]** शमितार उपेतन **इति पशुमुपेत्य पाशप्रतिमोचने गत्वाऽपः प्रतिषिच्याप्रतीक्षं पुनरागत्याङ्गारेषु संप्रकृष्टेषु प्रदक्षिणम्** उर्वन्तरिक्ष-मन्विहि **इति पुनरेत्य तीर्थेन प्रपद्य** उप त्वाग्ने[५] **इति तिसृभिराहवनीयमुपेत्याथ यथेतं प्रपद्य दक्षिण आसीनः स्वाहाकृत्यानुमन्त्रणादि कुर्यात्।** इन्द्रियावी भूयासम् **इति वपानुमन्त्रणम्। अथ प्रेषितो वाचं यत्वोलूखलमुसलं परेक्ष्य यथाप्रकृति पशुपुरोडाशस्य** वृत्रहा भूयासम् **इति॥ [२]**

**दैक्षयज्ञविचारपक्षे** अग्नेरहं देवयज्ययाऽऽयुष्मान् यज्ञेन प्रतिष्ठां गमेयम् **इति पशुपुरोडाशस्विष्टकृतः। अथ दक्षिणा नयेद्यदि वपान्तेन नीता स्यात्। दक्षिणा सवविधे पक्षे विद्यात् तत्रापि गौरिति क्वचित्। पक्षान्तरेऽपि गोः समुच्चयोऽन्वाहार्येणेति। अफले फलीकरणहोमे हुते पिष्टलेपानुवर्तते। यजमानभागं प्राश्य प्रणीता निनीय विष्णुक्रमांस्तु क्रमेत सवविधे। न ते पक्षान्तरे नापि यजमानभागप्राशनमित्येके। अथोलूखलमुसले विमुच्य कपालानि विमुञ्चेद् यद्यविमुक्तान्युद्वासनकाले स्युः। अथ** यन्मे अग्ने **इति हविरासन्नम[६]-भिमृश्य** अयं यज्ञः समसदद्धविष्मान्[७] **इत्यासन्नां हविरभिमृशेत्। 'वपावद्ध-विरभिमन्त्र्य** वनस्पतेरहं[८] देवयज्ययाऽऽयुष्मान् **इति वनस्पतिभागमभिमन्त्रयेत। प्रसिद्धं स्विष्टकृदनुमन्त्रणम्। प्रसिद्धान्यनुमन्त्रणानि[१०]। प्रसिद्धं मार्जनम्। अत्र याज्यानुमन्त्रणेषु प्रसिद्धं प्रथमानुमन्त्रणम्।** [११]['देवी]द्वारामहमुषासनक्तयोः, अहं जोष्ट्रियोः, अहं **बर्हिषो** वा ऋतीनाम्[१२] 'अहं देवयज्यया प्रजावान्' **इति**

---

१. M Ad B अवादहं. २-२. M Ad B repeated. ३. M Ad B संज्ञाप°. ४. M Ad B °वृशामुता°. ५. M Ad B त्वाण. ६. M Ad B °रासनमभि°. ७. M Ad B °दध्मविष्ट्वान्. ८. M Ad B °वन्भवि°. ९. M Ad B °तेऽयन्देव°. १०. M Ad B °सिद्धानुमन्त्र°. ११. M Ad B om. १२. M Ad B रिती.

**यथालिङ्गं प्रथमविकारेषु।** 'ऊर्गाहुत्योरहं तिसृणां तिसृणां देवीनाम्, अहं नराशंसस्य, अहं देव पशुमान् भूयासम्' **इति यथालिङ्गम् मध्यमविकारेषु।** 'दैव्ययोर्होत्रोरहम्, वनस्पतेरहम्, अग्नेः स्विष्टकृतोऽहं प्रतिष्ठां गमेयम्' **इत्युत्तमविकारेषु यथालिङ्गम्। अथ स्रुग्व्यूहनादि प्रतिपद्यते॥** [३]

**न त्वत्र प्रणीतामार्जनं विष्णुक्र[१]मश्च सवविधे॥** [४] इति चतुर्थोऽनुवाकः[२] ॥

**॥ इति पशोर्याजनाख्यश्चतुर्थः प्रपाठकः समाप्तः ॥**[३]

---

१. M क्रमञ्च, Ad B क्रमं च. २. M Ad B इति चतुर्थः. ३. M Ad पशोर्याजनं समाप्तम्॥

## ॥ अथ पञ्चमः प्रपाठकः ॥

## ॥ अथ ज्योतिष्टोमः ॥

### [अथ प्रथमोऽनुवाकः][१]

#### [ऋत्विग्वरणम् दीक्षणीयेष्टिश्च]

ज्योतिष्टोमेन यक्ष्यमाणः पुरस्तादेव संभृतसंभार उपकल्पितदक्षिणो ब्राह्मणाननूचानान्[२] बन्धुसम्पन्नान् नियमव्रतचारिणः संशितव्रतान् [३]परीक्ष्याहूय तेषां य आत्मनो [४]नेदिष्ठस्तमध्वर्युं प्रथमं वृत्वा तद्वशानन्यान्[५] वृणीत। ब्रह्माणमेव[६] वा प्रथमं वृत्वा यथोपपादमितरान्। ते च को यज्ञः, क[७] ऋत्विजः, को[८] दक्षिणा इति पृच्छन्तः प्रतिजानीयुः। अमुकेन यज्ञक्रतुना यक्ष्ये इति संकल्प्याथ तेषां सन्निधावुच्चैर्व्याहरेदन्येषां च ऋत्विजां दक्षिणाविकल्प एकविंशतिर्द्विविंशतिरिति[९]। अकुनखिनमाङ्गिरसमध्वर्युं वृणीत, अकिलासिनं वासिष्ठं ब्रह्माणम्, अखण्डं वैश्वामित्रं होतारम्, अकवारमयास्यमुद्गातारम्। नव शिष्टान् भृगूनङ्गिरसो वा। तेष्वनियतमा वाऽसंभवे, न त्वेव न यजेत। नित्येन ज्योतिष्टोमेन सकृद्यजेत, प्रतिवर्षं वा। संकल्पितव्रतो यजमानः स्यात्। संकल्पितव्रतस्याप्यसंभवे तन्निष्क्रयाय वैश्वानरीष्टिः कार्या। अग्निष्टोमं प्रथमाहोऽतिरात्रो[१०] वाऽपीत्यपरम्। पयसी धेनुव्रतदुहौ दीक्षितवसने क्षौमे, अन्ये वाऽनुपहतोऽसंभवे सतूला अनन्तर्गर्भा[११] सा वा शरेषीकशरतरुणाञ्जनसमर्था पुञ्जिलानि समूहः योक्त्रं मौञ्जं मेखला त्रिवेणी शरमयी नस्कूजनी[१२] शङ्कुः कण्डूयनसमर्थः, कृष्णविषाणा त्रिवली, पञ्चवली वा, दण्डो यक्ष्यमाणस्य मुखेन संमितः। पुरस्तादेव प्रागुदक् प्रपन्ने शुद्धे देशे प्राग्वंशं करोति॥ [१]

द्वादशप्रक्रमायां दिक्ष्वतीकाशवन्तम्। चतुर्दशीमुपात्तदिगन्तरेणोदीचीनं पत्नीशालं करोति। उत्तरेण यज्ञशालं परिश्रिते करोति। पूर्वं यजमानायापरं पत्नियैव सह क्रियायाम्। जघनेन प्राग्वंशं पत्नियै। कालान्तरे क्रियायामुभयोः पक्षयोः। अपरेणैव प्राग्वंशं पत्नीशालाया इत्यपरे। प्राग्वंशकाल एवोद्देशेन

---

१. M Ad B om. २. M Ad °णानान्तूचा°. ३. M Ad B वरीक्ष्याः°. ४. M Ad B नेदृष्टस्तम°. ५. M Ad B °दन्यान्. ६. M Ad B ब्राह्म°. ७. M Ad B om. ८. का + उ. ९. M Ad B °शतिमि°. १०. M Ad B माहारो प्रथमाहोरोति°. ११. M Ad B असन्तर्गभाः°. १२. M Ad B नस्तूज°.

शालामुखीये यूपावटीयं च शङ्कुं निहत्य तयोः पृष्ठ्यामातनुयात्। संभारानुपकल्पयंश्चतुष्टयानि कपालान्युपकल्पयेदेकादश[1] नव दशाष्ट च। पञ्चदश चतस्रश्च स्थालीरेका प्रायणीयोदयनीययोरेका सौम्यस्य द्वे व्रतयोः। एका पयस्यायै इत्यन्ये। तिस्र इत्येके। पद्धरण्येका चतस्रश्च सोमस्थाल्यः[2] पञ्चैकधनार्थाः। ये व्रतयोस्ते एवाशिरे दधिघर्माय। चतस्रश्च स्थाल्यो देविकाहविर्भ्यः[3]। पञ्च कलशाः प्राग्वंश एकः, सोदञ्चनो मार्जालीय एकः, आग्नीध्रिय एकः, द्वावाधवनीयपूतभृतौ। तयोः समान उदञ्चनः। पञ्च कुम्भा वा द्वावप्सुदीक्षायै, क्रयायैको, घर्मोद्वासनायैको, वसतीवरीभ्य एकः। चतस्रः कुंभ्यो मदन्तीभ्य एका, तिस्रः पशूखाः[4], बहवः शरावाः[5], अम्बरीषं च। सवनीयार्थं सर्वं यथा प्राग् द्विगुणमुपकल्पनीयम्। अथ[6] दारुमयाणि[7]। चमसौ व्रतप्रदानौ सोमासन्द्यौदुम्बरी। तस्या नाभिदघ्नाः पादा भवन्ति अरत्निमात्राणि॥ [२]

[8]शीर्षण्यान्यनूचीनानि। सा मौञ्जीभी[9] रज्जुभिः युक्ता[10] भवति। एकसराभिः [11]कादृशस्तूच्चैस्तेन सम्राडासन्दी[12] द्वे हविर्धाने अनसी प्रतियुक्तचक्रे[13], तयोरुच्चैस्तरं[14] सनीडम्। तदेव सोमवाहनमन्यदित्यपरे। प्रचरणी स्रुक् पालाशी, ऊर्ध्वमुपराद् यजमानेन संमितौ स्थूणौ द्वे अधिषवणफलके औदुम्बरे त्रिप्रादेशे अध्यर्धप्रादेशव्यासे, उदङ्क्द्रोणकलशौ चौदुम्बरौ। कलशयोरुदङ्क एवोदचनो महापरिधयश्च। अनियतवृक्षाणि चोर्ध्वपात्राणि षट्तयानि। नैय्यग्रोधानीत्यपरे। बैल्वं [शुक्रपात्रं][15] द्वे एकं नि [16][. . .] न्येकादशाग्रबिलानि प्रादेशमात्राणि प्रादेशपरिणाहान्युलूखलाकाराणि कुडुम्बभारबिलानि[17]। आश्वत्थे अ[श्वशफ][18]बुध्ने उभयतोमुखे एकादश चमसा नैय्यग्रोधाः। उत्सरुमन्तः कुडुम्बभारबिलाः[17] द्वितर्यः कार्ष्मर्य[मयाः परिधय][19]श्च पञ्चदश दारुर्नानावार्क्ष्यः स्त्रीवृक्षी वदरे पाटलिची वामलकी शिंशपा जम्बू इत्येवमादाय बहुतया काष्ठकला[पा आ][20]सनार्था भूयस्यश्च[21] तृणकलाप्यः[22] काष्ठानि सदोहविर्धानाग्नीध्रसंमानाय सन्ततश्च। देवयजं दूरतः परिश्रयन्ति दुर्जननिरोधाय। चत्वारि कृष्णाजिनानि, रोहितं चर्मैकं, दौघटकटौ, व्रीहयश्च

१. M Ad B ॰कल्पये एका॰. २. M Ad B ॰ल्या. ३. M Ad B देविकोह॰. ४. M Ad B पशूखन्. ५. M Ad B शरवाः. ६. Ad अथवा. ७. M ॰मायाणि. ८. M Ad B ॰र्षण्यन्तू॰. ९. M Ad B ॰जीभि. १०. M Ad B ॰न्यूका. ११. M Ad B ॰तच्चे॰. १२. M Ad B ॰सनी. १३. M Ad व्रति॰, B व्रती॰. १४. M Ad B च्चैस्करं. १५. M Ad B broken. १६. M Ad B broken. १७. M Ad B कुडुम्बधार॰. १८. M Ad B broken. १९. M Ad B broken. २०. M Ad B broken. २१. M Ad B भूयस्यं. २२. M Ad B ॰लाव्यः.

यवाश्च छागादयश्च क्रयार्थाः संभाराश्च। परिकर्मिणो बहवो यज्ञविदो वश्याः[१] सुवृत्ताः। अध्वर्युर्मन्त्रेणाचम्य प्राण्यापान्य प्रजापतिः इति जपित्वा कर्माण्यारभते। एवं सर्व ऋत्विजः स्वे स्वे कर्मादौ कुर्वन्ति॥ [३]

अथ प्रवर्ग्याः संभृत्य यूपं स्पृष्ट्वा[२] कृत्वाऽनख आशितो भूत्वा स्नाहीति देवयजनमभिप्रयाति समारूढाग्निभिररण्यस्यैव[३] वा। ग्रामस्य दीक्षितः स्यादित्यपरे। अथेम् अवस्यवे[४] त्वा इति दीक्षिष्यमाणोऽपरेण शालामवस्यति। वचनाद्यनुक्रमणमप्सुदीक्षायाः पूर्वत्वोपलक्षणमित्यपरे। ग्रामे दीक्षितस्यैवैतन्मन्त्रद्वयमित्यपरे। तथा सति देवयजने दीक्षिष्यमाणे देवयजनाभिमन्त्रणादि प्रतिपद्यते। न प्रयाणावसानमन्त्रौ ब्रूयात्। क्षत्रियं देवयजनं याचेद्, यस्य[५] मण्डले तद्देवयजनम्। अथ चेन्न याचेद् देवान्[६] देवयजनं याचेत् सत्रीन् हिरण्यशल्कानादायेत्यनेन। अथाध्वर्युः पादौ प्रक्षाल्य शाखे आदाय पूर्वेण द्वारा प्रपद्य मन्त्रेण प्रागपवर्गं व्युदजेत् प्राचीनं च शालाया आवेद्यन्तात्। असमारूढेष्वेवाज्यं संस्कृत्य स्रुक्स्रुवं संमृज्य समारोप्याग्नीन् [७]गच्छेद्, अजस्रैर्वा मथित्वाऽग्नीन्[७] विहरेत्। समारोपणे अजस्रपक्षे यथास्थानं निवपेत्। पितृभ्यो दानं पिण्डपितृयज्ञः। यदृणमवश्यदेयमुत्तमर्णाय तद्यथोत्साहं प्राग्दीक्षायै दद्यात्। अथ यदपनेतुमशक्यम्, अपनेतुमशक्यमुत्तमर्णमनुज्ञापयेत्। यद्यनुज्ञापयितुमशक्यं तत्पुत्रादावुपनयति प्रतिमोचयति। यद्वा स्वेनावश्यं कर्तव्यं तत्पुत्रादावासच्य स्वयं वैदिक एव प्रवर्तेत इमामूर्जम् इति॥ [४]

यस्यां तिथौ दीक्षा तां निर्दिशेद् दैक्षणीयं हविर् इति चोहेत्। अत्र दम्पत्यो-[८]र्व्रतोपायनमप्सुदीक्षा पूर्वत्वे लुप्यते पत्न्याश्च सन्नहनम्। मघवे स्वाहा इति द्वादशाहुतयो[९] जुह्वा सकृद्गृहीतेन होतव्याः। अन्येऽप्येवंविधाः। वृत्रहा भूयासम् इति हविरभिमन्त्रणं नास्ति। अन्वाहार्यहरणं पत्नीसंयाजान्तायामस्यामिष्ट्वा फलीकरणहोममत्राचार्याभिहितं क्रियते, नान्यत्। किन्तु न यज्ञविमोककपालविमोकौ, व्रतविसर्जनमिति च कुर्वीरन्। अर्थविरुद्धमुपवेषोद्वासनमित्येके। तथोत्तरयोरिष्ट्योः कृतानुकरपक्ष उत्तरेणैव शालामभ्याशे परिश्रितान्तरे प्रतिप्रस्थाता कृतानुकरस्तूष्णीं पत्नीं दीक्षयेत्। उत्तरस्मिन्नपि गोदाने तान्येव [१०]दर्भपुञ्जीलानि यानि दक्षिणस्मिन्। प्रत्यभिमर्शनं याजमानमित्येके। क्षुरगन्धि

---

१. M Ad B पश्याः. २. M Ad B पृष्ट्वा. ३. M Ad B °रजस्यैव. ४. M Ad B om °वे त्वा. ५. M Ad B तस्य. ६. M B देवान् twice. ७-७. Ad om. ८. M B दम्पत्योद्व्रतो°. ९. M Ad B °तयोर्जु°. १०. M Ad B गर्भपु°.

क्षुरपथं करोति। अप आशयन्[१] मन्त्रमपि वाचयेदित्येके। अभिषेकाद्याञ्जनान्तं याजमानम्। अहतं वासः। क्षौमाभावेऽन्यत्। सकृदेव मन्त्रमुक्त्वा दक्षिणं पूर्वाङ्गं[२] तथा सव्यं दक्षिणं दक्षिणमनु निरस्यति। अथैनं सर्वैः सह मन्त्रैर्दर्भपुञ्जीलैः। अथैनम् अश्मन्मे इति वाचयित्वा अपो देवास इत्येनं सव्ये पाणावभिगृह्य शालां प्रपादयेत्॥ [५]

अष्टर्चेन पावमानेनाहवनीयमुपस्थापयेत्। उपस्थापिता प्रब्रूयाद् इत्येके। अस्मिन्नवसर इष्टिपूर्वकं च दीक्षणीयाध्रौवं[३] दीक्षाहुतिषु प्रतिपादयेत्। अप्सुदीक्षापूर्वकत्वे शालाप्रयाणेऽयमवसरः। फलीकरणहोमानन्तरं दीक्षाहुतयो होतव्याः। मूलकल्पाभिहिते ब्रह्मदीक्षा कैशी च विकल्प्येते। कृष्णाजिनासर्पणादियाजमानमुपवेशनं तूष्णीकं प्राङ्मेखलादि सर्वं क्रियेत। देवपत्नी ब्रह्मपत्नी ऋतुदीक्षासु कैशिनी च विकल्प्येते। वाससा प्रोर्णवञ्छिरसोऽधस्ताद् वाससि[४] च[५]दशायां कृष्णविषाणा प्रबध्नाति। बन्धनाद्याध्वर्यवमाचमसप्रदानात्। हस्तौ प्रतपत्याहवनीये[६]। चमसेऽधि हस्तौ द्वयं निधाय 'स्वाहा यज्ञं मनसा' इति मन्त्रमुक्त्वाऽन्ते सहैव सर्वा अङ्गुलीर्निपिचति[७] विकुञ्चति। सह वा च्छन्दो दीक्षायाः। चतस्रः प्रदेशिन्यौ द्वौ चाङ्गुष्ठौ प्रसारयति। पत्न्याः कृतानुकरपक्षे सर्वे मन्त्राः [. . .][८] समानरूपाणामेव लोपो नान्येषाम्। यथा शालाप्रपदनं सन्नहनमुपनिषद इति समनरूपं [. . .][९] लुप्यत[१०] इत्यपरे। कृष्णाजिने अध्यूहितो दीक्षितस्योपरि स्वयमध्वर्युश्च दीक्षिते वादः सत्ये सुतरां प्रवृत्तिः परोक्षं मनुष्यनामकथनं पर्यायशब्दैरभिधानम्। अथ यानि नामानि नियोगतः प्रत्यक्षवचनीयानि विचक्षणेति तेषामुपरिष्टाद् दध्यात् देवदत्त विचक्षण, यज्ञदत्त विचक्षण इति। यान् गुरू[न्][११] ते चनसितेन तेषामुपरिष्टाद् दध्यात् अप्सुमित्र चनसित, ब्रह्मदत्त चनसित इति। कृष्णाजिनान्मा निर्यौषीत्॥ [६]

निर्गतकृष्णाजिनः कदापि मा भूत्। दण्डस्पष्टोऽस्तु, न विस्मरणीयः, सदा सन्निहित एव स्यात्। अन्तःशालं शालाभ्यन्तरेति। अमूमसावित्यत्र[१२] नाम ब्रह्मण्यादामुष्यायणन्त्या[१३] ब्राह्मणो[ऽदीक्षिष्टा][१४] ता वामिन्द्राग्निभ्याम् इति आमुष्यायण इति त्रिप्रवरकमेके[१५] ब्रुवते यथा ब्राह्मणो देवदत्तो वासिष्ठः

१. M Ad B आयशन्. २. M Ad B °पूर्वमाङ्. ३. M Ad B °णीयाध्रौवं. ४. Ad B वाससी. ५. M B चि. ६. M Ad B व्रत°. ७. M Ad B °र्निचति. ८. M Ad B broken. ९. M Ad B broken. १०. M Ad B ल्पस्यते°. ११. M Ad B broken. १२. M Ad B जूनूनसा°. १३. M Ad B ब्रह्मव्यादा°. १४. M Ad B broken. १५. M Ad B इत्यप्रवरके मके.

शाक्त्यः[१] पाराशर्यः तमिन्द्राग्निभ्याम्[२] इति[३]। ओन्नक्षत्राद् उदितनक्षत्रकालात्[३]। [४]आत्मन्नग्निमाहवनीयं[४] समारोहयते। अग्नेरुपरि मन्त्रेणापन्नादपि [५]स्पृणन्नभि-प्राणिति। व्रतचमसं सोमचमसवद्भैरद्भिः प्रक्षाल्य निदध्यात्। संवेशनयजुः सकृदेव, असंवेशने यजुश्चान्त्ये प्रबोधने तथा प्रतिपर्यावर्तनं पर्या-वर्तनयजुरावर्तते। तेषामर्थान्तरेण व्यवधाने व्रतविधानम्। मार्जनादि मार्जनान्तं व्रतयित्वा वाचमुपाकरोति। सनिरुपकल्पितः। अनुकल्पितदक्षिणस्य[६] न इति। व्यवस्थितोऽयं विकल्प[७] इत्यपरे। पूर्वस्मिन् पक्ष उपकल्पिताभिर्दक्षिणाभिः सहाभ्यधिकं सनिलब्धं नीयेत्। स एव पक्षो ज्यायान्। यन्मन्यते तत्प्रत्याख्यास्यतीति तं प्रतिपथं ब्रूयात्। प्रतिगृह्णाति। उस्त्रादयो जातिवचनम्। प्रपतनं मरणम्। वल्यौ रज्ज्वा वा बद्धा[८] म्रियेत। संशरणं सर्वसाधारण्येन व्याधिना मरणम्। अविज्ञातव्याधेर्निश्चेष्टीभूतस्य मरणम्। पौरुषो वा वधः पुरुषचैतन्यात्। महादेवो वा महादेवानुचरभूतावेशो वा हन्यात्॥ [७]

या[९] नद्धकं म्रियेत बन्धनप्रतिबद्धा म्रियेत। येयं प्रपतिता नष्टा म्रियेत वा, नैनामुपाकुर्यान्न मिश्रयेद्[१०] दक्षिणाभिरेनां न गोष्ठे आत्मीयैः पशुभिर्मिश्रयेत्। दक्षिणाभूतैरपि सन्निहितामेव रक्षितुमनुब्रूयाद्[११]। अनृत्विजे प्रसर्पकाय[१२] दद्यात्। योगः प्रस्थानं कदाचिदापद्येत। तप्त्वेति व्रतोपलक्षणम्। तप्तं व्रतयित्वा इति। मध्यन्दिनमध्यरात्रयोरपि व्रतम्। नास्तित्वं दर्शयितुमित्यपरे। समारोपणं पृथगरणीष्वजस्त्रैर्वा प्रयातीत्यन्ये। यदा वा सायं समवस्यन्ति तदाऽवसानमन्त्रं[१३] ब्रूयात्। उषित्वा प्रयन्प्रयाणमन्त्रमुक्त्वा प्रयायात्। वहन्तीरपः पर्यातुमशक्याः शक्याश्चेत् पर्यायोत्संवाहयेयुः संप्रवाहयेयुः। आप्येन पुरुषेण वोत्तारयेत्, नैवापः स्वयमवगाहेत, विशातयेत्। सन्ततमापरस्मात् तीरात् तेष्वपारे तीरे उदकान्ते यदुच्छिष्येत तन्न्यसेत्। अवधृतनिश्चयो निरावधं यत्र यष्टुं शक्यमिति मन्यते तत्र देवयजनाभिमन्त्रणादि कुर्यात्। अमेध्यं क्लीबं[१४] पश्येद् यच्चान्यदमेध्यमिति। लोके प्रसिद्धमित्यपरे। अभिवृष्टो जपति ऊर्गस्यन्नाद्यमूर्जम् इति प्रतिपद्य सर्वं वाचितम्। एवं जपेदित्यपरे[१५]। पूर्वं स्वयमेव जपित्वा उत्तरं वाचित इत्यपरे। स्निहानं स्नेहमश्रुनिष्ठीवितमित्यपरे[१६]। नासिकाश्मश्रुनिष्ठी-

---

१. M Ad B शाक्य:. २. M Ad B °मिन्द्राणिभ्यां. ३-३. M Ad B ओमित्यनक्षत्रान् कालाद् आदित°. ४-४. M Ad B आ नग्निमाह°. ५. M Ad B स्पृजन्नाभि°. ६. M Ad °स्यान, B °स्थान. ७. M Ad B विकल्पयित्य°. ८. M Ad B बन्धा. ९. M Ad B यो. १०. M Ad B °र्यान्निश्रये. ११. M Ad B रक्षितमनुष्याद्. १२. M Ad B सर्वताय. १३. M Ad B °मन्त्रणं. १४. M Ad B क्ली बा. १५. M Ad °त्यरे. १६. M °त्यरे.

वितम्। सेभुं[१] शिंघाणिकारे मूत्रपुरीषकारणेष्वाचमननिमित्तेष्वाचम्यानुमन्त्रणमसुत्यस्याह्नां परिसमाप्ते दीक्षितस्यादीक्षितव्रते वर्तेत॥ [८]

पत्न्या[२] अप्येतत् सह दीक्षायाम्॥ [९] इति प्रथमोऽनुवाकः॥

## अथ द्वितीयोऽनुवाकः

अन्त्ये दीक्षादिवसे रोहितं चर्म [३]पल्पूलयित्वोत्तरलोम विघ्नन्ति। विघातो नाम बलवद्विसार्य तस्यान्तेषु समन्ततः शङ्कूनां निघातः। उष्णीषचतुर्थानि सोमार्थानि आदित्यप्रक्षेपणार्थं[४] चरुं सुपर्णं स्पन्द्या रज्जुः[५] सोमवाहनयोजनार्था[६], राजासन्दी, [७]अरुणपिशङ्गैकहायनी चतुःशराव ओदनः बल्बजस्तुकानामान्तःसरः किञ्चित् तृणजातम्। श्वोभूते प्रातरेव प्रायणीयारम्भः। आदावेवास्या द्वारः संवृण्वन्ति। इदमादिष्वन्वाघातं न विद्यते। देवतापरिग्रहार्थत्वे विद्यत इत्यपरे। पत्नीमिह दीक्षायामध्वर्युर्दीक्षयेत् उपहूता इति सह तस्या[८] अपि पूर्वाणि कर्माण्यनुजानीते। अनुज्ञाने चानुज्ञानं च न स्तः सह। दीक्षायां दम्पत्योराप्यायनकाले[९] तेभ्यस्तण्डुलानपयच्छति। यत्नतो निदध्यादुदयनीयार्थम्। प्रायणीयस्याधिश्रयान्तं प्रतिप्रस्थातैव कुर्यादित्यपरे। भूय आज्यं निर्वपेत्। सर्वं श्रिते चरावानीय तत्पुनराज्यस्थाल्यामवस्कन्दयेत्। ध्रुवादवस्राव्य[१०] तेन ग्रहणादि कृत्वा प्रचरेत्॥ [१]

पथ्या स्वस्त्याद्यर्थमेव चरावानीयावस्रावयेदित्येके। सर्वमिति ज्यायः। पत्नीसन्नहनमेतदादिषु लुप्यते। तथा दम्पत्योर्व्रतोपायनमित्येके। वैकल्पिकावेतावाज्यभागौ। अभावः[११] प्रायेणानयोराचार्याभिप्रेतः। उपांशु याजविकाराः। पशावपि[१२] प्रधानयागादभिमन्त्रणम्[१३]। उपांशु देवताकल्पं च। दीक्षणीयादीनामुपसदन्तानां[१४] तन्त्रस्वरभिन्ना[१५] मन्दादुच्चरितं दीक्षणीयायां, मन्दतरं[१६] प्रायणीयायां, मन्दतममातिथ्यायाम्, उपांशु उपसत्स्वित्येके। प्रधानविषयोऽयं भेदः। तन्त्रं सर्वेषाम्, उपांश्वित्यपरे। अदितिमिष्ट्वा मरुतो यद्ध वो दिवः इति मारुती [. . .][१७] इत्येके। अतिवालयतो निदध्यात्। फलीकरणहोमं चात्र केचित् जुह्वति। नैष आचार्याभिप्रायः। अतीकाशवद्धिरण्यमवदधाति। अङ्गुलीयकादि

---

१. M B सेभः, Ad सेभ्यः. २. M Ad B पत्या॰. ३. M Ad B वन्मूल॰. ४. M Ad B ॰प्रेपक्ष॰. ५. M Ad B रजः. ६. M Ad B ॰तयोर्जना॰. ७. M Ad B अरुणापिङ्गलैक॰. ८. M Ad B तम्य॰. ९. M Ad B ॰त्योरप्यापयमनकाले. १०. M Ad B लुलाकादवस्राप्य. ११. M Ad B भावं. १२. M Ad B पश्वापि. १३. M Ad B ॰गादब्दिम॰. १४. M Ad B दीक्षयिणीया॰. १५. M Ad B ॰स्वरा॰. १६. M Ad B मन्दं. १७. M Ad B broken.

चतुर्गृहीते सर्वं प्रायणीयाज्यशेषमवनयति। तृतीयमन्त्रं द्विरावर्तयेत्। सर्वं[१] वा मन्त्रजातं चतुरावृत्य[२] चतुर्गृह्णीयात् सहिरण्येन। प्रणीतानिनयनं तूष्णीकम्। प्रायणीयस्थालीमुत्स्विद्य सम्यङ् निर्णिज्य तस्यामवयातान् तण्डुलानोप्य प्रायणीयाया एव वेदं मेक्षणमिति स्थाल्यामवधाय स्तीर्णमेव बर्हिस्तया सहोपनह्य मध्यमे स्थूणाराजे [३]शकलीकृत्यानुवेष्ट्य निदधाति। स्फ्यमुदपात्रं [४]पद्धरणीमादायाध्वर्युयजमानौ। तत्र राजक्रयणीमानयन्ति। तामभिमन्त्रयेते चिदसि इति। मन्त्रोक्तिर्बन्धनमात्रम्, पदि बन्धनम्। एवमनुमदतोऽध्वर्युयजमानौ। अथैनां तावेव प्रदक्षिणं परिक्रामतः। अथातः पश्चात् स्थित्वाऽध्वर्युः प्रति प्रैषमाह। प्रेषितः परिक्रर्मी प्राचीमुदीचीमुत्क्रमयते॥ [२]

तस्या[५] अभ्युत्क्रामन्त्याः [६]सक्थ्नोऽधस्तादभिपद्य वस्व्यसि[७] इत्यादिभिः षड्भिर्मन्त्रैः। अभिगृह्णात्युभाभ्यां हस्ताभ्यां यत्रास्याः सप्तमं पदमाहितम्। हिरण्यमभि तत्रस्थ एव हिरण्ये परिलिखति। अपोद्धृत्य हिरण्यं खनित्वा[८] संवपेत्। प्रतिसंवपनं मन्त्रावृत्तिः। खननं तूष्णीकम्। यावन्मूतं यावत्क्लिन्नम्। संकाशयति समीक्षयति। स्वयमेव मन्त्रमुक्त्वा यजमानेनापि पत्नी स्वयमेव मन्त्रं ब्रूयात्। समीक्षितमेतस्मिन् कूपे यतः पदपांसव उदात्ताः॥ [३] इति द्वितीयोऽनुवाकः॥

## अथ तृतीयोऽनुवाकः

### [ सोमक्रयः ]

राजा विचितो[९] भवति। रोहिते चर्मन्नधिलोमकस्यां पार्श्वे वासः प्रत्युदीर्णं च। तस्यैव चर्मण उत्तरार्धे तस्याभ्याशे प्रदेशान्तर इत्यपरे। क्रयदेशेऽपो निधाय तासामन्तिके दक्षिणतो ब्रह्मा आस्ते। अङ्गुष्ठे सौवर्णमङ्गुलीयमाबध्याङ्गुष्ठाग्रमेकैकेनाङ्गुल्यग्रेण सन्धाय पर्यायशः, तेन मुष्टिना पञ्चकृत्वो मन्त्रमावृत्य मुष्टीन् राज्ञो मिमीते। महानाम्न्या प्रदेशिन्या कनीयस्या मध्यमया कनीयस्या मुष्टिक्रमो याजुषे माने। तथैव पञ्चकृत्वस्तूष्णीं मध्यमया कनीयस्या प्रदेशिन्या महानाम्न्या प्रदेशिन्या तूष्णीं माने मुष्टिक्रमः[१०]। अथ प्रदेशिन्या मध्यमया महानाम्न्या कनीयस्या प्रदेशिन्येति याजुषे माने, कनीयस्या महानाम्न्या मध्यमया प्रदेशिन्या कनीयस्येति तूष्णीं माने, दशकृत्वो मिमानोऽर्धवेलां प्रजाभ्यस्त्वा इत्युपसमूहति॥ [१]

१. M Ad B सर्वा. २. M Ad B °वर्त्य. ३. M Ad B कशली°. ४. M Ad B पन्धरणीमित्या°. ५. M Ad B तस्य. ६. M Ad B स्नुप्नोदस्ता°. ७. M Ad B वस्प्यसी°. ८. M Ad B खात्वा. ९. M Ad B °पि चि°. १०. M Ad B मुष्टिकामः.

चर्मण्यवशिष्टानंशूंश्चर्मण्यवहत्य मिमीते। राज्ञोऽपि सृष्टिमिच्छेत्। उपन्यस्यति वाससोऽन्तान् संगमय्य दशादिना बध्नीयात्। अनुग्रन्थति विस्त्रंसयति। समायत्य सम्यगुपरि बध्वा चर्मणि सादयेत्। सोमविक्रयिणोऽभ्याशे सादनान्तं कृत्वाऽग्रेण यूपावटं[१] पलाशशाखां निहत्य समुपनद्धं राजानं तस्यामासज्य मनाक् तूष्णीमासीत। तत्र तत्र यत् क्षिप्रम् इति वा त्वरध्वम् इति वा कुरुत इति वा क्रयसंबन्धं कञ्चित् कञ्चित् ब्रूयात्। तं सोमविक्रयिणं संकल्प्य सर्वं कुर्वीत संपादवर्जम्। कला गोः षोडशांशः[२], शफोऽष्टमभागः फलानि क्षीरं दुग्धमात्रं, पयः शान्तफेनं शीतं, प्रतिधुक् पुनः प्रस्नुतोपात्तं, शर आविर्भूतस्नेहं, शृतं पक्वम्। वयांसि[३] निष्क्रयमाणानि, अधिदेयानीत्येके। एनं सोमविक्रयिणमाह-[४]अन्यया परिपालयिष्यामो नव ऋषभः प्रगृहाण प्रसारय आवृत्तया[५] आवृत्तेति वा। तस्याः पृष्ठेन सोमविक्रयिणमभिभवन्निव प्रकर्षेण बाधेत॥ [२]

आत्मानं प्रत्यावर्त्यान्वर्जति विसृजति। तामेतामजां सोमविक्रयी लभते। सैकहायनी। तानीतराणि[६] राजक्रयणानि यजमानस्यैव भवति। यजमानः शुक्लामूर्णास्तुकामादाय दशापवित्रस्य मध्ये बध्नीयाद् येन सोमं पुनन्ति। तं प्रतीक्षते। यजमानस्य दक्षिण ऊरावा सादयतोऽध्वर्युयजमानौ। राजानमेनमागतं प्रति स्वयमेवापोर्णुते[७] प्रावरणमपनयति। स्थानादिभ्योऽनुदिशतोऽध्वर्युयजमानौ। राजानमादायोत्तिष्ठति यजमानः। एतदाद्यासन्नोपस्थानान्तं स एव कुर्यात्। कृष्णाजिनस्तरणमात्रमध्वर्युरेवेत्येके। तत्र नीडे सोमवाहनस्य अपरेण सोमवाहनं पर्यानीय[८] दक्षिणतस्तिष्ठन् राजानं सादयेत्। सोमवाहनं पर्यानह्यति। दक्षिणपूर्वस्यां दिशि दशातो बध्नीयात्। तयोराळं कृष्णाजिनेऽवदध्यात्। अभिमन्त्रयेते अध्वर्युयजमानौ। अपरेण सोमवाहनं पर्यानीय दक्षिणमनड्वाहं युञ्ज्यात्।[९] विमुच्यैवापरेण सोमवाहनमतिगमयेदित्येके। अवगूहनार्थो मन्त्रः। अभिदधाति। [१०]शुगृबन्धनमामुञ्चेत्। उपस्तंभनाभिमर्शनं सकृदेव। विष्टम्भः परिणाहः। विष्टम्भनार्थं तिर्यक् स्थापितं काष्ठं द्रुपदाख्यमनुष्ठानफलकं यद्यन्ततोऽधितिष्ठेत्। स्पन्द्या शकटयोजन्यभिधानी वा। सुब्रह्मण्योम् इति ब्रूयात्। नवकृत्व इत्येके। छदिः शकटस्यान्वारभेते अध्वर्युयजमानौ स्पन्द्यामस्पृशन्तौ। आहवनीयादुल्मुकादानम्[११], उपस्तभ्नाति उपस्तंभनीम्। स्थूणां दत्त्वा शकटं

---

१. M Ad B °वटा.. २. M Ad B षडाशांश. ३. M Ad B पयांसि. ४. M Ad B °णमाहन्यया. ५. M Ad B आवत्तया, cf. VādhŚS 6.8.39 (fn. 4 : प्रत्यावर्त्तया). ६. M Ad B कानीत°. ७. M Ad B मेवोपो°. ८. M पर्यायानीय, B °र्याय. ९. M B पुज्या°. १०. M Ad B शृग°, शुल्ब. ११. M Ad B °दुन्मुका°.

**स्थापयति।** उन्मुक्तो वरुणस्य **इत्यभिधानीमपनयेत्। उपचारणतः उपस्तंभतः पूर्वं युक्तं विमुञ्चेत्।।** [३]

## [आतिथ्येष्टिः]

**गृह्णाति निर्वपति। बर्हिः संभरन् काशमयं प्रस्तरं गृह्णीयात्। इक्षुपत्रे तिरश्च्यर्थे। तेनागत्येक्षोरित्येके**[१]**। कार्ष्मर्यमयान्**[२] **परिधीन् कुर्यात्। शाकलानीध्मकाष्ठानीत्येके। निर्वापकाले पत्नी प्रविश्यान्वारभेत।** अनुमन्यस्व **इति चोक्त्वा** अनुमन्ये **इति प्रब्रूयात्। मन्त्रमुष्टयो मन्त्रवन्तः। षष्ठस्तूष्णीकः। पञ्चैव मुष्टयो न तूष्णीक इत्येके। सर्वेषु सावित्रोऽनुषक्तव्यः। सर्वेषु निगमेषु विष्णुशब्द एवोच्चार्यः। इतरमप्यनड्वाहं**[३] **मन्त्रेणैव विमुच्य तत्रैव स्थापयित्वा दक्षिणामुखं वाचं**[४] **विसृज्य प्राञ्चं राजानमुपावरोप्य उत्तरेण शकटं परिक्रमय्य सम्राज्ञि प्रपादिते** या ते धामानि **इति पूर्वया द्वारा प्रपादयेत्। दक्षिणेनाहवनीयं सम्राडासन्द्यां सम्राज्ञि सादिते अपरेणाहवनीयमेति। गमय्यापरस्यामासन्द्यां मन्त्रेण राजानं सादयेत्। पूर्वमेव पूर्वया द्वारा प्रपादिते रज्जूत्तरेणाहवनीयं स्थिते सम्राजं प्रपाद्यापरेणाहवनीयं मन्त्रेण राजानं प्रपादयेदित्येके। तूष्णीं सम्राज्ञः पूर्वमुदपात्रं निनीय मन्त्रेण राज्ञो निनयेत्। अग्नीध आधानं प्राशित्रस्य ब्रह्मणे परिहरणं होतुराहुतिरित्येतावद्वाचनिकं क्रियेत, नान्यत्किञ्चित्। ध्रुवाऽऽप्यायनमप्राकृतमन्त्रकम्।** [५]**तानूनप्त्रमापादयितुं विगृह्णाति विविधं गृह्णाति। पञ्चभिर्मन्त्रैः पञ्चकृत्वो गृह्णन् अन्ते सर्वं वाऽवनयेत्।**[६] **तानूनप्त्रं प्रति विनयन्ते, संज्ञानमेतत्। घृतं हिरण्यं च चमसमुपस्पृशन्**[७] **ते शपथं कुर्वन्त्याकर्मपरिसमाप्तेः** अन्योऽन्यस्मै न द्रुह्याम: **इति वदन्तः। मन्त्रेण घृतं हिरण्यं च न स्पृशन्ति। तत ऊर्ध्वं न मिथो द्रुह्येत् पुराऽऽकर्मपरिसमाप्तेः**[८]**। अतिवाचयति पूर्वं मन्त्रमतीत्य वाचयति। अनेन तानूनप्त्राज्येन सहापराह्णे तप्त्वा व्रतं प्रयच्छति। देवोपसदनमपि प्रातरेवानुपसदमेव वा व्रतमस्मिन्नहन्यपराह्णे सम्पद्यत इति मन्त्रलिङ्गोपपत्तिः।।** [४]

**तथा सति त्रिव्रतमस्मिन्नहनि दैक्षं प्रातरनूपसदं द्विर्दैक्षं**[९] **चतुःस्तनत्रिस्तनद्विस्तनैकस्तनान्यानुपूर्वोपसत्सु। कति पय अवान्तरदीक्षाव्रते**[१०]**।**

---

१. M Ad B तेनादयस्ये॰. २. M काष्मर्य॰. ३. M Ad B ॰नध्वाहं. ४. M Ad B वोपसृज्य. cf.: VādhŚS 6.10.3. ५. M Ad B तानूनपूमा॰. ६. M Ad B वपनयेत्. ७. M Ad B मुपमृश॰. ८. M Ad B ॰समाप्तः. ९. M Ad B द्वि दैक्षं. १०. M Ad B वाक्याक्षाव्रते; cf. VādhŚS 6.11.7.

**स्तनचतुष्के वत्सायैकस्तनमात्रमवशेषयेत्।** कतरत्पूर्वं करिष्यामः **इत्यादिर-दृष्टार्थो मन्त्रो वाच्यः, नैष मन्त्रो वाच्यः। अत्र ग्रन्थ एवैष विकल्पना-मात्राभिधायी इत्यपरे। समिधं यज्ञियस्य वृक्षस्य प्रोक्षितामादत्ते। सर्वत्रैवं समिच्चोदनायां संतरां सम्यक्तरां समायच्छते, दृढीकरोति अशिथिलीकरोति। तप्तव्रतः उष्णव्रतो भवति। ततः प्रभृति मदन्तीभिरुष्णाभिरेव मार्जनादिरुद-कार्थम्। आऽवान्तरदीक्षाविसर्गात्पूर्वं व्रतनं** ये देवाः **इति प्राक्तनमन्त्रम्। एतत्समारूढा एव अवान्तरदीक्षायामेव समारूढाः। ततः प्रभृति व्रतकाले समारोपणविसर्गौ न भवतः। स्वे दक्ष इत्यत्र समारोपणम्** अहं त्वदस्मि **इति वा। अवान्तरदीक्षाविसर्गकाले विसर्गः। अवान्तरदीक्षोपादानविसर्गाभ्यां तु विकल्प्येते**[१]**। विकृतिविषयावेतावित्येके। समुच्चीयेते हेत्यन्ये। दीक्षामेवैता-वित्यपरे। तत उत्तरेण वेदिमत्याक्रम्य वेद्य [. . .]**[२] **स्तेष्वासक्तानंशूंस्तत्रैवाधातुं स्रुग्व्यूहना[दि]**[३]**वाचनिकमध्वर्योः। यजमानस्यापीत्यन्ये। परिधीनां**[४] **प्रस्तरस्य चाञ्जनं तूष्णी[म्।. . .]**[५] **षु स्रुक्षु निह्नुवते। द्यावापृथिवीभ्यां नमस्काराञ्जलिं कुर्वन्ति। किमित्युष्णा भवन्ति।** ताभिराद्रव[६] **इत्याध्वर्यवं तृ[णग्लाभं]**[७] **प्रस्तराय प्रस्तरेण उपसन्नह्यासहनादिकं संस्कारं कृत्वा निदधाति**[८]**। तृणग्लाभं तृणकलापीम्। अन्यां काञ्चिन्मुष्टिमात्रमसिदादानादिना संस्कृत्याप्रस्तराय अप्रस्तरणाय। प्रस्तरेणैवोपसन्नह्य निदधातीत्येके। मदन्तीभिराग्नीध्राहृताभि-र्मार्जयते॥ [५]** इति तृतीयोऽनुवाकः॥

## अथ चतुर्थोऽनुवाकः[९]

### [प्रवर्ग्योपसद्]

**अत्रैवातिथ्यानन्तरं शीघ्रमयं प्रैषो वक्तव्यः। अस्मिन्नहनि बहूनि कर्माणि कर्तव्यानीत्यनुपरमेण शीघ्रं पदार्थाः कर्तव्याः। अतिरात्रः प्रथमयज्ञो प्रवर्ग्यत्व-मुक्ते**[१०] **च सर्वदोपसदो घर्मवानाघारः। प्रयाजविकारास्ता वाचनिकोऽत्राघार इत्येके। तयोरुभयोः पक्षयोः ये प्रकृतावङ्गप्रधानार्थास्त इह प्रवर्तन्ते। अनूयाज-विकारा इत्यपरे। तत्रापि तत्तुल्यमुपांशुयाजविकारा आस्युः। आघारेणात्रेतरा**

---

१. M Ad B ˜ल्प्येते. २. M Ad B broken. ३. M Ad B broken. ४. M Ad B परिधिनां. ५. M Ad B broken. ६. M Ad B ˜द्राव. ७. M Ad B broken; cf. VādhŚS 6.11.30. ८. MSS wrongly show the sign of close of the Kaṇḍikā here, and beginning of the next Kaṇḍikā from तृणग्लाभं in new para, cf. VādhŚS 6.11.30-32. ९. M B अथ चतुर्थः; Ad अथ तुरीयः. १०. M B ˜मुक्त्वे.

अङ्गेज्याः परिसंख्याताः[१], तथा सति ये प्रकृतावङ्गार्थाः प्रधानार्थाश्च [२]सन्निपत्योपकारिणस्त इह धर्माः प्रवर्तेरन्। अस्मिन्पक्षे स्तम्बयजुषोऽर्वाक् पदार्थानां प्रेषितोऽग्नीत्[३] कर्ता स्यात्। आज्याधिश्रयणमात्रमपूर्वं कृत्वोपास्ते। अथाध्वर्युर्वा तन्त्रं सर्वं कुर्यादित्येके॥ [१]

अध्वर्युणैव निरुप्तस्याधिश्रयणमात्रमग्नीत् कुर्यादित्येके। अपरे प्रवर्ग्यानन्तरमध्वर्युणा प्रेषितोऽग्नीद्[३] गार्हपत्याहवनीययोरभ्यादध्यात्। दक्षिणाग्नावपीत्यन्ये। नैव क्वचिदभ्यादध्यादित्यपरे। प्रागेवातिथ्यान्ते स्तीर्णादन्यत्तृणकलापिमन्त्रेण संभृता वेदिस्तरणाय प्राक्तन एव प्रस्तरतृणकलाप्या सह[४] नद्धः प्राक्तनमेव वेदिपरिधिस्तिरश्च्यपि चतुर्दश दारुरिध्मः सह परिधिभिः। यथाप्रकृतीत्येके। शाकलान्येवेध्मकाष्ठा[५]न्युपसत्स्वपीत्यन्ये। तत आहवनीयं परिस्तृणीयाद्। द्वावित्येके। दक्षिणाग्निमपीत्यन्ये। स्फ्यं चाग्निहोत्रहवणीं च जुहूं चोपभृतं च स्रुवं चाज्यस्थालीं च प्रणीताप्रणयनं चोपांशुयाजनपक्षे एके सादयन्ति। पवित्रे आदाय ब्रह्माणं दक्षिणत उपवेश्य प्रणीताः प्रणयेत्। उपांशुयाजविकारत्वे पक्षान्तरेष्वप्रणीयैव प्रणीताः यजमान वाचं यच्छ इत्युक्त्वा हस्तौ मार्जयित्वा मदन्तीभ्य आसिच्य प्रोक्षणीः संस्कृत्य पात्राणि प्रोक्ष्यातिशिष्टा निधायाज्यं निरुप्याधिश्रित्य पर्यग्निकृत्वा मदन्तीषु भूयसीरप आनयेत्। अथाध्वर्युर्व्यूह्य बर्हिः स्तम्बयजुर्हरेत्। उद्धननं च बर्हिषोऽन्तरालेषु[६] योयोपनं[७] च। प्रेषितोऽग्नीन्म[८]दन्तीभिरद्भिः संपूर्य प्रोक्षणीः सादयित्वेध्माबर्हिरुपसाद्य मन्त्रेण स्रुवं संमृज्य तूष्णीं स्रुचौ संमृजेदपूर्वपक्षे। पक्षान्तरेषु यथाप्रकृति वेदेन संमार्गः। वेदस्य प्रच्छिद्यानुप्रहरेद्वोदस्येद्वा समस्तमन्त्यायामुपसदीति। वेदेनैव संमृज्यान्त्यायां प्रतिपादयेदित्येके॥ [२]

विभज्य सप्तधा परिवासनानि सर्वत्र संमृजेत्। प्रतिपादयेच्चेत्येके। पत्नीमुपनिषदनुपनिषदौ[९] वाचयित्वा पत्न्यवेक्षितेनाज्येनोदेति[१०]। अथाध्वर्युराज्यानि गृह्णन्नुपांशुयाजविकारत्वे ध्रौवैर्मन्त्रैस्त्रीणि चतुर्गृहीतानि गृह्णीयात्। तूष्णीमित्येके। प्रयाजविकारत्वे जौहवैः। अपूर्वत्वेऽनूयाजविकारत्वे च तूष्णीम्। अनुयाजविकारत्वेऽनुमन्त्रणानि सुवीर्याय त्वा इत्यादीनि, अपूर्वत्वे तु न सन्ति। वेदप्रोक्षणं[११] बर्हिष्येव। प्रोक्षेत् स्तरणबर्हिष्ये तृणकलाप्या च। स्रुक्सादनकाले यथाप्रकृति जुहूपभृतौ सादयित्वा ध्रुवामन्त्रेणाधिकृतेनाज्यस्थालीं सादयेत्।

---

१. M Ad °संघ्याता. २. M Ad °वत्वो°. ३. M Ad B °ग्नीन्. ४. M Ad B सहन्. ५. M Ad B काष्ठान्यप . ६. M Ad °राळेषु. ७. Ad B om योपनं. ८. M Ad B ग्नी मद°. ९. M Ad B षदानुनिष°. १०. M Ad B पत्नी अवे°. ११. M Ad B वेदं प्रो°.

पृथिवीजन्मनाऽऽज्यस्थालीनाम्ना इत्येके। अपूर्वपक्षे त्वाज्यस्थालीमेव मन्त्रेण सादयेत्। तूष्णीमितरे। ध्रुवाऽसदत् इत्यपूर्वपक्षे, पक्षान्तरेषु ध्रुवा असदन्[१] इति। पत्नीराज्यस्थाल्यां व्याचष्टे। सर्वास्तूष्णीम्। उपांशुयाजविकारत्वे षष्ठप्रणवे सर्वमिध्ममभ्यादध्यात्। उत्तरत्रोपवाजनं बर्हिश्च शकलं चादायोत्तरतस्तिष्ठन् [२]प्रवरायाश्राव्य शकलं प्रास्य सीद होतर् इत्येतावद् अञ्जलिं कुर्यात्। प्रसूतः स्रुचावादाय यथोक्तं कुर्यात्। उपांशुयाजविकारत्वे मध्ये प्रदक्षिणं मण्डलाकारमाहुतीर्जुहुयात्। मध्य एव वा प्राचीः। तथाऽपूर्वत्वे प्रयाजविकारत्वे प्राचीरभिक्रमन् वर्गक्रमेण[३] वा पुरस्ताद्दक्षिणत पञ्च जुहुयात्। अनूयाजविकारत्वे मध्यादुपक्रम्य प्रतीचीरन्ते प्राचीराहुतिः संस्रावेण संभिन्द्यात्। अनुमन्त्रणमुपांशुयाजविकारत्वे दब्धिरसि इति। सर्वेषां याजविकारत्वे अग्निं देवानां प्रीणामि स मा प्रीतः प्रीणातु, सोमं देवानां, विष्णुं देवानाम् इति॥

अनूयाजविकारत्वे प्रजावान्पशुमानायुष्मान् यज्ञेन इति। नास्त्यपूर्वत्वेऽनुमन्त्रणानि, यावदुक्तमेतावत ऊर्ध्वं कुर्यात्। उपांशुयाजविकारत्वे पुनः पक्षान्तरे त्वरमाणा इवोपसद्भिः प्रचरेयुः, नाकृतमाद्रियेरन्। सव्येन हस्तेन धनुरिव धारयन् दक्षिणेन हस्तेन समस्ताङ्गुलिना स्रुवमादायास्यन्निवोपसदं जुहुयात्। अनुमन्त्रणं याजमानम्। अत्र त्रिस्तनव्रतं प्रयच्छन् मध्यरात्रे चैव व्रतयन् द्विस्तनव्रतं मध्यायामुपसदि। तथैकस्तनमुत्तमायामुपसदि। एकस्तनं[४] व्रतं विभज्य तत्रोक्तयोः कालयोर्व्रतयेत्। सायं प्रातरेव उपसदङ्गमपि व्रतमित्यपरे। पूर्वाह्ण एव पौर्वाह्णिक्यौ प्रवर्ग्योपसदौ कुर्यात्। [५]अपराह्ण एवापराह्णिक्यौ। [३]

## [महावेदिविमानम्]

एतां रात्रिं प्रति प्राचीं दिशं स्पाशयन्ते। कृत्स्नायां रात्र्यामनन्यव्यापारदिगुपलक्षणमेव यतन्त इत्येके। दृष्ट्वा प्राङ्मुखः स्थित्वा कृत्तिकाद्यानामुदितनक्षत्राणामार्जवे पुरुषं स्थाणुं वा स्थापयित्वा तत्र शङ्कुं निहत्य यत्र च स्थित्वा पश्यति तत्र च निहत्य तयोः [६]शाङ्क्वोरुपस्पन्द्यामायम्य प्राचीं दिशं जानीयात्। प्राग्वंशार्थमादरेणानुपलक्षितायामपि दिशि नियोगतो निश्चिनुयादित्यपरे। तथोपात्तया दिशा प्राग्वंशस्य पूर्वस्मात् स्थूणाराजन् पञ्चसु प्रक्रमेषु वेद्यन्तार्थं शङ्कुं निहत्य ततः पुरस्तात् षट्त्रिंशत्सु यूपकालं निहन्यात्।

१. M Ad B असदग्नीति. २. M Ad B प्रपराया°. ३. M Ad B वर्मक्र°. ४. M Ad B त्वेक°. ५. M Ad B स्वपरा°. ६. M Ad B शाक्वोप°.

प्रकृतिभिरुपक्रमः। सर्वमितरत्तुल्यम्। स्पन्द्या मानरज्जुस्तस्याः पाशादेकोनचत्वारिंशत्सु प्रक्रमेष्वरत्निषु वा निरञ्छनं[१] कुर्यात्॥ [४]

कल्पपक्षे प्रक्रमाः शुल्बपक्षे[२]ऽरत्नयः। निरञ्छनमत्र[३] श्रोण्यर्थम्। निरञ्छता[४] त्रिष्वंसार्थं लक्षणं कुर्यात्। लक्षणद्वादशसु पाशान्तरं तं पाशं यूपावटीये प्रतिमुच्येतरं प्रथमनिहते निरञ्छनेन दक्षिणावायम्य लक्षणशङ्कुं निहन्यात्। स दक्षिणांसः[५]। विपर्यस्तौ पाशौ प्रतिमुच्य निरञ्छनेनोत्तरो रज्जुमायम्य लक्षणे शङ्कुं निहन्यात्। स उत्तरांसः[६]। अथैनां स्पन्द्याऽक्ष्णया मानं मिमाय समन्ततो दर्भमय्या स्पन्द्यया परिनह्य[७] पृष्ठ्यामातनोति। चात्वालोत्करान्गीध्राणां कल्पपक्षे यावन्तः प्रक्रमास्तावन्तः[८] शुल्बपक्षेऽरत्नयः। तृतीयं वेद्या आग्नीध्रीये मध्ये न भवितव्यम्। प्रक्रमा एवेत्येके। पञ्चारत्नि चतुरश्रमाग्नीध्रागारम्। तस्यार्जवे दक्षिणे वेद्यन्ते तत्परिमाणमेव मार्जालीयम्। ततो यूपकालाच्छङ्कोरपरतः[९] सर्वत आयामविस्तराभ्यां दशपदोत्तरवेदिः शतपदपक्षे। त्री वेद्यन्तादपरतोऽर्धप्रक्रममवशिष्योत्तरवेदिं मिमीत इत्येके। तदेव ज्यायः। प्रथमनिहताच्छङ्कोरुत्तरवेद्या अर्धप्रक्रममात्रमवशिष्य नवकं समचतुरश्रं हविर्धानं मिमीते निरन्तरमेव दशकमित्येके[१०]। नवकं तु ज्यायः। प्रथमनिहताच्छङ्कोः पूर्वतोऽर्धप्रक्रममवशिष्य सदो मिमीते। निरन्तरमेव दशकव्यासमित्येके। तच्च स्यादुदगायतं विस्तारार्थमेव दक्षिणतः पृष्ठ्याया उत्तरतस्त्वधिकमात्रेणोत्सेधत्वादौप्तापेक्षम्[११]। धिष्णियानामन्तरालानां चोदकपृष्ठ्याया अर्धचतुर्दशमात्रेण भवितव्यम्। तेऽर्धपञ्चमप्रक्रमा उत्तरेणाच्छावाकस्य धिष्णियं संचारेण भवितव्यम्। तदनुरूपमुदग्वर्धयेत्॥ [५]

शुल्बपक्षे[१२] किष्कुभिर्मिताया वेद्याः प्रथमनिहताच्छङ्कोर्द्वयोः किष्कोर्नवव्या[सं][१३] सार्धं दक्षिणतः पृष्ठ्याया इतरदुत्तरतस्तदर्धाष्टककिष्कुक्षेत्र[१४]धिष्णियानामन्तरालसञ्चाराणां च प्रभवे वा अष्टौ[१५] दक्षिणतः पृष्ठ्यायाः षडुत्तरतः। अस्मिन्पक्षे सर्वतो मध्यत औदुम्बरी मिता स्यात्। पृष्ठ्यायाश्च दक्षिणत किष्कुमात्रे होतुर्धिष्णियं पृष्ठ्यायामितरयोः पक्षयोः। शुल्बपक्षे [. . . .][१६] हविर्धानं स्तम्बयजुर्नाम्ना धर्मान् गृह्णाति। वेदिशब्दवाच्यायां महावेद्यां सर्वे वेदित्वापादनार्था धर्माः प्रवर्तन्ते। प्रदर्शनार्थं यजुरादिवचनमित्येके। तथा सति

१. M Ad B नीग॰. २. M Ad B शुत्पक्षे. ३. M Ad B मात्रव श्रो॰. ४. M Ad B ॰ञ्छना. ५. M Ad B ॰णासः. ६. M Ad B ॰रासः. ७. M Ad B परितत्य. ८. Ad oms प्रक्रमास्तावन्तः. ९. M Ad B ॰काल्याच्छ॰. १०. M Ad B ॰त्येक. ११. M Ad B ॰मावपोत्सत्वा॰, doubtful. १२. M Ad B पक्षके. १३. M Ad B broken. १४. M Ad B ॰ष्टकमिष्कु॰. १५. M Ad B दष्टौ. १६. M Ad B broken.

वेदमभिमन्त्र्य वेदिं संमृज्य उत्तरतोऽत्रैवापवर्जयेत्। स्फ्ये[नोद्धृत्य चात्वाल-][१]काले निदध्यात्। दक्षिणतो महावेद्यै [२]ब्रह्मैवोपविशति तूष्णीम्। एवं यजमानश्च समुद्धन्ति। प्रेत्याग्नीध्रश्च हरेत्। कृण्वन्ति वेदिं स्थ [लानि]च निम्नानि पूरयित्वा स्थाणुंश्चावृत्य[२] पांशुभ्योऽन्यत्सर्वं कुर्युः। वेदिप्रदेशं हृत्वा उत्तरवेद्यां सादयति। उत्तरवेदेः[३] पूर्वस्य करण्या अन्तिके शुल्बिणी नामोत्तर-नाभिच्छादनार्थं वाधूलकेषु प्रसिद्धः कश्चिदाकृतिविशेषः। अर्धव्रतम् अर्धस्तनव्रतम्, सकृद्दुग्धमेकस्तनव्रतं द्वेधा विभज्यार्धस्तनव्रतं प्रयच्छेत। एतदेव एतस्मिन्नेवकाले पूर्वाह्ने। एवं विपरीतमाज्यानि गृह्णीयात्॥ [६]

[४]सौरीं हुत्वेध्ममादीपयन्ति[४]। उद्वासनानन्तरमग्निप्रणयनमारभेत। अत्रैवाग्नये तृतीयमुपनिवपन् व्यवच्छिन्नेध्मं निवपेत् भस्मनि, नाग्नेरुपरि। मन्त्रवदुत्तरं परिग्राहं परिगृह्य मन्त्रेणैव योयुपित्वा पूर्वेण शालामवस्कभ्य संप्रेष्येत्। प्राकृतोऽयं प्रैषखण्ड इत्येके। नेत्यपरे। एतदेव ज्यायः। प्रोक्षण्यस्तूष्णीकाः पवित्रान्तर्हिता[५] आपः। इध्मस्तु शाकलोऽअग्नीषोमीयार्थः। बर्हिः संभरणकाल उपादातव्यम्[६]। प्रोक्षणायात्रैवोपादीयते। द्विः प्रोक्षणीकत्वं चास्य धर्मो वाचनिकः। शाकलत्वं सह परिधिभिः। परिधीन् परिहाप्येत्येके। न तरेत्तु याजोऽर्धसमिद्धिश्चेत्यपरे। एतत्सारं बर्हिर्महावेदिस्तरणार्थम्। प्रोक्षणं च सर्वमप्राकृतस्तूष्णीकम्। आसन्नमुपरवकाले महावेदिकं बर्हिः प्रोक्षति। तृणकलापी[७] पृष्ठ्यास्तरणार्था। एधा आहवनीयाग्निसमिन्धनार्थाय। प्रोक्षिताः पृष्ठ्याः प्रथमनिहतात्प्रभृत्या यूपावटीयान्मध्यसूत्रम्॥ [७] इति चतुर्थोऽनुवाकः॥

## अथ पञ्चमोऽनुवाकः

### [हविर्धानसंवर्तनम्]

हविर्धाने शकटे प्रतियुक्तचक्रे यत्र हविर्धीयतेऽभिषुतोऽनभिषुतश्च सोमः, तीर्थेन प्रपद्य तयोर्दक्षिणमग्रेणाहवनीयं पर्याहृत्य तथैवोत्तरतः प्रथमनिहताच्छङ्को-ररत्निकमात्रे प्राक् स्थापयित्वा उत्तरमुत्तरेणाहृत्य तथैवोत्तरतः स्थापयेत्। सांकाशिने समीचीने, संकाशस्थिते वा, बन्धनादि विस्त्रस्य सम्यक् निर्णिज्य पुनर्बद्धां रराटीयं पुरस्ताच्छादनार्थं प्रत्यानह्य[८] तृतीयं च्छदिरुद्दधति। तृतीयमु-

१. M Ad B broken: cf VādhŚS 6.13.54. २-२. M Ad B Text from ब्रह्मोप° to समुद्धन्ति repeated after स्थाणुश्चावृ. ३. M Ad B °वेदो. ४-४. M Ad B सौरहित्वेध्ममनीपयन्ति. ५. M Ad B om ता. ६. M Ad B °तव्यः. ७. M Ad B °लापि. ८. M Ad B प्रत्यन°.

परिष्टाच्छादनार्थमुपरिष्टादुद्धाय परिश्रयन्ति। दक्षिणतश्चोत्तरतश्च परिगृह्णन्ति। तथोत्तरस्य हविर्धानस्य कुर्यादित्येके। विमित एव विमितायामायतनप्रदेशाभ्यधिकविस्ताराणि च्छदींषि कृत्वा तैरेव कुर्यादित्येके। तूष्णीं संस्कृतमाज्यं स्रुक्स्रुवौ च [१]संमृष्टावेवंजातीयकेषु प्रोक्षण्यस्तूष्णीकः सपवित्राश्च। वर्तन्यां वर्त्मनि जुह्वच्चक्रमभिजुहुयादित्येके। प्राचोत्तानेन पदेनाक्षं पत्नी उपानक्ति। चक्रमुद्वृह्य यत्र चक्रं बद्धं तत्र तथा दक्षिणतस्तूष्णीं पदमवशेषयेत्। उत्तरस्योपात्तनाय अत्यूहति प्रयच्छति। तत्रापि सर्वं तुल्यम्। कृत्स्नं पदं तत्रैव विनियुञ्जीत। उत्सर्जनेऽनुपलब्धे विनियोगत उत्सर्जनप्रायश्चित्तं वाचयेदेव। अनुमन्त्रयेत। अध्वर्यू वारयतश्च काले यत्र स्थातुमहतः नभ्यस्थे नभ्यफलके स्थिते कृत्वाऽरत्निमात्रपृष्ठ्याया व्यपेत मिथः समीचीने। अपरेणाहवनीयं परिहाप्य जघनेन ऋचा[२] मेथ्यनपसर्पणार्था शकटस्यैव तया सहाक्षमीषां वा बध्नाति। एवं मिताऽत्र[३] हविर्धानं मितं कुर्वन्ति नवकं दशकं वा। उदीचीनकर्णा स्थूणा[४] उच्छ्रयति चेदेतयोर्द्वारोः[५] पृष्ठ्याया अभितोऽरत्निमात्रे तासु वंशानुद्धाय छर्दींष्युद्दध्युः[६]॥ [१]

पुरस्तात् तिर्यग्रराटीयमपरतः तृणं वा सीव्यति छादयति ऊर्ध्वाग्रैर्दर्भैः कुशलतया ग्रन्थिरहितामेव। द्वार्बाहू कुर्वन्तौ सीव्यतः। अथापरौ[७] द्वार्बाहू तूष्णीं सीव्यतः। नेत्यपरे। अथ सर्वत्र परिश्रयन्ति। प्रसलैः प्रागपवर्गं द्वारौ परिहाप्य अभिमृशतोऽध्वर्यू। अभ्यन्तरमुपरवार्थमादेयम्। तथा यूपार्थमनियम इत्येके। अवटमभ्येतोऽध्वर्युयजमानौ। प्रक्षाल्य प्रपाद्याग्रेणाहवनीयं पर्याहृत्य स्वस्थानं प्रत्युपनिहितामौदुम्बरीं चाभ्येतः। सर्वाणि तामन्वितराणि च प्रक्षाल्य तीर्थेन प्रपाद्यानि यैर्दक्षिणतः पृष्ठ्याया अर्थस्तानि चाग्रेणाहवनीयं पर्याहर्तव्यानि। पुरुषाश्च प्रक्षालितपादा आचान्तास्तीर्थेन प्रवेशयेयुः। तथा दृशीकवः परिकर्मिणोऽन्ये च ये प्रयोजनवन्तः दक्षिणतो व्याप्रियमाणा अग्रेणैवाहवनीयं परीयुः। तथा ततश्चोत्तरत आगच्छन्ति। औदुम्बरीस्थूणामध्यमासदनमूर्ध्वमुपरवाद्[८]। यजमान अत्रानीतां[९] क्रियमाणाप्युदगात्रोच्छ्रियमाणामध्वर्युणा सह कुर्यात्। विषूके विशाखे स्थूणायाः कर्णयोरन्तराले मन्त्रान्ते हिरण्यस्योपरि जुह्वन् भूय आज्यमासिञ्चेत् यावतान्तमन्ववस्रावयेत्। भूमिगत आज्ये स्वाहा करोति। अथ प्राचीनकर्णा स्थूणा उच्छ्रित्योदीचो वंशानुद्धाय ऐन्द्रमसि इति

---

१. M Ad B संमृष्टामे॰. २. M Ad B संचा. ३. M Ad B ॰मित्रात॰. ४. M Ad B ॰स्तूणा. ५. M Ad B चेद्वे॰. ६. M Ad B ॰दींष्युंद॰. ७. M Ad B ॰अपरो. ८. M Ad B ॰मुपरद्यज. ९. M Ad B आत्रीतां.

दक्षिणं[१] छदिरभिनिधाय विश्वजनस्य छाया[२] इत्युत्तरतः किञ्चित्। अथेतराणि तूष्णीमधि निदध्युः। अकामानामनियतानि[३] छदींषि क्रत्वर्थानि, कामिनां तु यथाकामं[४] नियमः। नवच्छदीत्यादीनामन्यतमं क्रत्वर्थमपीत्येके। दक्षिणेन दक्षिणान्युत्तराण्यधराणीतराणि[५]। अन्तर्वर्तान् कुर्वन्ति। छदिःसन्धिषु सर्वेषु तृणावर्तान् प्रत्यवस्यति। तेऽन्तर्वर्तादुदीचीनं[६] सदो वर्धयन्ति, न समचतुरश्रं कुर्वन्ति। उदगायतं कुर्वन्ति॥ [२]

उत्तरतो वा पृष्ठ्याया वर्धयन्ति। 'परि त्वा गिर्वणो गिरः' इत्यभितः परितः समुच्छ्रयन्ति। परिश्रयणमन्त्रेणाध्वर्युरारभेत। तथेतराणि। परिकर्मिणः प्रसलैः प्रागपवर्गं द्वारद्वयवर्जं परिश्रयन्ति। द्वौ द्वौ बाहू मन्त्रेण सीव्यतः। एकैकमित्येके। तदाग्नीध्रागारं कृत्वा परितः परिश्रित्य दक्षिणतो द्वारं कुर्वन्ति, तथोत्तरतः। मार्जालीयस्य दक्षिणतोऽपरेणोपरवानासीनो[७] यजमानः पदाङ्गुष्ठाभ्यां निबाधते नीचैर्बाधते। भूमिमुदस्तात्पांसूनित्येके। तदेव ज्यायः। अध्वर्युरेव निबाधनं[८] कुर्यादित्येके। यजमान एवोद्वपनानि[९] निबाधत[१०] इत्यपरे। अध्वर्यो किमत्र इत्युक्तो भद्रम् इत्यध्वर्युराह, तन्नौ सह इति यजमानः। यजमान किमत्र इत्युक्तो भद्रम् इति यजमानः, तन्नौ सह इत्यध्वर्युः। एवं सर्वत्र यं यमध्वर्युर्जहाति तं तं यजमानः संमृशति। प्रोक्षणमत्र सकृदेव सर्वेषाम्। अपनयनप्रस्कन्दनावस्तरणा-भिहोमेष्वावृत्तिर्यथा नापसर्पतस्तथा कुर्यात्। पर्यूहनं च दृढिम एव। बर्हिषा परि च स्तृणाति। परि चाधिषवणचर्म[११] त्रिप्रादेशायामविस्तरम्। प्रादेशोऽधः-प्रमाणमूर्ध्वलोमाधोअक्ष[१२] यथार्थप्रमाणमाखरं कल्पयेत्। यावन्ति सोमपात्राणि स्रुचश्च साद्येरन्। एतस्मिन्काले दक्षिणस्य हविर्धानस्योपस्तम्भनस्य पूर्वार्धे बर्हिर्मुष्टिं निबध्नीयात्। स्तोत्रोपकरणाय नवानि बध्नीयात्। स्रुग्धारणार्थादेव प्रस्तरात् स्तोत्रोपकरणार्थं बर्हिराददीत्॥ [३]

आग्नीध्रियो धिष्णियो मध्य आग्नीध्रागारस्य मध्याद्दक्षिणतोऽरत्निमात्र इत्येके। धिष्णियाः सर्वे प्रादेशप्रमाणा अरत्न्यन्तराला येष्वन्तरालः संभवः। अग्निचित्यायां त्वरत्निप्रमाणाः प्रादेशान्तरालाः। प्रत्यङ्ङासीनो धिष्णियान् निर्वपेत्। ततो मध्यात् प्राक् प्रक्रमत्रये वा पृष्ठ्यायां होतुर्धिष्णियम्, अरत्निमात्रे

---

१. M Ad B भुक्षि; cf. VādhŚS 6.17.3. २. M Ad B श्चये॰. ३. M Ad B ॰तानिशच्छ॰. ४. M Ad B ॰कामाग्नियम. ५. M Ad B ॰क्षिणान्युपकरत्यध॰; cf. VādhŚS 6.17.5. ६. M Ad B ॰चीना. ७. M Ad B ॰सिनो. ८. M Ad B ॰धनमेव. ९. M Ad B ॰वपन. १०. M Ad B ॰धने. ११. M Ad B ॰वर्म. १२. M Ad B ॰अधत्रक्ष.

**वा दक्षिणतः पृष्ठ्यायां दक्षिणेन प्रशास्तुरुत्तरेण ब्राह्मणाच्छंसिनः पोतृनेष्टॄच्छावाकानां च। अन्ततो मार्जालीयस्य धिष्णियां निर्वपेत्। उपस्थापयति यजमानम्। अनूयाजस्यान्वत्रैव केचिद् अनुदिशन्ति। अनूकशब्दं च वाक्यशेषं तेष्वनुवर्तयन्ति॥** [४] इति पञ्चमोऽनुवाकः॥

## अथ षष्ठोऽनुवाकः

### [वसतीवरीग्रहणम्]

**सर्व[१] ऋत्विजो विविधं गच्छन्ति स्नानाय। पुनर्देवयजनमागच्छन्ति[२]। नियोगतोऽत्र[३] सर्वैः स्नातव्यम्। नैष स्नाननियम इत्यन्ये। स्नाननियम इति** ज्यायः। **कुम्भो दृढिष्ठो परिकृष्टवासतीवरः[४]। ग्रहणकाले[५] कूर्चापिहितेन गृह्णीयात्। उत्क्षुभ्य[६] वहन्तीरपः कृत्वाऽऽत्मनश्छायामौदकीं कुर्यात्। अपिव्रताः पुत्रा दुहितरोऽप्रत्ता भ्रातरोऽविभक्ताः। सपिण्डा इत्येके। ग्रावाणः पञ्च सोमांशुसवनाः[७], वायव्यान्यूर्ध्वपात्राणि, समवशमनं सम्यगवधानं, गार्हपत्यं प्रत्युदयनं पत्न्यास्तथा [८]अनःप्रवर्तनम्। यत्रानोऽभिष्टव्यवहारस्तत्रैव[९] प्रवर्तनम्। प्रैषखण्डश्चेत्यपरे॥** [१]

**प्रयोजनमनसां प्रैष इत्यपरे। स्तृणन्त्यध्वर्युपुरुषा अन्ये च परिकर्मिणः। कृत्स्नां महावेदिं नैरन्तरेण उदगपवर्गं तूष्णीं हविर्धान आग्नीध्रिये मा[१०] तावदिति बाहुल्येन स्तृणन्ति धिष्णियोत्तरवर्जम्। हविरासादनस्थानं च वर्जयित्वेत्येके। अर्धस्तनव्रतं विभज्य निहितं प्रयच्छेत्। अथाग्नीत्प्रेषितः पूर्वं वैसर्जनहोमार्थमधिश्रयेत्। अथाध्वर्युरेव पाशुकं तन्त्रमारभेत, प्रतिप्रस्थाता वा। प्राकृतस्यैवाज्यस्य प्राकृतमधिश्रयणमात्रमग्नीत् कुर्यादित्येके। अग्नीदेवाधिश्रयणान्तं प्राकृतं तन्त्रं कुर्यादित्यन्ये। तदेव[११] ज्याय इवाभाति। तथा सति अग्नीदभ्याधाय बर्हिः संभरेत्। प्राक्तने एव प्रस्तरतिरश्ची इत्येके। इध्मस्तु शाकलः पूर्वमुपात्तः[१२] प्रोक्षितश्च। परिधयः प्राक्तना एव। गार्हपत्यान्वाहार्यपचनाहवनीयान् परिस्तीर्य वेदिमभिमन्त्र्योत्तरेण गार्हपत्यं पाशुकानि पात्राणि सादयित्वा पवित्रेण यन्ति येषां पुरोडाशार्थास्ताः। अथ दक्षिणमंसमभिनिवर्त्य हस्तौ मार्जयित्वा प्रविश्य[१३] शालां प्रोक्षणीं संस्कृत्य पात्राणि प्रोक्ष्यातिशिष्टाः पूर्वेण गार्हपत्यं निधाय** वेदं परिवासय **इत्युक्त्वाऽऽज्यं निरुप्याधिश्रित्य दधि च**

---

१. M Ad B सर्वर्त्वि॰. २. M Ad B ॰देवयजमानमागच्छति. ३. M Ad B ॰तेऽत्र. ४. M Ad B परिष्टवा॰. ५. M Ad B ॰कालः. ६. M Ad B उक्षु॰. ७. M Ad B सोपांशु॰. ८. M Ad B सनांप्र॰. ९. M Ad B ॰नोऽभिष्ट्यवहा॰. १०. M Ad B मास्ता॰. ११. M Ad om त. १२. M Ad B ॰त्तं. १३. M Ad B प्रवभ्य.

**पर्या[णीय]**[१] **प्रैषखण्डमाह** प्रोक्षणीरासादयेध्माबर्हिरुपसादयाज्येनो[२]देहि पृषदाज्याय दध्याहरेहि यजमान **इति। अग्नीदित्येके। तथा सत्यविकृतः प्रैष इति केचित्। अस्यैव कश्चित् प्रैष ब्रूयादित्यन्ये। अध्वर्युरिति** ज्यायः। **प्रतिप्रस्थात्रे प्रोक्षणीः स्फ्यस्य वर्त्मनि सादयति यत्रावस्कभ्य प्रैष उक्तः॥** [२]

**तत इध्माबर्हिरुत्तरेणाहवनीयं सादयेत्। अथ स्रुचः संमृज्यात्रैव सादयित्वा पत्न्यवेक्षितमाज्यं हृत्वाऽऽहवनीयेऽधिश्रित्योत्तरेण प्रोक्षणीः सादयित्वा** अग्नेर्जिह्वासि **इत्यवेक्ष्य यजमानावेक्षित**[३] **आत्मनश्छायामवेक्ष्यापूर्य**[४] **प्रोक्षणीषु पवित्रे निधाय पुनराहृत्य प्राग्वंश** [५]**एवाज्यं निदध्यात्**[५]**। पत्न्यवेक्षितमाज्यं पुनर्मन्त्रेण गार्हपत्यं** [६]**वाऽधिश्रित्योत्तरेण गार्हपत्यं मन्त्रेण सादयित्वा** अग्नेर्जिह्वासि **इत्याज्यग्रहणान्तं**[७] **करोति। यजमानश्चावेत्यावेक्षेत। आद्य एव पक्षो ज्यायान्। आग्नीध्र एवाज्यानि गृह्णीयादिति केचित्। अध्वर्युरेव सर्वत्र। तन्त्रं प्रैषश्च खण्डतो वाच्यः। आज्याधिश्रयणमात्रमग्नीधः प्रैषार्थश्च प्रतिप्रस्थातुरिति केचित्। सर्वत्राज्याधिश्रयणान्तमग्नीधोऽन्यत् सर्वमविरुद्धमाज्यग्रहणान्तं प्रतिप्रस्थातुरित्यपरे। परसूत्रप्रसिद्धश्च पुराणगार्हपत्यं पत्नीयजमानावुपस्थापयति। अध्वर्युर्मन्त्रं वाचयेत्। स्वयमेव मन्त्रं ब्रुवन्नञ्जलिमात्रेण दम्पती उपस्थापयतीत्येके। तथा सति मन्त्रलिङ्गविरोधः। प्रागावृत्त उपविशतीत्यपिव्रता दम्पती च वाससा प्रतिच्छन्ना अध्वर्युरन्वारभमाणः। अथ ब्रह्मोत्तरेणाग्नीध्रीयं धिष्णियमुत्तरेण च सदः परीत्य पूर्वया द्वारा शालां प्रपद्योत्तरेण शालामुखीयं गत्वाऽपरेण वेदिमत्याक्रम्योपस्थे राजानं कृत्वा दक्षिणेन शालामुखीयमसित्वा**[८] **वैसर्जनहोमानन्तरं होतुरुत्थानमनु राज्ञा सहोत्थाय यथेतं निष्क्रम्य होत्रध्वर्यू दम्पती उत्तरेण गच्छन्त राजानं परिहरेत्। तथा वसतीवरीः पात्राण्याज्यानि चोत्तरेणाग्निं परिहृत्याग्रेण गार्हपत्यं प्रसलैः पर्यावृत्य गच्छतां दक्षिणतः॥** [३]

**प्राङ्** [९]**गच्छन्मन्त्रेणान्वगिवाग्रे गच्छतामग्निरभ्यन्तरोऽथ राजाऽथाज्यान्यथ वसतीवरीरथ ग्रावाणोऽथ वायव्यानि। वसतीवर्य आज्येभ्योऽभ्यन्तरा इत्येके। कर्तृषु दम्पती आभ्यन्तरावथाध्वर्युरथ होताऽथ ब्रह्माऽथोद्गाता। सर्वत्रैवमर्धिभ्यो मुख्यास्तृतीयिभ्योऽर्धिनः पादिभ्यस्तृतीयिनो मुख्यानुपूर्व्या मिथः। पुरुषाः सर्वे मन्त्रेणाग्निप्रथमाः पूर्वया द्वारा निष्क्रम्योत्तरेण सदः परीत्याग्नीध्रागारं प्रविशन्ति। ब्रह्मा सर्वेभ्यः पूर्वं सह राज्ञा प्रविश्योत्तराग्नीध्रीयं**[१०] **धिष्णियं परीत्यापसलैः**

१. M Ad B पर्य. २. M Ad B °दयोऽज्मनो. ३. M Ad B om °त. ४. M Ad B °पूय. ५-५. M Ad B एव ज्यायः ज्यानि ज्यायात्. ६. M Ad B वोऽधि°. ७. M B °ग्रहणाणत्तं. ८. M Ad B °मासित्वा. ९. M Ad B गच्छन्. १०. M Ad B ध्रियं.

पर्यावृत्य दक्षिणतस्तिष्ठेत्। अथाध्वर्युरग्निं सादयित्वा अनुरब्धेष्वपि वृतेषु[१] नयवतीं हुत्वाऽत्रैव द्रोणकलशं च वसतीवरीश्च यत्नतो निदधायाज्यान्यादायोत्तरेणाग्नीध्रीयं धिष्णियं परीत्याहवनीयं प्रति गच्छतां ब्रह्मा दक्षिणतो गत्वाऽध्वर्यवे राजानं संप्रदायापरेणाहवनीयं गत्वा दक्षिणत आहवनीयस्योपविशेत्। उत्तरवेदिं गच्छतां दक्षिणतो गत्वा प्रसलैः प्रर्यावृत्यादशहोतुर्व्याख्यानादुत्तरेणाहवनीयं राजानं धारयन् स्थित्वाऽध्वर्यवे[२] राजानमित्येतत् कुर्यादित्येके। तदेव ज्यायः। अग्रेणाज्यानि परीत्याध्वर्युः प्रोक्षणीरादाय प्रदक्षिणमावृत्य प्रत्यङङ्द्रुत्य धरुणेऽपोऽवोक्ष्य पुनरागत्याग्रेणाज्यान्युद्धृद्रुत्य [...][३] प्रोक्षणादि प्रतिपद्यते॥ [४]

वेदिशब्देन हविःसादनप्रदेश इव लक्ष्यते। स चाग्रेण जघनेनोत्तरवेद्याः। दक्षिणेनोत्तरवेद्या इत्येके। बर्हिषि[४] बर्हिषि उन्नयति। अवनिनयनं[४] चात्र स्तीर्णस्यैव बर्हिषो दक्षिणोत्तरम्। द्वयोः[५] श्रोण्योर्निनयनम्। तत्रैव स्रुवाहुत्यां संप्रयच्छन्नारभ्य यथेत अप उपस्पृश्य पूर्वया द्वारा राजानं प्रपादयेत्[६]। सर्वत्राप उपस्पृशेत्। आज्यं स्पृष्ट्वा सोममुपस्पृशन् सोमं वा स्पृष्ट्वाऽऽज्यं स्पृशन् यजमानः प्रपादयेदित्येके। संप्रदानादि नियोगतो यजमान आऽङ्गुलीनां विसर्जनात्। इदमहम् इत्यादिरुपावर्तनमन्त्रः। उपोत्तानं[७] चेमं लोकं मनसैवाञ्जलिं करोति। नमो देवेभ्यः इति स्वधा पितृभ्यः इत्यञ्जलिं करोति। पितृभ्यो दक्षिणमवाञ्चं कृत्वा सव्यमुत्तानं प्राचीनावीति दक्षिणमुखश्च। उपवीतविपर्यासे हस्तप्रक्षालनं सर्वत्रैव। अनुवीक्षते[८] आकाशं स्वर्गलोकमभिध्यायन्। अस्पर्शयन्निव पाणिद्वयं निधायाङ्गुलीर्विसृजति। सर्वमन्त्रान्ते सह सर्वा [९]विसृजेत। स्वाहा यज्ञं मनसा इति मध्यमिके, स्वाहा द्यावापृथिवीभ्याम् इत्युपकनिष्ठिके, स्वाहोरोरन्तरिक्षात् इति कनिष्ठिके इत्येके। क्रीते राजनि प्राक् प्रवणात् प्रोह्येत्येके। अत्र वा वृश्चे तथा सति वृक्णे यूपे यूपावटखननम्। नैवात्र व्रश्चनमित्येके। अथ यथोक्तं पाशुकं कर्म प्रतिपद्यते॥ [५] इति षष्ठोऽनुवाकः॥

## अथ सप्तमोऽनुवाकः

आण्डीवलत्वादिगुणयुक्तोऽग्नीषोमीयः। नित्यावित्यत्र वाऽऽज्यभागौ। अनित्यावित्येके[१०]। अनुमन्त्रणं[११] वपाया इन्द्रियावी भूयासम् इति॥ [१] इति सप्तमोऽनुवाकः॥

---

१. M Ad B पृतेषु. २. M Ad B स्थित्यध्व°. ३. M Ad B broken. ४-४. M Ad B °बर्हिसून्नत्यवानि°. ५. M Ad B धो. ६. M Ad B प्रपेद°. ७. M Ad B उपात्तनं. ८. M Ad B °वीक्षिते. ९. M Ad B °पिसृ°. १०. M Ad °नित्याधित्यके; Ad B त्येके °धिके. ११. M Ad B °मन्त्रव°.

## अथाष्टमोऽनुवाकः

अन्युप्तधिष्णियाननुदेशेन[१] एकत्रैव तिष्ठन्ननुदिशेत्। यजमानोऽध्वर्युं चानुदेशयति। अध्वर्युरेवानुदिशतीत्येके। स एव कल्पकाराभिप्रायः। आस्तावो दक्षिणेन चात्वालं यत्र बहिष्पवमानेन स्तुवन्ति, यत्र ब्रह्माऽऽस्ते सदसि दक्षिणेन होत्रकान्, यत्र हारियोजनीभिश्चरति, यत्र धानाभिः पितृकार्यं कुर्वन्ति मार्जालीयसमीपे, यत्र निर्मन्थ्येन चरति। उत्तरेणोत्तरवेदिं पत्नीसंयाजनं यन्ते। पश्वाज्यशेषेण तरांसि जुहोति। निपदः काले निपदनकाले शयनकाले आग्नीध्रे वसतीवरीः सादयित्वा राजानं चातिहृत्यैव सादयेयुः। आधवनीयपूतभृदाख्यौ कलशौ बहुशः परीक्षितौ हृदौ प्रक्षालितौ पूर्वया द्वारा हविर्धानं प्रपाद्योत्तरस्य हविर्धानस्य नीड आधवनीयं कृतेण्ड्वं[२] न्युब्जति। प्रउगे पूतभृते कृतेण्ड्वमाग्नीध्र एकं सोदचमसापिधानं निमिनुयात्। तथा मार्जालीये ते चत्वारो पूतभृताकारमहान्तः[३] कलशाः। तदानीमेव चतस्रः स्थालीरेकधनार्थाश्च सम्यक् परीक्ष्य प्रक्षाल्य निदध्यात्। आधवनीयपूतभृतोर्योगः पात्रयागकाल इत्येके॥ [१]

महापरिधयो द्राघिष्ठाः परिकृष्टाः परिणाहेन च महान्तः। अत्र सवनीयार्थं गार्हपत्याहवनीययोरभ्याधाय शाखां छित्त्वा यजमानस्य व्रतदुहो वत्समपाकुर्यात्। प्रातरेवोद्वास्य प्रवर्ग्यं प्रागाहवनीयस्य प्रणयनाच्छाखाहरणं वत्सापाकरणं चेत्येके। बर्हिः संभरेत पूर्ववदित्येके। नाचार्याभिप्रायः। अथेध्मं सह महापरिधीन्[४] पूर्वमेवेतर इध्म उत्तरः। अथ वेदं कृत्वाऽभ्याहितावग्निं परिस्तीर्य वेदमभिमन्त्रयेत। असति साधारणे तु वेदकरणाभिमन्त्रणेन तन्त्र उपक्रमकाल एव। वेदिकरणाभिमन्त्रणपरिस्तरणानि त्वग्नीत् कुर्यादित्येके। प्रैषानुपूर्वा दोहयेत् पयस्यायै धर्मवत्। इतरत्सर्वमधर्मकम्। इन्द्रः पयस्यायै[५] देवता। सायंदोहः पयस्येत्येके। न चात्रातञ्चनमित्यन्ये। आमिक्षैव पयस्यातञ्चनं कुर्याच्च काले। प्रातर्दोहं दोहयेत्। पुरोडाशेडान्ते वाजिनेन चरेदित्येके। सायंदोह एव प्रायः कल्पकाराभिप्रायः[६]। दधिग्रहाय शुक्लं दध्युपकल्पयेत्। आदित्यग्रहाय च॥ [२] इत्यष्टमोऽनुवाकः॥[७]

### ॥ इति ज्योतिष्टोमाख्यः पञ्चमः प्रपाठकः समाप्तः ॥[८]

---

१. M Ad B °या सदेशन. २. M Ad B कृत्वेण्व; cf VādhŚS 6.28.25. ३. M Ad B भूकार°.४. M Ad B °धीनि. ५. M Ad B वयस्या°. ६. M Ad B कल्पकराभिप्राया°. ७. M B इत्यष्टमो ज्योतिष्टोमः ; Ad इति अष्टमे ज्योतिष्टोमः. ८. M Ad B om.

## [१] ॥ अथ षष्ठः प्रपाठकः ॥

## ॥ अथाग्निष्टोमः ॥

### अथ प्रथमोऽनुवाकः[१]

अपराह्णे पशुमालभ्यास्तमिते वपया[२] प्रचर्य मनागपवनीयरात्रेरवदानैः प्रचर्य पशुं परिसमाप्य कर्मशेषं च कृत्वाऽऽग्नीध्रीय उषित्वा रात्रेर्दशसु मुहूर्तेष्वतीतेषु तृतीयावशिष्टायां रजन्यां यज्ञवाट् रक्षिणो यजमानपुरुषा दम्पती ऋत्विजः परिकर्मिणश्च संबोधयन्ति। तेषां सम्बोधितानां दम्पती हस्तपादान् प्रक्षाल्याचम्य प्रविशतः। इतरेषामपि ये प्रयतास्ते[३] तथैव प्रविशन्ति। ये त्वप्रयतास्ते स्नात्वा प्रक्षालितोपवा[४]तान्यक्लिष्टानि वासांसि परिधायाचम्य प्रविशन्ति। [५]सर्व ऋत्विजोऽभ्रप्रभृत्यनुवाकं[६] जपित्वा तीर्थे प्रपद्यन्ते। ब्रह्मसदस्यन्ते ब्रह्मसदस्ययोरेवैष जप इत्येके। जोषंकृतेषु तूष्णीमेव कृतेषु प्रारब्धेषु। तूष्णीं शब्दोऽत्र लक्षणयोपांशुत्वप्रकर्षवचनः। राजानं प्रपाद्य प्रेष्येत्। प्रेषितोऽग्नीत् पात्रसादनानि प्रतिपद्यते। उत्तरेणाहवनीयं पाशुकानि पात्राणि सादयित्वा पवित्रे ब्रह्माणं[७] दक्षिणत आहवनीयस्योपवेश्य प्रणीताः प्रणयेत्। नात्र प्रणीता इत्यपरे। प्रणीताऽभावेऽपि यजमान वाचं यच्छ इत्युक्त्वा कर्मणे वाम् इति हस्तौ मार्जयित्वा प्रोक्षणीः संस्कृत्य पात्राणि प्रोक्ष्य प्रोक्षणीशेषं निधाय वेदं परिवासय इति ब्रूयात्। यदि न साधारणो वेदं[८] प्रैषखण्डस्य विकल्पेनावस्कम्भनं चाथ स्थानं चाथ प्रोक्षणीः[९] स्फ्यस्य वर्त्मन् सादयित्वोत्तरेणाहवनीयमिध्माबर्हिरुपसाद्य प्रतिप्रस्थाता स्रुचः संमृज्य पूर्वया द्वारा निष्क्रम्योत्तरेण सदः परीत्योत्तरेणाग्नीध्रीयं परिहृत्यापरे[ण . . .][१०] तां प्रतीचीं[११] च पुरुषाणां द्रव्याणां चैष एव मार्गः। पत्न्यवेक्षितमाज्यमाहृत्याहवनीयेऽधिश्रित्योत्तरेण प्रोक्षणीः सादयित्वा अग्नेर्जिह्वासि इत्यवेक्ष्य यजमानमवेक्षमाणं वाचयित्वाऽऽत्मनश्छयामवेक्ष्य[१२] पुनराहृत्य [. . . .][१३]द्वौस्त [उपांशुपात्रं . . .][१४] सादयित्वा पूर्वया द्वारा हविर्धानं प्रपद्य

---

१-१. M Ad अथ; B अथ प्रथमः. २. M Ad B ववया. ३. M Ad B व्रता°. ४. M Ad B °तोवपाता°. ५. M Ad B सर्वर्त्वि°. ६. M Ad B °भृत्य इत्यसवा°. ७. M Ad B ब्राह्मणं. ८. M Ad B वेदा. ९. M Ad B प्रोक्षणी. १०. M Ad B broken. ११. M Ad B प्रतीचां. १२. M Ad B °क्ष्योद्य. १३. M Ad B broken. १४. M Ad B. Here the text dealing with उपांशुपात्र is broken; cf. VādhŚS ७.१.८.

पात्राणि युञ्ज्यात्। अन्तर्यामपात्रं सादयन् नेदीय उपांशुपात्रस्य सादयेद्, यथोभाभ्यां ग्रावा स्पृष्टः स्यात्॥ [१]

परिस्रजं यस्य परितः स्रुगाकारो[१] मध्यत उत्सेधात् द्विभृष्टि[२] यदस्य ध्रुवाकारौ द्वावुपर्युपर्युत्सेधो स्तनावा [३][. . . .] द्वौ स्त[नाका][३]रौ शुक्रामन्थिनोश्च पात्रे मिथो नेदीयसी युनक्ति। एवम् ऋतुपात्रे अश्वशफबुध्ने अश्वशफाकारे बुध्ने प्रस्थिते व्रतगमनपरतः प्रबाहुक् समीचीने। आज्यग्रहणानन्तरमेवाध्वर्युः शालामुखीये दर्विहोमिकमाज्यं संस्कृत्य प्रचरणीं संमृज्य गत्वाऽग्नीध्रीय आहुतिद्वयं जुहोति। अथोन्नेता[४] ग्रावादीनि प्रक्षालितानि प्रक्षालिते द्रोणकलशे समवधाय पूर्वया द्वारा हविर्धानं प्रपद्य दक्षिणस्य हविर्धानस्य पूर्वेण अक्षमध[५] ईषां[६] सादयेत्। एवं चमसान् पयःसक्तुहिरण्यस्रज[७] इति चोपकल्पयेत्[८] प्रचरणाय। आज्येष्वाहवनीयं प्रतिप्रणवेष्वध्वर्युरतिद्रुत्य[९] प्रोक्षणीरादायोत्तरेणा-ज्यानि परीत्याग्नीध्रीयं गत्वा तूष्णीं धरुणेऽवोक्ष्य पुनरेत्येध्मप्रोक्षणादि प्रतिपद्यते। प्रोक्षणादौ तु विशेष उक्तः। औपानुवाक्यैरभिमर्शनमाध्वर्यवं स्रुगभिमर्शनं च। [१०]ग्राव्णोऽभिमर्शनमधिषवणफलकयोर्निधाय तस्मिन् राजानं सादयेत्तूष्णीम्। फलकयोश्चर्म चर्मणि ग्राव्णो[११] ग्रावसु राजानमित्येके। अथाग्नीत् सर्वेभ्य एव सवनेभ्यः सवनीयं निर्वपेत्। उक्तः संप्रैषः। प्रातःसवनीयानेवात्र निरुप्य उपरम्य क्षुल्लकवैश्वदेवस्य स्तोत्रे माध्यन्दिनीयान् निर्वपेत्। माहेन्द्रस्य स्तोत्रे तार्तीयसवनीयानित्येके। तदेव ज्यायः। प्रातर्दोहादि प्रतिपद्यते॥ [२]

यद्यामिक्षा। पयस्यापक्षान्तरे पात्रसादनानि उत्तरेण शालामुखीयं दर्भाना-स्तीर्य तेषु पात्राणि सादयेद् एकादशकपालानि भर्जनमेकं द्वे वा अग्निहोत्र-हवण्यादीन्यष्टौ। प्राशित्रहरणं चैके। मेक्षणं पिष्टोद्वपनीं च प्रणीताप्रणयनं चैकेषाम्। आमिक्षापक्षे वाजिनपात्रं च भर्जनपात्रं च यवान् व्रीहींश्चाहृत्य अपरेण शालामुखीयं निधाय पवित्रे आदाय यजमान वाचं यच्छ इत्युक्त्वा कर्मणे वाम् इति हस्तौ मार्जयित्वाऽग्निहोत्रहवणीं शूर्पमित्यादयः पृथक् ध्रुः-मन्त्रं जपेत्। एत्येको[१२] धानाभ्यो यवान् निरुप्य। करंभाय च यवानेव निर्वपेत्। अथ परिवापाय व्रीहीन्। अथ पुरोडाशाय च व्रीहीन्। सर्वत्रेन्द्र एव देवता। अथ

---

१. M Ad B °स्रगारो. २. M Ad B °दृषि. ३-३. M Ad B text dealing with the placing of ऐन्द्रवायवपात्र, मैत्रावरुणपात्र and आश्विनपात्र is broken. ४. M Ad B °न्नता. ५. M Ad B °मधं. ६. M Ad B ईशं. ७. M Ad B °रण्यस्र°. ८. M Ad B °ल्पये कूपणाय. ९. M Ad B °रितिद्रु°. १०. M ग्राविह्णो Ad B ग्राविण्णो. ११. M Ad B ग्राविण्णः. १२. M Ad B एत्यके.

प्रोक्षणीः संस्कृत्य हवींषि प्रोक्ष्यातिशिष्टा निदध्यात् यदि च प्रणीताः। सतीषु प्रणीतासु सर्वाभिः प्रोक्षणप्रोक्षणीरतिशेषयेत्। पूर्वं यवानवघ्नन् अर्वाक् प्रैषान् कृत्वा सकृदवहतानेव। तानपनीय व्रीहीनवहन्यात्। अथ हविष्कृदाह्वानात् यवानवहन्यादित्येके। परिवापो भृष्टास्तण्डुलाः। पिष्टयवागूरित्येके। पिष्टा एव [१]प्रभ्वाज्यसंयुक्ता इत्यपरे। तेषु पक्षेषु तयोः पक्षयोस्तदर्थान् आज्यसंयुक्ता लाजा इत्यन्ये। तस्मिन् पक्षे तदर्थानां नावघातसंवापः। परिवाप इति ज्यायः, न पिष्टयवागूः। अथोपवेषमादाय प्रथमेन कपालमन्त्रेण भर्जनकपालमधिश्रयेत्। धाना करंभार्थान् भर्जयित्वा परिवापस्य लाजापक्षे स्थालीम्॥ [३]

अथैकादशकपालान्युपदध्यात्। अथ पयस्याया आमिक्षापात्रे तिरःपवित्रं पयः आनीय उत्तरत आमिक्षापात्रमधिश्रयेत्। अथ यवान् भर्जयेत्। घर्मस्य विश्वायुष इत्यावपनम्। प्रथममर्थलुप्तमन्त्रेण आलोडनं[२] कुर्यादित्येके। उरु प्रथध्वमुरु[३] वो यज्ञपतिः प्रथताम् इति [४]त्वग्ग्रहणमर्थलुप्तं मेक्षणेनालोड्य भ्राष्टानुद्वास्य[५] तेषां त्रयः[६] फुल्लास्तान् धानार्थान् एकतः कुर्यात्। अफुल्लान् सक्त्वर्थान् पिष्ट्वा तण्डुलान्[७] पिनष्टि। तत्रोपलाधानात् तन्त्रमधिवप[८]-नाद्यावर्तते। यथाभागं व्यावर्तध्वम् इत्येव पिष्टानि विभज्य, प्रणीताभ्योऽध्याहर इत्युक्त्वा प्रोक्षणीभ्योऽध्याहर इति वा। पुरोडाशीयानि समुप्य[९] पिण्डकरणान्तं कृत्वा धाना आज्येन संयुज्य तथा सक्तून् संयुज्य परिवापार्थानि पिष्टान्यावपेत्। घर्माणि स्थ विश्वायूंषि इति, घर्मोऽसि विश्वायुर् इति वा पुरोडाशमधिश्रित्य प्रथनत्वग्रहणे कृत्वा आमिक्षापक्ष आमिक्षां श्रपयित्वा उद्वासयेत्। पक्षान्तरे चोपनिदध्यात्। पर्यग्निकरणं यथा सर्वाणि हवींषि पर्यग्निकृत्वा अविदहन्त श्रपयत इत्युक्त्वा देवस्त्वा इत्यपूर्वं सर्वाणि हवींषि चाभिमृश्य अवज्वल-नाद्यपोनिनयान्तं[१०] कुर्यात्। आप्यायनं प्राग्वंश एव वेद्यां परेणाहवनीयम्। महावेद्यामित्येके। प्रैषमुक्त्वा स्वयं चतुर्गृहीतं बर्हिरादाय गच्छेत्। मैत्रावरुण-चमसाध्वर्युर्मैत्रावरुणचमसमादायानुगच्छेत्।[११] यथार्थमयुजस्त्ववमानैकधनं[१२] दशपरमानैकधनं वाऽऽदाय[१३] परिकर्मिणोऽनुगच्छेयुः। कुंभ्य एकधनस्थाल्ये [१४]वाऽऽनीतेषु सर्वेषु पत्न्यां च नेष्ट्राऽऽनीतायामग्निहोतृचमसं च वसती-

---

१. M Ad B प्रभाज्य. २. M Ad B ॰डना. ३. M Ad B ॰मुर. ४. M Ad B ॰त्वग्र॰. ५. M Ad B भ्राष्टाद्वा॰. ६. M Ad B तय. ७. M Ad B लानि. ८. M Ad B ॰तन्त्रमवधि॰. ९. M Ad B च्य. १०. M Ad B ॰ज्वलनाद्याध्यनिन॰. ११. M Ad B ॰चमसादाया॰. १२. M Ad B ॰युजस्त्यवमानेकं॰. १३. M Ad B नादय. १४. M Ad B वातीते॰.

वरीश्चात्वाले होतृवसने संस्पृष्टाः सादयित्वोपास्ते। सर्व एकधनिनो मन्त्रेणोन्नयन्ते॥ [४]

होतृचमसं च मैत्रावरुणचमसं च संस्पृश्य होतृचमसे वसतीवरीभ्योऽधि प्रस्कन्दयति। ताभ्यां वसतीवरीः संस्पृश्येत्येके। तं होतृचमसमनक्ति सकृदेव। प्रति स्तोममित्येके। तथा सति प्रकृतौ चतुष्टोमे चतुः। सकृदेव मन्त्रमुक्त्वा ग्रहमभिमृशतोऽध्वर्युयजमानौ। वसतीवरीश्चैकधनाः। तांश्च पूर्वया द्वारा हविर्धानं प्रपाद्य दक्षिणेन होतारं परिगृह्य पुनर्निष्क्रमय्यापरया द्वारा प्रपाद्योत्तरस्य हविर्धानस्यापरेणाक्षं सादयेयुः। निग्राभ्यास्तु पूर्वया द्वारा प्रपाद्य दक्षिणेन होतारं[१] नीत्वा सादयेद् वा। यद्युक्थः[२] परिधौ निमार्ष्टि, न जुहोति। हुत्वाऽग्नि-मभिमृजेदित्येके। अस्मिन् पक्षे होमस्तूष्णीको निमार्जनं मान्त्रम्[३]। अतिरात्रे होमनिमार्जने तूष्णीकेऽग्निष्टोमस्य क्रतुकरणं तदत्यग्निष्टोमस्य, यदुक्थस्य तत् षोडशीवाजपेययोः, यदतिरात्रस्य तदप्तोर्यामस्य। उत्तरस्य हविर्धानस्य युगे प्रचरणीं सादयेत्। अपानाय त्वा इति व्रजति विश्वेभ्यस्त्वा भूतेभ्य इत्यन्तेन। यतः प्रजा इत्यादिना जुहोति। यथायतनमादित्यस्थाल्ये समीपे तृतीयमुद्देशेनाव-[४]नयतोऽध्वर्युयजमानौ। निग्राभ्यासु होतृचमसस्थासु वाचयित्वा[५] अभिमृशे-दित्येके। निग्राभ्यासु वाचयित्वाऽर्धवेलां राज्ञश्चर्मणि न्युप्यान्तरेण एव नीडे उत्सादयति। न्युप्तस्यार्धं मन्त्रैर्मित्वा धिष्णियं[६] मिनुयात्। राज्ञः फलकयोश्चाभि-मर्शनमुभावध्वर्युयजमानौ कुरुतः। सन्तर्पणं कलशात्, निग्राभ्या इत्येके। कलशादिति ज्यायः। हिरण्येन श्रीणाति। हिरण्यरजः प्रक्षिपति॥ [५]

हिरण्यशल्कप्रासन[७]माचार्येणाभिप्रेतमित्येके। न हिरण्यशल्के होतव्याः उदयनीयान्ते समुद्धुत्याध्वर्यवे दद्यात्। सर्वत्रैव हिरण्यशल्कश्रवणे अनागसस्त्वा वयम् इति मन्त्रः, सकृदेवाभिषवः। अष्टौकृत्वः[८] सन्दर्शयन्निव शल्कैः प्रहृत्य पञ्चकृत्वो बलवदभिषुणुयात्। सव्येन हस्तेनांशून् पात्रं च धारयन् दक्षिणेन प्रथमनिक्षिप्तावंशू[९] आदाय पात्रस्योपरि निधाय अथ द्वाभ्यां हस्ताभ्यां पात्रमारभ्यांशून् प्रति सोमे संभृते पुनर्दक्षिणेन हस्तेनांशून् प्र[थममष्टौकृत्वः। तान् निष][१०]ज्य पुनरेव हस्तयोः कृत्वा च बलवदभिषुणुयात्। पात्रे[११] कृत्वोपासीत। तथा द्वितीयमेकादशकृत्वः,[१२] तथा तृतीयं द्वादशकृत्वः।

---

१. M Ad B होरं. २. M Ad B यद्युक्त. ३. M Ad B °र्जनमन्त्रः. ४. M Ad B °यन्तो° मानो. ५. M Ad B °यिता. ६. M धृष्णिं, Ad थिष्णिं. ७. M Ad B °प्राशन°. ८. M Ad B कृत्वा. ९. M Ad B °क्षिप्तावांशू. १०. M Ad B broken. ११. M Ad B पात्रं. १२. M Ad B कृत्वा.

तयोरप्यभिषवयोरादौ सकृन्मन्त्रः त्रिश्चामन्त्रमभिषुत्य अष्टौकृत्वो नवकृत्वश्च[१] बलवदभिषुणुयात्। अंश्वोरासाद[२]नान्तर्धाननिषजनानि दशापवित्रेण[३] परिमार्जन-मुत्तरेण[३] होत्रकव्रजनम्। दक्षिणतो ग्रहं[४] परिगृह्णाति। कर्तव्यवाक्यो[५] वाचनिकः। पात्रं सादयति यथायतनम्। सकृन्निगदः। अत्रापि विसर्गमन्त्रः षट्कृत्व आवर्तते॥ [६] इति प्रथमोऽनुवाकः॥

## अथ द्वितीयोऽनुवाकः

### ॥ अथ प्रयोगकल्पना॥

अथ राजानं चत्वारोऽभिषोतारः पर्युपविशन्ति। पश्चात्प्राङ्मुखोऽध्वर्युः। तमपरेण परितः[६] परिक्रम्य पुरस्तान्नेष्टोत्तरत आग्नीध्रो [दक्षिणतो][७] अध्वर्यु-र्यजमानश्च। चत्वारोऽभिषोतार इत्येके। पूर्वोक्तमेव ज्यायः। दक्षिणेनाग्नीध्र-स्तमपरे[णाध्वर्यु][८]यजमानौ। परीत्य दक्षिणतो ब्रह्माऽऽस्ते। चतुरो ग्राव्ण[९] आदाय चत्वारोऽभिषातारो राजानं विभजन्ति। उन्नेता [तमपरस्मिन् कलश आनयति][१०]। अभिषोतारोऽभिषुण्वन्ति। निग्राभमुपयन्ति सर्वेऽभिषोतारः, अध्वर्युरेव वा कलशात्सदोपसर्गे[११] निग्राभ्याभ्योऽधि यजमानः, स एव सृजति। उन्नेता कलशादित्येके। कलशादेव सर्वदोपसृजेत्। उन्नेतैवेति ज्यायः। [सर्वेषु][१२] पर्यायेषु सम्यगभिषुणुयात्, यथा भूयान् सोमरसो निष्पद्येत। स सासृजति भूय उदकानासिञ्चति। तमुपसृज्य राजानं सर्वेऽभिषोतारोऽभिमृशन्ति।[१३] आप्यायना ब्रूयुः। वैश्यरथकारयोरपि आप्यायस्व इत्येव विशेष उक्तः। त्रिषु महापर्यायेषु यथा नीरसमृजीषं भवति तथाऽभिषुणुयुः। दशापवित्राभ्यां सुतरामभिषवण-चर्मावमृज्य दशापवित्रस्थं सम्यक् संभरण्यां संपीड्याधवनीयेऽवनयेयुः। समी-चीनमुखान् संगतमुखान्। ऋजीषमेभ्यो व्यपोहन्ति।[१४] ग्रावाणं दृढिम्णे यथैष्वध्यूढो द्रोणकलशो न पतितः[१५] स्यात्। पवित्रं प्रतायते[१६]। तस्य मध्ये शुक्लोर्णास्तुका बद्धाः स्यात्। राजक्रये यजमानाय प्रत्ता उदङ्केनाधवनीयादुदच्योन्नेता निग्रा-भ्यास्ववनयेत्। यथा न धारा विच्छिन्द्येत तथाऽवनयेत्। उत्तरेण होतारमागच्छन् दक्षिणेन पात्रं परिहरेत्। दशापवित्रेण

---

१. M Ad B कृत्वं. २. M B अंश्वोराद°, Ad अश्वोरादा°. ३-३. M Ad B से...रेण. ४. M Ad B ग्रहः. ५. M Ad B °वायो. ६. M Ad B परिनौ. ७. M Ad B broken. ८. M Ad B broken. ९. M Ad B ग्राविण्ण. १०. M Ad B broken; cf VādhŚS ७.५.१९. ११. M Ad B °सर्गो. १२. M Ad B broken. १३. M Ad B °शन्त. १४. M Ad B °हम्ति. १५ M Ad B वतित. १६. M Ad B व्रता°.

परिमृज्य नीचहस्तेन परिमृज्यात्। अत्र कर्तव्यवाचो वाचनिकः। मनसेत्युपांशुत्वे [1]पत्नीसंमनसैवेत्येके। आऽऽग्रयणा-दित्यभिविधिः। उपयामगृहीतोऽसि वायवे त्वा जुष्टं गृह्णामि इत्यपयच्छेत्। वायवे त्वा इत्येव ब्रूयात्, न जुष्टं गृह्णामि इत्यन्ते॥ [१]

ग्रहणमन्त्रे, एष ते इत्यादि सादनमन्त्रः। परिमार्गस्तूष्णीकः। पात्रस्योपरि पार्श्वतश्च ये सोमविप्रुषस्तान् परिमार्ष्टि। हिरण्येन श्रीणाति। हिरण्यरजः प्रत्यस्यति। हिरण्यशल्कं [2]प्रास्येदित्याचार्याभिप्राय इत्युक्तम्। प्राग्ग्रहणमन्त्रात् भूः इति ब्रूयात्, मन्त्रान्ते प्राग्ग्रहणात् भुवः इति, सादनमन्त्रान्ते प्राक्सादनात् सुवर् इति। पयःसक्तूनां श्रयणे हिरण्यं समुच्चीयते। द्विदेवत्यां दशापवित्रेण परिमृज्य द्विरूर्ध्वं मृज्यार्धस्तेन शुक्रामन्थिनौ तिर्यग् विमृजेत्। प्रस्थापयन्ति पृथक् स्थापयन्ति, धारयन्ति। इन्द्रियेण वीर्येण भुव[3] इति गृहीत्वा दक्षिणं जान्वाच्य[4] तस्योपरि उभाभ्यां हस्ताभ्यामभिपद्य हिङ् कृत्वा दशापवित्रेण त्रिः परिमृज्यात्। एष त योनिर्विश्वेभ्यस्त्वा देवेभ्यः सुवर् इति सादयति। पात्रस्य तृतीयवेलायामाग्रयणं च षोडशिनं च गृह्णीयात्। [5]ऊर्ध्वबिलमन्यान् पूर्णान् आमयाविनो वर्षकामस्य च वाचयत ऊर्ध्वं सशब्दं यथाऽन्यैरन्तिकस्थैरुपलभ्यते शब्दः। अतिग्राह्याः प्रकृतावनित्याः। नैव विश्वजिति सर्वपृष्ठे नियताः। तत्रोक्तास्तेषां धर्मानिहानुसन्दध्यात्। उक्थ्यं दशापवित्रेण परिमृज्य हस्तेन मध्यं द्विः परिमृज्य ध्रुवमधस्तादनूर्ध्वानेव[6]। अत ऊर्ध्वं सकृद् द्विस्त्रिर्वा यथादेवतमुन्मृज्यात्। उदङ्कं पर्यवस्यति[7] निदधाति। [8]पवमानाद्यावर्तते। निग्राभ्याया[9] द्रप्साभिमन्त्रणं मन्त्रोक्तिमात्रम्। द्रप्सानभिसन्धाय उत्तरयोरपि पवमानग्रहयोर् उपयामोऽनुषज्याः, नानुषङ्ग इति। एतदर्थमुन्नेता पूतभृद्विले पवित्रं वितत्याधवनीयादेकं द्वे त्रीन्वा राज्ञ उदचनान्नयेत्॥ [२]

अथाध्वर्युः विश्वेभ्यस्त्वा देवेभ्यः इति पूतभृतमभिमृशेत्। निष्क्राम[10]त्यध्वर्यु-र्हविर्धानाभ्यां पवमानाय सर्पितुमन्वारभमाणः। उत्तरीयादिव्यतिषङ्गं मिथः कुर्युर्यथा न विच्छेदः स्यात्। तद्विच्छेदे महत्प्रायश्चित्तं स्यात्। तत उद्गातारो-ऽन्वारभेरन्। यस्य प्रायश्चित्तानामन्ये प्रशास्त्रादयो येषां वचनमस्ति ये च बहिष्पवमानस्य मार्जनं विजान[11]न्तस्तेनात्मानं पवयितुमिच्छन्तस्तमन्वारभन्ते। [12]होत्रध्वर्योर्ब्रह्मणश्च बृहस्पतिर् इति च स्रुवाहुतिः। सप्तहोतृहोमः सकृत्-

---

१. M Ad B पलसंम॰. २. M Ad B प्रोस्येदि॰. ३. M Ad B भव. ४. M Ad B ॰न्वाप्य. ५. M Ad B अध्व॰. ६. M Ad B अनेर्ध्वान्. ७. M B पर्यस्यति thus Ad. ८. M Ad B निग्राद्या. ९. M Ad B निष्क्रम॰. १०. M Ad B विजना॰. ११. M Ad B पवना॰. १२. M Ad B होमाध्व॰.

सकृत् स्रुवेणादाय प्रचरण्येतरे। सर्वत्रैवं स्रुचा प्रचरण्या वा यत्र चतुर्गृहीतं न विधीयते। स्रुवसाधनत्वं वा सर्वेषाम्। [१]विप्रुड्ढोमेऽनुचरीत्येके। सर्वाचार्याभिप्रायं पवमानेष्वन्यतमः। द्वितीयमपि बर्हिरादाय यत्ते[२] बर्हिर्विचालयन्नध्वर्युः प्रथमः सर्पेत्। प्रह्वास्ते जानूनि सन्धाय वीक्षमाणा नृत्यन्त इव प्रेयुः[३]। यदन्यत्तद् आस्तावे[४] प्रास्येत्। भूतमसि भूते मा धा इति प्रस्तोतुर्मुखमीक्षेत। प्रस्तरार्थं बर्हिः प्रदायोपाकरणं जपेत्। इन्द्रवन्त इत्येतावदुच्चैर्ब्रूयात्[५]। मुखमसि मुखं भूयासम् इति स्तुवत उद्गातुर्मुखमीक्षते। सामन्ननुद्रुते पूतभृति बिले दशापवित्रं वितत्योन्नेताऽऽधवनीयात् प्राञ्चं राजानं पूतभृति संपवयेत् ग्रहावकाशचर्यर्थम्। अथाध्वर्युर्दशहोतारं व्याख्याय मध्यमाया प्रस्तावे कृते[६] श्येनोऽसि इति वाचयेत्। स्तोत्रे परिसमाप्ते प्रस्तरीयं बर्हिरादाय यथास्थानमपिसृजेद्वा। सर्वेषु स्तोत्रेषूत्तरं स्तोमभागम्। अथाध्वर्युणा प्रेषितोऽग्नीद्[७] धिष्णियान् विहरिष्यन् सन्दंशं च सतं चादायाग्नीध्रीयात् सन्दंशेन[८] सतेऽङ्गारान् समुप्योत्तरेणाग्नीध्रीयं परीत्य प्रत्यङ्ङासीन आग्नीध्रीये विहृत्याङ्गारानादाय यथेतमेत्य पूर्वया द्वारा सदः प्रपाद्य प्रत्यङ्ङासीनोऽन्तःसदसि धिष्णियान् विहरेद् आवपनक्रमेण॥ [३]

अच्छावाकस्य धिष्णियं विहृत्यापसलैः पर्यावृत्य [९]प्राङासीनो मार्जालीयं[९] धिष्णियं विहरेत्। आग्नीध्रीय एवावशिष्टानङ्गारानन्ते निवपेत्। हृतान् धिष्णियानुप समादध्यात्, यथा [१०]प्राग्व्याघारणान्नानुगच्छेयुः। अथाध्वर्युस्तृतीयसवन इव तानभिजुहोति। तद् व्याघारणमाग्नीध्रीयं होत्रीयं मार्जालीयं च नाभिजुहुयादित्येके। नैवानयोः सवनयोः[१०] व्याघारणमाचार्याभिप्राय इत्यपरे। बर्हिःस्तरणं पृष्ठ्यामनु बर्हिर्भृष्टेः[११]स्तरणमोत्तरवेद्याः। पुरोडाशशब्देन सवनीयानि हवींष्युपलक्ष्यन्ते। अलङ्करणशब्देनोद्वासनम्। पात्र्यां पूर्वाधानाभ्य उपस्तृणीते दक्षिणतः करंभार्थं पश्चात् परिवापार्थम्। चरुविकारत्वेनोपस्तरणमनुद्धृत्य सादनं न चापि होममध्यतः पुरोडाशस्य पयस्याया उत्तरतस्तूष्णीम्। यद्यामिक्षा[१२] पयस्या स्यादामिक्षार्थमुपस्तरणम्। तानि यथाप्रकृत्युद्वास्य पूर्वया द्वारोपनिर्हृत्यापरया द्वारा सदः प्रपाद्य ब्रह्मसदनस्योपरि हविर्धानं प्रपाद्य दक्षिणेनाज्यानि परिहृत्य निष्क्रमय्य जघनेनोत्तरवेदिं स्तीर्णे बर्हिषि सादयेत्। आमिक्षापक्षे सादनम् इदम् इन्द्रियम् इति मन्त्रस्य भावः[१३]। शृतं मयि श्रयताम् इत्यभिमृशेत्॥ [४]

---

१. M Ad B पितृड्ढोमे.　२. M Ad B यत्ते ?.　३. M Ad पेयुः.　४. M Ad B° °स्तोवे. ५. M Ad B इत्थेके ताव.　६. M Ad B कृतते.　७. M Ad B °ग्नीन्.　८. M Ad B सन्देशे°.　९-९. MB °मार्जीयं. Ad प्रासीना मार्जीयं.　१०-१०. M Ad B text from व्याघरणान्नानुगच्छेयुः to सवनयोः repeated.　११. M Ad बर्हिमृष्टे. B °भ्रुष्टे.　१२. M Ad B °मिक्षां.　१३. M Ad B भावा.

तत्र सायंदोहत्वे यत्पृथिव्याम् इत्यादि सादयेत्। दध्यामिक्षामन्थिनस्तु[1] इत्यभिमृशेत्। प्रतिप्रस्थाता सवनीयं पशुमाहृत्यान्तिके स्थापयेत्। अध्वर्युः विष्णो त्वं नो अन्तम इत्यादि प्रतिपद्यते। राजानं सुतमसुतं च कृत्स्नं यज्ञोपचार आग्नीध्रीयादीनामुपस्थानमन्त्रैरभिमृशेत्। उपस्थानपक्षे याजमानमेतदुपस्थानम्[2]। आश्विनं द्रोणकलशाद् गृह्णाति। परिपात्रेण सर्वत्रैवं द्रोणकलशाद् ग्रहणे।[3] प्राणाय मे इत्युपांशुपात्रमवेक्षते। तस्य ते प्राणमुन्मृजे इति। इदम् स्थाने प्राणादीन् निदध्यात्। इदम् इत्येवेत्येके। प्राणम् इत्येव ज्यायः। यत्कामो वा भवति यं कामं कामयते तं चतुर्थ्या निर्दिशेत्। मन्त्रान्ते भूत्यै, ब्रह्मवर्चसाय, आयुषे, अभिचाराय इत्येषां कामानां च चतुर्णामेकम्। अपानाय मे इत्यन्तर्यामपात्रम्। चक्षुर्भ्यां मे वर्चोदौ वर्चसे पवेथां तस्य मे रासाथां तयोर्वां भक्षीय तयोर्वां चक्षुषी उन्मृजे ब्रह्मवर्चसाय इति शुक्रामन्थिनौ। आत्मने[4] मे वर्चोदा वर्चसे पवस्व तस्य ता आत्मानमुन्मृजे ब्रह्मवर्चसाय इत्याग्रयणम्। एवमुत्तरेष्वपि पर्यायेषु। वीर्याय मे इत्यतिग्राह्येषु प्रत्येकमावर्तते। वीर्याय मे वर्चोदा वर्चसे पवध्वं तस्य मे राध्वं तेषां वो भक्षीय तेषां वो वीर्यमुन्मृजे ब्रह्मवर्चसाय इति सह सर्वानवेक्षेतेत्येके। ऋतुपात्रयोः [5]सोममासिच्यावेक्षेत। अनासिच्येत्येके। द्विषदत्र मन्त्रोक्तिः। विष्णोर्जठरमसि वर्चोदा तस्य ते जठरमुन्मृजे इति त्रिष्वनुषजति। यावदुक्तमित्येके। पृषदाज्यमवेक्षते [विश्वेभ्यो मे रूपेभ्यो वर्चोदा वर्चसे पवस्व तस्य ते][6] विश्वानि रूपाण्युन्मृजे [इति]। पशुभ्य इत्येके। यथा अपां पशूनुन्मृजे इति। पशुभ्यः इत्यपरे। यथापाठमिति ज्यायः। पशुभ्यः इत्यत्र यथाभीप्सितं कामं ब्रूयात्। ग्रहावकाशचरणं [7]याजमानमित्येके॥ [५]

यजमानेनापि सर्वैः सह जपनीया इत्यपरे। स्रुचो[र्दशहोतारमध्वर्यु][8]र्ब्रूयात्। अप उपस्पृश्य निष्क्रम्य यूपरशनामादाय [9]परिवीयमाणायानुब्रूहि इत्युक्त्वोदूह्य पूर्वां रशनां नाभिदयति। अध्वर्युः[10] प्रवरिष्यन् द्वौ शकलावादायाश्रावयेत्। इतरेष्वेकैकम्। [जुष्टो वाचो भूयासम् इति प्रवृताहुतिं जुहुते होता। अध्वर्युः][11] प्रतिप्रस्थाता उभावपि द्वेद्वे इत्येके। ब्रह्मणः प्रति ब्रह्मसंस्कार इति संकल्प्य। एवं सर्वत्र होतुराहुतिं षष्ठीं [12][जुहो]तीत्यत्र द्विर्दश होतुराहुतिं जुहुयात्। वपया प्रचर्य[13]

१. M Ad B °थिनो तु°. २. M Ad B °नमेषमु°. ३. M Ad °णेन. ४. M Ad B आत्मान. ५. M Ad B सामं. ६. M Ad B om; cf. *VādhŚS* 7.8.19. ७. M Ad B याजनि. ८. M Ad B broken; cf. VādhŚS 7.8.20. ९. M Ad B परिपीय°. १०. M Ad B °ध्वर्यु. ११. M Ad B broken; cf. VādhŚS 7.8.28-29. १२. M Ad B broken. १३. M Ad B पर्या°.

आपो हि ष्ठा मयोभुव इति तृचेन मार्जयित्वा संप्रसर्पेयुः[१]॥ [६] इति द्वितीयोऽनुवाकः॥

## अथ तृतीयोऽनुवाकः

